गतस्तत्र ददर्शाऽसौ, योगिनं मौनमास्थितम् ।
हस्ते जपवटीं कण्ठे, मालां बिभ्राणमञ्जसा ॥ ५५ ॥

अनेकधूपधूमेन, व्याप्तमत्यन्तभीषणम् ।
सुरक्तरक्तवस्त्रेण, परिबद्धकटीतटम् ॥ ५६ ॥

गाढध्यानपरं रुद्ध[२]-नयनद्वयपङ्कजम् ।
बकवत्सुस्थिराङ्गं च[३], जपसंसक्तमानसम् ॥ ५७ ॥

तदग्रे जाज्वलद्वह्नि-होमकुण्डं ससम्भृतिम् ।
निष्कोशीकृतखड्गोऽसौ, प्रेक्षाञ्चक्रे महीपतिः ॥ ५८ ॥

तं दृष्ट्वैवाऽस्य सकल-मविवेकं विवेद सः ।
सङ्केताकारवेत्तारो, भवन्ति हि मनीषिणः ॥ ५९ ॥

तदग्रे दृढबन्धेन, बद्धां छागसुतामिव[४] ।
रुदतीं सुदतीमेकां, कन्यामैक्षत भूपतिः ॥ ६० ॥

'हाहाऽऽभानगरीनाथ !, नेदानीं यदि रक्षसि ।
असौ पापमतिर्योगी, नियतं मां प्रहोष्यति' ॥ ६१ ॥

नामग्राहेण रुदती-मित्थमेतां निशम्य सः ।
तदग्रे निर्भयो राजा, समागादतिसत्वरम् ॥ ६२ ॥

---

१. 'इति निश्चित्य' इति पाठा० ॥ २. 'महाध्यानेन संरुद्ध-' इति पाठा० ॥
३. 'अचञ्चलमिवात्यन्त-' इति पाठा० ॥ ४. 'मृगवधूमिव' इति पाठा० ॥

योगिनं प्रत्युवाचाऽमुं, रे दुष्ट ! मम सन्निधौ ।
कथङ्कारमियं बाला, हूयते हुतभुङ्मुखे ? ॥ ६३ ॥

रे निर्घृण ! दुराचार !, कौपीनवसनाधम ! ।
इमां बालां मुञ्च मुञ्च, मदग्रे तापसाधम ! ॥ ६४ ॥

मद्दर्शनपथायातो, यतस्त्वं न भविष्यसि ।
नहि सूर्ये तपत्येषो-ऽन्धकारस्तिष्ठति क्वचित् ?' ॥ ६५ ॥

इति श्रुत्वा वचस्तस्य, ध्यानं त्यक्त्वा स तापसः ।
काकनाशं ननाश द्राक्, प्रकाशे तिमिरं कुतः[१] ? ॥ ६६ ॥

पलायमानमालोक्य, राजा नाऽनुससार तम् ।
होमस्य साधनं सर्वं, जग्राहाऽस्य कुयोगिनः ॥ ६७ ॥

न हि सत्त्ववतः क्वाऽपि, कुतोऽप्युत्पद्यते भयम् ।
तस्य प्रभावात् सर्वेऽपि, वशमायान्ति जन्तवः ॥ ६८ ॥

अथ राजाऽप्रसन्नायाः[२], कन्याया बन्धनं लघु ।
मुक्त्वा पप्रच्छ 'रम्भोरु!, का त्वं ? कस्याऽसि नन्दना ?॥ ६९ ॥

कथमस्य वशे जाता ?, प्रीतिराभापतौ कुतः ? ।
तव जातेति सर्वं मे, भयं त्यक्त्वा वदाऽधुना' ॥ ७० ॥

तच्छ्रुत्वा बहुहर्षेण, विशालहृदयाऽपि सा ।
नाऽऽत्मानं स्तरितुं प्राभूत्, कमनीयतनुः किल ॥ ७१ ॥

राजानं स्वपतिं मत्वा, भयं त्यक्त्वा मनोरमा ।
बभूव हृदयेशस्य, सम्मुखे ह्रीमती तदा ॥ ७२ ॥

---

१. 'विननाश तदै(थै)व द्राक्, प्रकाशे तिमिरं कुतः (यथा)' इति पाठा० ॥
२. 'राजाऽतिसुन्दर्याः' इति पाठा० ॥

बभाण चतुरा लज्जा-नम्रा भूपतिमित्यसौ ।
'आभानगर्या रम्यायाः, पञ्चविंशतियोजने ।। ७३ ।।

अस्ति पद्मपुरीनाम्नी, नगरी सर्वसम्पदा ।
या वैकुण्ठमपि प्रोच्चै-रुपाहसति सेन्दिरम् ।। ७४ ।।

श्रीपद्मशेखरस्तत्र, राजा राजसमद्युतिः[१] ।
यः स्वोच्चैर्गुणसम्पद्भिः, सर्वशेखरतां ययौ ।। ७५ ।।

रम्भेव वर्यसौन्दर्ये, सौभाग्ये श्रीरिव प्रभो ! ।
शारदेव मतौ तस्य, शारदा प्रमदाऽभवत् ।। ७६ ।।

तयोश्चन्द्रावतीं नाम्ना, तनयां विद्धि मां विभो ! ।
याऽहं धर्मपरा नित्यं, बालत्वं व्यतिजग्मुषी ।। ७७ ।।

मयि श्रीकामदेवस्या-ऽधिकार इव सर्वतः ।
यौवनं प्रकटीभूतं, सर्वावयवसुन्दरम् ।। ७८ ।।

यौवनस्थां व्यलोकिष्ट, पिता मामेकदा ततः[२] ।
तस्य चित्ते[३] बभूव द्राग्, वरचिन्ता गरीयसी ।। ७९ ।।

अस्मिन् काले समागत्य, कोऽपि नैमित्तिकः पुरः ।
राज्ञः समादिदेशाऽथ, निमित्तं स्वविचारितम् ।। ८० ।।

राजंस्तव तनूजाया, आभापुरपुरन्दरः ।
सर्वशास्त्रार्थकुशलो, भविता पतिरित्यवक् ।। ८१ ।।

तन्निशम्याऽथ पितरौ, हर्षपर्याकुलौ बहु ।
सम्मान्य द्रविणं भूर्य-दातां नैमित्तिकाय तौ ।। ८२ ।।

---

१. 'चन्द्रतुल्यकान्तिः' इति टि० ।। २. '[अनङ्गरमणोद्यान-यौवनाया ममेक्षणात्]' इति पाठा० ।। ३. 'पितुश्चित्ते' इति पाठा० ।।

ममाऽपि तत् कर्णपथं, प्राप सम्यक् शुभाक्षरम् ।
रोमहर्षच्छलान्मोदो, हृदयाद् बहिरागमत् ।। ८३ ।।

तच्छ्रुत्वैव दिवारात्रिं, तव ध्यानपरायणा ।
व्यतिक्राम्याम्यहोरात्रं, त्वत्सङ्गममनोरथा ।। ८४ ।।

एकदा स्ववयस्याभिः, सार्द्धं निर्झरिणीतटम् ।
जलक्रीडार्थमगमं, तत्र [१]जातकुतूहला ।। ८५ ।।

इतोऽयं तापसस्तासां, नेत्रबन्धं विधाय च ।
इन्द्रजालेन मां नीचो, हृतवांस्तत एव सः ।। ८६ ।।

अत्राऽऽनीय समिद्धेऽग्नौ, यावद्धोतुं प्रचक्रमे ।
तावत् त्वया महाराज !, रक्षिता[२] रुदती द्रुतम्[३] ।। ८७ ।।

अन्तर्यामिन् ! प्रतप्तानां, शरण ! प्रगुणान्वित ! ।
प्रभावं तव किं वच्मि, स्मरणात् तापनाशकम् ।। ८८ ।।

निजं कलत्रमत्रास्था, इत्यहं तव किं यशः ।
गायाम्यथाऽपि स्वां वाणीं, पुनामि तव कीर्तनात् ।। ८९ ।।

आचारादेव जाने त्वां, ममाऽसि प्राणवल्लभः ।
अन्यथा कः पतिं त्यक्त्वे-दानीं पालयिता मम' ।। ९० ।।

पश्चाद् राजाऽपि तच्छ्रुत्वा, भृशं सम्मान्य तां निजाम् ।
पत्नीं ज्ञात्वा पुरस्कृत्य, गन्तुं समुपचक्रमे ।। ९१ ।।

तस्मात् सोपानतः शीघ्रं, वापीं गत्वा महीपतिः ।
जलं स्पृष्ट्वा सदारः स, बहिरागाद् मुदाऽन्वितः ।। ९२ ।।

---

१. 'बद्ध-' इति पाठा० ।। २. 'दृष्टाऽहं' इति पाठा० ।। ३. 'तथा' इति पाठा० ।।

ततः सेनाऽपि समगाद्, भ्रमन्ती नृपसन्निधौ ।
नृपमासाद्य मुमुदे, प्रणनाम पुनः पुनः ।। ९३ ।।

दृष्ट्वा समीपे तां कन्यां, रूपेणाऽप्रतिमां भुवि ।
पप्रच्छ 'केयं भवतः ?, कथं चाऽत्र समागता[१] ?' ।। ९४ ।।

राजा सर्वं समाचख्यौ, वृत्तं कन्याश्रयं ततः ।
निशम्य सर्वसामन्तः, प्रशशंस जहर्ष च ।। ९५ ।।

अनन्तरं स नृपति-रश्वे कन्यां निविश्य च ।
आजगाम पुरीं शश्व-ज्जयशब्दविवर्द्धितः ।। ९६ ।।

चन्द्रावती स्वपितरि, दूतं प्रेषितवत्यसौ ।
'आभायामस्मि सपदि, समागच्छ पितः ऽततः' ।। ९७ ।।

निशम्य पुनरुत्पन्ना-मिव तां पद्मशेखरः ।
जानन् समाययौ वीर-सेनराजपुरं प्रति ।। ९८ ।।

बह्वादरेण सत्कृत्य, वीरसेनो नृपोऽपि तम् ।
सर्वं कन्याश्रयोदन्तं, कथयामास तत्पुरः ।। ९९ ।।

तच्छ्रुत्वा विस्मयापन्नः, पद्मशेखरभूपतिः ।
कन्यां क्रोडे निधायाऽथ, गाढस्नेहमदर्शयत् ।। १०० ।।

पश्चादञ्जलिमाबध्य, वीरसेनमवोचत ।
'राजन्नस्योपकारस्य, नेक्षे प्रत्युपकारकम् ।। १०१ ।।

जीवदानस्य सदृशं[ क्षं ], न किञ्चिद् विद्यते भुवि ।
यद् विश्राण्य महीपाला-ऽनृणः स्यामहमञ्जसा ।। १०२ ।।

अतस्त्वां प्रार्थयाम्येतां, गृहाण मम कन्यकाम् ।
वाचा तवेयं दयिता, जाता नृपशिरोमणे !' ।। १०३ ।।

---

१. 'सङ्गमगादियम्' इति पाठा० ।।

पश्चात् सुदिवसे राजा, पर्यणैषीत् कुमारिकाम् ।
ननर्त गणिका तत्र, जहृषुर्नागरा जनाः ॥१०४॥

न केषां हि प्रमोदाया-ऽजायताऽसौ महोत्सवः ।
देवीं वीरमतीं त्यक्त्वा, चन्द्रावत्याः समागमे[१] ॥१०५॥

एवं कन्यां विवाह्याऽसौ, [२]पद्मशेखरभूपतिः ।
जगाम नगरं स्वीयं, प्रभूतानन्दनिर्भरः ॥१०६॥

राजा वैषयिकं सौख्यं, तया सह समन्वभूत् ।
आतन्वानोऽनेकविधां, क्रीडां कामकलोद्भवाम् ॥१०७॥

कदाचित् स जले क्रीडां, कदाचित् पुष्पितद्रुमे ।
आरामे दोलया वाऽपि, चकाराऽमरवन्नृपः ॥१०८॥

राज्ञी वीरमती चित्ते, सर्वदा दुःखसञ्चयम् ।
बभ्रेऽनपत्यताहेतुं[३], सपत्नीसत्त्वतोऽपरम् ॥१०९॥

चन्द्रावती [४]सुचरितै-र्विभ्रमैश्च निजं पतिम् ।
वशीचकार चतुरा, किं न कुर्यात् पतिव्रता ? ॥११०॥

एकदा शयने सा हि, चन्द्रं स्वप्ने व्यलोकत ।
येन गर्भं बभाराशु, लतेव प्रसवं शुभम्[५] ॥१११॥

रत्नगर्भाऽवनी किं वा ?, सूर्यगर्भा दिशा किमु? ।
द्यौरियं चन्द्रगर्भेति, तां लोको व्यचिकित्सत ॥११२॥

दोहदो यो बभूवाऽस्या, राजा तत्क्षणमेव तम् ।
पूरयामास किमु नो, कुरुतेऽभ्युदये जनः ? ॥११३॥

---

१. इतोऽग्रे- 'दोहदो यो बभूवाऽस्या, राजा तत्क्षणमेव तम् । पूरयामास किमु नो, कुरुतेऽभ्युदये जनः ॥ इति निष्कासितः श्लोको दृश्यते ॥ २. 'चन्द्र-' इति पाठा० ॥ ३. 'बभ्रे सुतालाभभवं' इति पाठा०॥ ४. 'स्व-' इति पाठा०॥ ५. 'प्रसवान्विता' इति पाठा० ॥

समये सुषुवे रम्यं, बालकं चन्द्ररूपिणम् ।
येन राजाऽतिमुमुदे, रङ्कवद्[1] धनलाभतः ॥११४॥
याचकेभ्यो धनं भूरि[2], विततार दयापरः ।
तदादि याचकत्वं ते, विजहुः स्वैरलाभतः[3] ॥११५॥
द्वादशे दिवसे राजा, सम्भोज्य स्वजनांस्तदा ।
'चन्द्रे'त्याख्यां व्यधात् स्वप्न-योगतो जगतीपतिः ॥११६॥
पञ्चधात्रीभिरनिशं, पाल्यमानः स बालकः ।
शुक्लपक्षे शशीवाऽसौ, ववृधे नृपसम्मदैः ॥११७॥
स्वाङ्गुष्ठमानने कृत्वा, पीयूषमिव तं पपौ ।
क्रमशोऽसौ[4] कुमारत्वं, जहार नृपनन्दनः ॥११८॥
तं वीक्ष्य दम्पती चित्ते, भेजाते मोदसम्पदम् ।
शिवौ स्कन्दं जयन्तं च, शचीशक्राविवाऽनिशम्[5] ॥११९॥
मधुरैर्वचनैर्नित्यं, पितरौ तोषयन् शिशुः ।
रूपेण कामदेवं स, लज्जयामास वीरसूः ॥१२०॥
एवं तस्य ययुर्वर्षा-ण्यष्टावथ महीपतिः ।
सर्वाः कलाः शिक्षयितुं, कलाभ्यासमकारयत् ॥१२१॥
इतः सर्वजनाह्लादी, सुरभीकृतदिङ्मुखः ।
कामदेवस्य सुसखा, वसन्तर्तुः समागमत् ॥१२२॥
कोकिलो हृदयग्राहि, चुकूज विपिने मुहुः ।
माकन्दमञ्जरीपुञ्ज-मरन्दास्वादमादवान्[6] ॥१२३॥

---

१. '-ऽधनीब' इति पाठा० ॥ २. 'बहुधनं' इति पाठा० ॥ ३. 'धनलाभतः' इति पाठा० ॥ ४. 'कुमारस्य' इति पाठा० ॥ ५. 'शची-पुरन्दरौ यद्वज्जयन्तमुदधिर्विधुम्' इति पाठा० ॥ ६. '-मत्तवान्' इति टि० ॥, इतोऽग्रे- '[माकन्दमञ्जरीस्वाद-काषायितगलः सुखम्]' इति निष्कासितः पाठो दृश्यते ॥

वासन्तो मुग्धमधुपः, कामिनां श्रवणे किल ।
उच्चचार महामन्त्रं, [1]शम्बरारेरिवाऽऽनिशम्[2] ।।१२४ ।।

कामदेवोऽपि सहसा, कामिनां हृदयौकसि ।
उवास पञ्चविशिखीं, प्रयुञ्जन्[3] समदस्ततः ।।१२५ ।।

प्रससार सहायत्वात्, सर्वतो दक्षिणानिलः ।
कामिनां रतिजं खेदं, हरन् सुरभिमन्दगः ।।१२६ ।।

चम्पकोद्दालकाशोक-कुन्दकुड्मलसन्ततिः ।
नवपालाशपालाशः, कामिनां मुदमादधौ ।।१२७ ।।

व्रततिर्वरमाकन्द-मालिलिङ्गानुरागिणम् ।
प्रौढेव कामिनी कान्तं, सरसं सरसा यथा ।।१२८ ।।

इतो राजा तदा खेलां, कर्तुमाराममाययौ ।
यत्र वृक्षा वसन्ताय, फलपुष्पाण्युपाहरन् ।।१२९ ।।

कलिकाश्चम्पकस्यैता, वसन्ताय महीभृते ।
ददाति विपिनं तस्मै, प्रदीपाणां शिखाः किमु[4] ।।१३० ।।

पद्मवाससमायुक्ते, सलिले वनितायुतः ।
चिक्रीड मनुजाधीशः, कामदेववशंवदः ।।१३१ ।।

काश्मीराक्तजलैः स्त्रीणां, सङ्घमस्नापयन्नृपः ।
मध्याह्नेऽपि यथा सन्ध्या-रागः समभिजातवान्[5] ।।१३२ ।।

तत्र चन्द्रकुमारोऽपि, सवयोभिः स्म खेलति ।
एनं[6] दृष्ट्वाऽथ नृपति-श्चन्द्रावत्यप्यमोदत ।।१३३ ।।

---

१. 'कामस्य' इति टि० ।। २. '-रिवाऽऽबभौ' इति टि० ।। ३. 'विधुन्वन्' इति पाठा० ।। ४. 'ददते विटपाः सर्वे, प्रदीपस्य शिखा इव' इति पाठा० ।। ५. 'समभिजायते' इति पाठा० ।। ६. 'चन्द्रं' इति पाठा० ।।

तौ दम्पती बहुविधै-रब्जैश्चिक्रीडतुर्वने[1] ।
अन्या अपि कुरङ्गाक्ष्य-स्तत्रागूरन्तुमिच्छवः ।।१३४ ।।

काऽपि बाला निजं बालं, क्रोडे कृत्वाऽतिसुन्दरम् ।
छायां चम्पकवृक्षस्या-ऽऽश्रित्य तस्थौ [2]मुदान्विता ।।१३५ ।।

काऽप्याम्रवृक्षे हिण्डोलं[3], रचयित्वा स्वबालकम् ।
क्रीडयन्ती काऽपि हस्ते, धृत्वा पोतममोदत ।।१३६ ।।

काचित् करमथाऽऽलम्ब्य, गमनं शिक्षयत्यपि ।
काचित् पुत्रं ददौ स्तन्यं, पाययामास काऽपि च ।।१३७ ।।

इति दृष्ट्वा विनोदं सा, राज्ञी वीरमती भृशम् ।
दीर्घश्वासं विनिःश्वस्य[4], क्रीडां त्यक्त्वा स्म शोचति ।।१३८ ।।

दैवं निनिन्द "हे दैव !, कथं मे तनयं नहि ।
अदा नहि विना पुत्रं, शोभते प्रमदाजनः ।।१३९ ।।

यथा दीपं विना चैत्यं, देहो जीवं विना यथा ।
पुष्पं गन्धं विना मेघो, यथा वारि विनाऽफलम् ।।१४० ।।

दयां विना यथा धर्मो, मानहीनं यथाऽर्पणम् ।
स्वरं विना यथा गानं, व्यञ्जनं[5] लवणं विना ।।१४१ ।।

तथा पुत्रं विना सर्वं, न मे राज्यादिकं सुखम् ।
शोभते हा कथं वन्ध्यां, चकार विधिरत्र माम् ।।१४२ ।।

योत्सङ्गे तनयं कृत्वा, न क्रीडयति कामिनी ।
तस्याः शरीरग्रहणं, निष्प्रयोजनमेव हि ।।१४३ ।।

---

१. '-रङ्गै' इति पाठा० ।। २. 'मदा-' इति पाठा० ।। ३. 'हिन्दोलं' इति पाठा० ।। ४. 'समाधाय' इति पाठा० ।। ५. 'भोजनं' इति पाठा० ।।

नास्ति यस्य सुतस्तस्य, किं राज्यसुखसम्पदा ? ।
न तद्‌गृहं समायान्ति, साधवोऽतिथयस्तथा ॥१४४॥

किं मया पूर्वजनुषि, कृतं कर्म मलीमसम् ? ।
येन मे '[१]शोभनाकारो, नैकोऽपि तनयोऽभवत्'' ॥१४५॥

एवं विचिन्तयन्ती सा-ऽङ्गुष्ठाग्रेण महीतलम् ।
लिलेख बाष्पनयना-ऽनाकर्णितसखीस्वना ॥१४६॥

इतः सखीजनस्ताञ्च[२], पप्रच्छ प्रेमपूर्वकम् ।
कथं त्वं विमनीभूय, रोदिषीहाऽतिविह्वला[३] ॥१४७॥

विप्रियं तव कृत्वा को, जिजीविषति मूढधीः ।
कोऽग्रेः शिखां स्वहस्तेन, जिघृक्षति मुमूर्षुकः ॥१४८॥

अयं खेलति ते भर्ता, कामदेवसमाकृतिः ।
अयं चन्द्रकुमारश्च, किं ते शोकस्य कारणम् ? ॥१४९॥

एवमुक्ताऽपि नो देवी, स्वाधिहेतुमवोचत ।
इतः कोऽपि शुकस्तत्र, सहकारे समाययौ ॥१५०॥

तथाविधां विलोक्याऽसौ, देवीं कारुण्यमागतः ।
मानुषीं गिरमाश्रित्य, संबभाषे शुको वरः ॥१५१॥

'हे सुन्दरि ! किमर्थं त्वं, रङ्गभङ्गं चिकीर्षसि ? ।
किं ते दुःखं ? कुतश्चिन्ता ?, तन्मे कथय निश्चितम्' ॥१५२॥

तच्छ्रुत्वा विस्मयाविष्टा, राज्ञी यावद् व्यलोकत।
तावद् रसिकवक्तारं, शुकमालोकयद् द्रुमे ॥१५३॥

---

१. 'केसरा-' इति पाठा० ॥ २. '-स्तस्यै' इति पाठा० ॥ ३. 'रोदिषि स्वामिजीविते ?' इति पाठा० ॥

तमुवाच 'शुक ! त्वं मां, कथं पृच्छसि हृद्गतम्[1] ?।
तिर्यग्जातिः फलाशी च, वनवासी खगोऽसि हि ॥१५४॥

यदि त्वत्तो भवेद्दुःख-स्यान्तस्तर्हि वदाम्यहम् ।
अन्यथा न हि स्वान्तस्थं, प्रकाशयति बुद्धिमान्' ॥१५५॥

तन्निशम्य जगादाऽसौ, शुकः किञ्चित् समन्युकः ।
'पक्षिणा क्रियते यत्तन्मानवेन न शक्यते' ॥१५६॥

'सर्वेभ्यो हि नरः श्रेष्ठः, कथं वदसि रे शुक ! ।
तैर्न यत्क्रियते कर्म, कुर्यात् तद्विहगः कथम्[2] ?' ॥१५७॥

इत्थं देव्या वचः श्रुत्वा, विदुषां शेखरः शुकः ।
जगाद 'भुवि कोऽन्योऽस्ति, पक्षिणा सदृशः शुभे ! ॥१५८॥

त्रिखण्डाधिपतेर्विष्णो-र्भूरि[3] विक्रमशालिनः ।
गरुडो वाहनं पक्षी, वाण्या हंसोऽस्ति वाहनम् ॥१५९॥

नीरक्षीरविवेके हि, हंस एव विचक्षणः ।
तरुणीगमनेऽप्येष, उपमानतयाऽऽदृतः ॥१६०॥

दमयन्त्या समायोगे, नलस्य पृथिवीभुजः ।
उपकारमकार्षीत् स, हंस एव विहङ्गमः' ॥१६१॥

निशम्येति वचस्तस्य, देव्युवाचाऽतिहर्षिता ।
'अहो विद्वन् ! दयालुस्त्वं, पक्षिराज ! महाशय ! ॥१६२॥

अथाऽऽगमनमेतस्मिन्, समये कुत एव ते ? ।
सर्वं कथय भो पक्षिन् !, मम प्राणसमो ह्यसि' ॥१६३॥

---

१. 'जिज्ञाससे द्रुतम् ?' इति पाठा० ॥ २. 'तत् करोति खगः कथम् ?' इति पाठा० ॥ ३. '-र्जिष्णोर्वि-' इति पाठा० ॥

आकर्ण्याऽऽह शुको मां हि, धृत्वा विद्याधरोऽन्यदा ।
सौवर्णे पञ्जरे न्यस्य, पाठयित्वा बुधं व्यधात्[१] ।। १६४ ।।

एकदा पञ्जरस्थं मां, नीत्वा साधुं नमस्यितुम् ।
जगाम विनयाऽऽविष्टो, नत्वा तं समुपाविशत् ।। १६५ ।।

मुनिदर्शनतः पापं, ननाश मम तत्क्षणम्[२] ।
धर्मानुपदिदेशाऽसौ, बहुशस्तत्र योगिराट् ।। १६६ ।।

मां पञ्जरस्थमालोक्य, विद्याधरमुवाच सः ।
पक्षिणां बन्धने भद्र !, बहु पापं प्रजायते ।। १६७ ।।

इत्युक्त्वा मोचयामास, मां ततोऽहमनेकशः ।
भ्राम्यन् वनान्युपवना-न्यागतस्तव सन्निधौ[३] ।। १६८ ।।

इत्यहं निजवृत्तान्त-मवोचं वरवर्णिनि ! ।
तवाऽपि[४] यदि वक्तव्यं, भवेत् तर्हि वदाऽधुना' ।। १६९ ।।

निशम्य तद् वीरमती, शुकं मत्वाऽतिपण्डितम् ।
ऊचे निजमनोदुःख-मनपत्यत्वहेतुकम्[५] ।। १७० ।।

'मणिमन्त्रौषधीनां त्वं, ज्ञाताऽसि शुक ! सुव्रत ! ।
दुःखहेतुसमुच्छेदे[६], सहायो भव सर्वथा[७]' ।। १७१ ।।

उपकारं भृशं मन्ये, कार्ये सति विहङ्गम ! ।
ऋजुबुद्ध्या तवाऽग्रेऽहं, स्वहृदिस्थं न्यवीविदम्' ।। १७२ ।।

---

१. 'पञ्जरे स्थापयामास, हैमे प्राणसमं (बुधवरं) व्यधात्' इति पाठा० ।। २. 'तत्क्षणे' इति पाठा० ।। ३. '-ऽऽगच्छंस्तवाऽन्तिके' इति पाठा० ।। ४. 'तथापि' इति पाठा० ।। ५. '-निबन्धनम्' इति पाठा० ।। ६. 'तन्मदीयेऽत्र कार्ये त्वं' इति पाठा० ।। ७. इतोऽग्रे- 'त्वं मम प्राणसदृशो, मन्ये त्वां भ्रातरं निजम् । भवते नवलक्षं तद्धारं दास्ये कृतार्थिता(-नी) ।।' इति निष्कासितः श्लोको दृश्यते ।।

शुकोऽवदद् 'देवि ! चिन्तां, त्यज श्रेयो भविष्यति[१] ।
तवाऽग्रेऽहं[२] वदिष्यामि, सदुपायं पतिव्रते ! ॥१७३॥

त्वं धर्मजननी मे स्या, हृदि शान्तिं समाश्रय ।
अवश्यमुपकाराय, प्रयते तव साम्प्रतम्' ॥१७४॥

देव्युवाच 'न मेऽपत्य-मतो दुःखाकरं मम ।
सर्वं विभाति राज्यादि, पीड्यमाना ततोऽस्म्यहम्' ॥१७५॥

तन्निशम्य जगादाऽसौ, 'शृणु राज्ञि ! वचो हितम् ।
अस्मिन् वनेऽस्ति कौबेर्यां, चैत्यमादिजिनेशितुः ॥१७६॥

चैत्रस्य पूर्णिमायां च, रात्रावत्र सुराङ्गनाः ।
समागत्य प्रनृत्यन्ति, देवदेवस्य तुष्टये ॥१७७॥

तासां नीलाम्बरा मुख्या, देव्यस्ति गुणराजिता ।
तस्या वस्त्रं यदि हरेस्तदा कार्यं भविष्यति ॥१७८॥

एकाकिन्या त्वया तत्र, गन्तव्यं कार्यसिद्धये ।
विस्मर्तव्यं न मातस्त-दित्युक्त्वा स ययौ खगः ॥१७९॥

राज्ञी तस्मिन् गते शोक-मादधाना गृहं प्रति ।
चचाल भर्त्रा सहिता, सन्ध्याकाले वराङ्गना ॥१८०॥

क्रमेण चैत्रमासस्य, पूर्णिमासमुपागमे ।
देवी शुकवचः स्मृत्वा, गमनायोपचक्रमे ॥१८१॥

स्वसख्यै निजनेपथ्यं, दत्त्वा तस्याः प्रगृह्य च ।
एकाकिनी ययौ स्त्रीणा-मस्ति किं दुष्करं क्षितौ ? ॥१८२॥

---

१. 'सर्वं विधास्यति' इति पाठा० ॥ २. 'ईश्वरस्तं' इति पाठा० ॥

चन्द्रप्रकाशविमली-कृतं गहनमुत्तमम् ।
अतिक्रम्य ददर्शाऽग्रे, मन्दिरं स्वर्णभासुरम् ।।१८३ ।।

पतितो भागणः[१] श्रान्तो, रात्रौ तन्मन्दिरोपरि ।
विश्राम्यन्निव बभ्राजे, मणिखण्डचयः शुभः ।।१८४ ।।

पवनान्दोलितास्तत्र, केतवो दूरतो जनान् ।
आह्वयन्त इवाऽराजन्, दृष्ट्वा तद्धर्षमाप सा ।।१८५ ।।

आदीश्वरं भक्तिनम्रा, प्रणनाम पुनः पुनः ।
स्वदोषं क्षमयित्वा सा, क्वचित् कोणे स्थिताऽभवत् ।।१८६ ।।

ततो देवाङ्गनास्तत्र, समागत्य प्रणम्य च ।
विशिष्टभक्तिभावेन, पोपूज्यन्ते स्म सत्प्रभुम् ।।१८७ ।।

पश्चाद् रसज्ञास्ताः सर्वा, भावपूजां विधाय च ।
द्वात्रिंशन्नृत्यसंयुक्तं, सङ्गीतं कर्तुमुद्यताः ।।१८८ ।।

सारीगमपधन्यात्म-स्वरान् सप्तलयानुगान् ।
वीणायां वादयन्ति स्म, ग्राममूर्च्छनकोविदाः ।।१८९ ।।

तां धिक् तां धिड्मृदङ्गांश्चा-ऽवादयन्त रसप्लुताः ।
रागसागरसम्मग्न-हृदया भावभासुराः ।।१९० ।।

इत्थं नृत्यादि कृत्वाऽथ[२], श्रान्ता अप्सरसस्ततः ।
स्वं स्वं वस्त्रं स्थले न्यस्य, सरसि स्नातुमाविशन् ।।१९१ ।।

ता हास्यरसनिष्णाता, जलक्रीडां सखीजनैः ।
चक्रुस्तदन्तरं लब्ध्वा, राज्ञी तत्र ययौ द्रुतम् ।।१९२ ।।

---

१. 'भास्करः' इति पाठा० ।। २. 'इत्थं नृत्यं विधायाऽथ ' इति पाठा० ।।

शुकस्य वचनं स्मृत्वा, मुख्याया नीलमंशुकम् ।
हृत्वा मन्दिरमागत्य, द्वारं बध्वा स्थिताऽभवत् ॥१९३॥

स्नात्वा ताः समुपागम्य, स्वं स्वं वस्त्रं दधुः स्त्रियः ।
मुख्या स्ववस्त्रं नाऽऽलोक्ये-तस्ततोऽमार्गयत् ततः ॥१९४॥

'भगिन्यो ! दत्त मे वस्त्रं, कृतं[1] हास्येन साम्प्रतम् ।
नग्नाऽस्मि प्राञ्जलिं कृत्वा, प्रार्थयामि पुनः पुनः' ॥१९५॥

ता अब्रुवन्न चा'ऽस्माभि-र्दृष्टं तव वरांशुकम् ।
वयं त्वद्वसनं नीत्वा, हसिष्यामः कथं सखि ! ? ॥१९६॥

हे स्वामिनि ! प्रसादं ते, सततं कामयामहे ।
कथङ्कारं परीहासं, कुर्याम किन्तु श्रूयताम् ॥१९७॥

अस्माभिर्मन्दिरद्वार-मुद्घाटितमितः कथम् ? ।
पिनद्धं दृश्यते तस्मात्, तत्रैवांऽशुकहारकः' ॥१९८॥

सर्वा मिलित्वा तत्राऽगु-रूचुश्च विनयान्वितम् ।
'द्वारमुद्घाटय त्वं को ?, मन्यस्व वचनं मम[2] ॥१९९॥

रात्रिः प्रभातकल्पाऽतो, गन्तव्यं दूरमद्य नः ।
देहि वस्त्रं न ते कार्यं, तेन तद्दैवतं यतः ॥२००॥

ददासि यदि मे वस्त्रं, मन्नृत्येन प्रसह्य च ।
प्रसादीकृतमित्येव, ज्ञास्यामो वयमत्र तत्[3] ॥२०१॥

अथवा वस्त्रहरणं, कृतं कामेन केनचित्[4] ।
दास्यामि सत्यं तेऽभीष्टं, बुद्ध्यस्वैतन्न चाऽन्यथा[5]' ॥२०२॥

---

१. 'अलम्' इति टि० ॥ २. 'वचनं मम मन्यताम्' इति पाठा० ॥ ३. 'हि' इति पाठा० ॥ ४. 'यदि ते स्वार्थसाधकम्' इति पाठा० ॥ ५. '-मन्यथा न वदाम्यहम्' इति पाठा० ॥

श्रुत्वा वीरमती शीघ्र-मुद्घाट्य मन्दिराररम् ।
उवाच 'यदि मेऽभीष्टं, दद्यास्तर्हि ददेंऽशुकम्' ॥२०३॥

मुख्योचे 'तव[1] किं कार्यं ?, वद शङ्कां न च क्रियाः[2]।
पुरः करिष्येऽभीष्टं ते, पश्चाल्लास्यामि वस्त्रकम्' ॥२०४॥

अथ सा कथयामास, 'सपत्न्या मम नन्दनः ।
चन्द्राख्योऽस्ति न मे पुत्र, इति दुःखस्य कारणम् ॥२०५॥

कस्यचिच्छुकराजस्य, वचनेन मया तव ।
वस्त्रं हृतमतो मे त्वं, पूरयाऽऽशु मनोरथम्' ॥२०६॥

ततः सा देव्यवधिना, ज्ञात्वोचे राजवल्लभाम् ।
'न ते पुत्रोऽस्ति सम्भावी, किन्तु मन्त्रं ददामि ते ॥२०७॥

येन ते व्योमचारित्वं, शत्रुवर्गवशीकृतिः ।
जलचारित्वमित्यादि-बहुकार्यप्रसाधनम् ॥२०८॥

भवेदतो गृहाणेमं, येन चन्द्रोऽपि ते सुतः ।
भविष्यति न पुत्रार्थं[3], शोकं कर्तुं त्वमर्हसि ॥२०९॥

सुखवाञ्छा यदा ते स्यात्, तदा चन्द्रकुमारकम् ।
पुत्रवत् पालयेर्नित्य-मन्यथा दुःखमाप्स्यसि' ॥२१०॥

इति श्रुत्वा निराशाऽभूद्, देवी किन्तु ततः स्फुटम् ।
मन्त्रं गृहीत्वा वस्त्रं च, दत्त्वा नत्वा सुराङ्गनाम् ॥२११॥

आजगाम गृहे प्रात-र्न च तद्वेद कश्चन ।
सर्वोपकरणेनाऽऽशु, मन्त्रं साधयति स्म सा ॥२१२॥

---

१. 'वद' इति पाठा० ॥ २. 'तव लज्जां विहाय च' इति पाठा० ॥ ३. 'पुत्रस्य' इति पाठा० ॥

सिद्धे मन्त्रे ततस्तस्याः, सर्वाधिर्विन्यवर्तत ।
मन्त्रप्रसादतो लोके, किमसाध्यं प्रजायते ? ॥२१३॥

विद्याप्रसादतो देवी, लोकातिगमुपेत्य सा ।
प्रभावं निर्भया जाता, स्वैरचर्या परायणा[1] ॥२१४॥

पत्यादिकं सर्वजनं, वशीकृत्य च साऽञ्जसा[2] ।
विख्याताऽभून्न किं कुर्या-ज्जनो[3] मन्त्रप्रभावतः ॥२१५॥

इतश्चन्द्रकुमाराय, सर्वा विद्या अशिक्षयत् ।
पिता नाऽवसरे धीमान्, स्वकर्तव्येऽवसीदति ॥२१६॥

तस्मिन् पूर्वमुपात्तेव, सर्वविद्या न्यविक्षत[4] ।
भविनां न हि कृत्येषु, प्रयासः प्रायशोऽफलः ॥२१७॥

गुणशेखरभूपस्य, कन्या नाम्ना गुणावली ।
समहं स्वतनूजेन[5], पर्यणाय्यत भूभुजा ॥२१८॥

चन्द्रो गुणोज्ज्वलः शश्वत्[6], तया सह नवं नवम् ।
सुखं वैषयिकं स्वैर-मन्वभूत् स्वस्थचेतसा[7] ॥२१९॥

अनेकभावभङ्गीभि-स्तस्य चित्तमहर्निशम् ।
आराधयामास गुणै-र्नवैरेषा गुणावली ॥२२०॥

वीरमत्या अपि बहुः, स्नेहश्चन्द्रे व्यवर्धत ।
न कस्य जायते प्रीति-र्जने गुणगणाऽन्विते[8] ॥२२१॥

---

१. 'विद्या प्रसादतो देवी, सपक्षा सर्पिणीव सा । निर्भया मदमत्ता च, सिंहीव भुवनेऽजनि ॥' इति पाठा० ॥ २. 'वशीकृत्य वराङ्गना' इति पाठा० ॥ ३. '-न्नारी' इति पाठा० ॥ ४. 'निविष्टा' इति टि० ॥ ५. 'असौ निजतनूजेन' इति पाठा० ॥ ६. 'चन्द्रश्चन्द्र इव प्रीत-' इति पाठा० ॥ ७. 'आभूषणेन वेषेण, सुखमन्वभवत् सुधीः' इति पाठा० ॥ ८. 'चन्द्रे चिरतरोद्गते' इति पाठा० ॥

अथैकदा वीरसेन-श्चन्द्रावत्या स्वकुन्तलम् ।
सुगन्धितैलसंसिक्तं, विजनेऽकारयन्नृपः ।।२२२ ।।

चन्द्रावत्या प्रेमपूर्वं, केशवेशे कृते सति[१] ।
वृद्धतासूचकः श्वेतो, वाल एको व्यलोक्यत[२] ।।२२३ ।।

दृष्ट्वा सा न्यगदत् कान्तं, 'प्रिय ! दूतोऽयमागतः ।
एकाकी न च त्वद्भीति-मगादत्र[३] समागमे ।।२२४ ।।

भवता रिपवो राजन् !, वारिता बलवत्तराः ।
चित्रं[४] परन्तु दूतोऽयं[५], वारितो नहि क्षुद्रकः' ।।२२५ ।।

तन्निशम्याऽऽह राजा 'को-ऽन्तःपुरे समुपागतः ।
दर्शय त्वं प्रिये ! तस्य, दण्डं कुर्यामतन्द्रितः' ।।२२६ ।।

इतस्ततो विचिन्वानं, राजानं वीक्ष्य साऽवदत् ।
'स्वस्थो भव[६] कथं दूतो, मनुष्योऽत्र समाविशेत् ? ।।२२७ ।।

परन्त्वयं वृद्धताया, दूतः पलितकुन्तलः ।
समागात्, कोऽन्यथाऽऽज्ञां ते, विनाऽऽयातुमिहेश्वरः[७]' ।।२२८ ।।

तच्छ्रुत्वा नृपतेः क्रोधः, सपद्येव न्यवर्तत ।
चिन्तितं हा कथं रम्ये, देहे सेयं जराऽऽगता ।।२२९ ।।

शम्भुना दहता कामं, कथं नेयं पिशाचिनी[८] ।
अदह्यत जरा येन, शोको न स्याच्छरीरिणाम् ।।२३० ।।

---

१. 'केशवेशो व्यधीयत ' इति पाठा० ।। २. 'यमदूत इव स्वच्छो, वालमेको व्यलोक्यत' इति पाठा० ।। ३. 'तेऽभीतिं, जग्राहाऽत्र' ति पाठा० ।। ४. 'त्वया' इति पाठा०।। ५. '-ऽपि' इति पाठा०।। ६. 'व्याकुलोऽसि' इति पाठा० ।। ७. 'परिहर्तुमिहेश्वरः' इति पाठा०।। ८. 'पिशाचिका' इति पाठा० ।।

जरेयं रजकीव द्राक्, श्यामं श्वेतं करोति हि ।
यद्[1] दृष्ट्वा विषयाः सर्वे, पलायन्ते ततो भयात् ।। २३१ ।।

आज्ञाऽखण्डा जरादेव्या, वर्ततेऽत्र कलेवरे ।
दन्तानुत्पाट्य या पूर्वं, दण्डं दत्ते हि देहिनाम् ।। २३२ ।।

शुक्लतेयं शिरसि या, सेयं खड्गलता किल ।
कामदेवस्य सुभटान्, नाशयत्यञ्जसा ननु ।। २३३ ।।

इयं यदि जरा बाह्यं, प्रकाशयति मे तदा ।
आभ्यन्तरप्रकाशं त्वं, कुरुषे न कथं मनः ! ।। २३४ ।।

राज्यं सदैव दुःखाय, नरकाय विशेषतः ।
तस्मिन् मोहमुपागम्य, कथं रज्यसि सर्वदा ? ।। २३५ ।।

अरे चेतो न ते राज्यं, परलोके हितं भवेत् ।
केवलं भगवत्सेवा-माचराऽतो विमोक्ष्यसे[2] ।। २३६ ।।

कृत्वाऽनल्पं सुसङ्कल्प-मित्येवं नृपतिर्हृदि ।
शुभकर्मोदयाच्चाऽथ, निर्विण्णो व्यक्तमूचिवान् ।। २३७ ।।

अतः सर्वं परित्यज्य, संयमी स्यामहं शुभे[3] ! ।
मद्वंश्यानां क्रमोऽयं यद्, वयःस्थः संयमी भवेत् ।। २३८ ।।

चन्द्रावती तदाकर्ण्य, सरागैर्वचनैर्बहु ।
लोभयामास नो राजा, निश्चयाच्चलितोऽभवत्[4] ।। २३९ ।।

[5]द्वाभ्यामपि पुनः स्वान्ता-ऽऽवर्जकैर्वचनैर्नृपः[6] ।
बोध्यमानोऽपि नाऽमुह्यन्मोहो नीरागिणः कुतः ।। २४० ।।

---

१. 'यं' ति पाठा० ।। २. '-फलाय भविता ध्रुवम्' इति पाठा० ।।
३. 'प्रिये' इति पाठा० ।। ४. 'लुलुभे तन्निशम्य च' इति पाठा० ।।
५. 'विरमतीचन्द्रावतीभ्याम्' इति टिं० ।। ६. 'देवीभ्यां रागभरितै-र्वचोभिर्विविधैर्नृपः' इति पाठा० ।।

तदा चन्द्रावतीदेवी, विनयेन महीपतिम् ।
ऊचे 'स्वामिन्नहमपि, त्वया लास्यामि संयमम्' ।। २४१ ।।

इत्युक्त्वा तनयं चन्द्रं, शिक्षयित्वा पुनः पुनः ।
वीरमत्यै समर्प्याऽऽशु, चचाल नृपतेः पुरः ।। २४२ ।।

राजाऽपि तनयं वीर-मत्याः क्रोडे निधाय च ।
राज्यं तस्मै ददौ सार्द्धं, तया[१] दीक्षामुपाददे ।। २४३ ।।

अथ कालेन तौ सम्यक्, पालयित्वा व्रतं चिरम् ।
शासने सुव्रतेशस्य, निर्वाणपदमीयतुः[२] ।। २४४ ।।

गुणावलीसहचरो, वीरमत्या मते स्थितः ।
चन्द्रश्चन्द्र इव स्वच्छी-चकार स्वनयैर्जगत् ।। २४५ ।।

अथैकदा वीरमती, चन्द्रं रहसि प्रागदत् ।
'हे पुत्र ! न त्वया चिन्ता, कर्तव्या मम संस्थितौ ।। २४६ ।।

इच्छेयं यद्यहं तर्हि, पुरुहूतस्य चासनम् ।
चालयेयं तथा सौरा-नश्वान् स्तम्भयितुं क्षमा ।। २४७ ।।

अलकाधिपतेः सम्प-दानयेयं विना श्रमम्[३] ।
यदि वा मेरुमानीय, स्थापयेयं पुरस्तव ।। २४८ ।।

देवकन्याकरग्राहं, कारयेयं त्वयाऽऽत्मज ! ।
सर्वं कर्तुं शक्तिरस्ति, मम मिथ्या न वच्म्यहम् ।। २४९ ।।

राज्यगर्वाद् युवत्वाद् वा, नाऽवज्ञातुं त्वमर्हसि ।
प्रसन्ना यद्यहं तर्हि, कल्पवल्ली प्रियाङ्गज ! ।। २५० ।।

---

१. 'राज्यभारं ददौ तस्मै, स्वयं' इति पाठा० ।। २. 'निर्वाणपदमाप्सातां, मुनिसुव्रतशासने' इति पाठा० ।। ३. 'तवाऽन्तिके' इति पाठा० ।।

अन्यथा विषवल्ली स्या-महमेतत् सदा हृदि ।
ध्यातव्यं नहि कर्तव्यं, मन्त्रियोगं विना त्वया ॥२५१॥

सुखं कामयसे चेत् त्वं, मच्छिद्रं न विलोकयेः' ।
इति शिक्षां ददौ राज्ञे, मन्त्राराधनगर्विता ॥२५२॥

चन्द्रोऽञ्जलिं विधायाऽथ, कथयामास 'मे शिरः ।
गच्छेत् तथापि ते वाक्यं, नाऽन्यथा कर्तुमुत्सहे ॥२५३॥

त्वं माता जनको राजा, प्रभुर्मम न संशयः ।
सर्वं तव, न कोऽप्यस्मि, राज्यस्याऽस्य महाशये !' ॥२५४॥

इति तस्य वचः श्रुत्वा, प्रमदा प्रमदान्विता ।
चुचुम्ब तन्मुखं 'प्राण-समस्त्वमि'ति साऽवदत् ॥२५५॥

'गुणावल्या समं पुत्र !, सुखं भुङ्क्ष्व न ते भयम् ।
कर्तव्यं, तव कल्याण-मि'त्युक्त्वा भवनं गता ॥२५६॥

गुणावली गुणैर्गङ्गा-समा राजाऽपि हंसराट् ।
उभौ कामकलामन्व-भूतां पद्मलतामिव ॥२५७॥

तौ राजदम्पती जिष्णु-दम्पती इव सर्वदा ।
विलासं चक्रतुः पूर्व-पुण्ययोगादनुत्तमम् ॥२५८॥

क्षीरपानीयवत्प्रेमा, तयोरासीद् दुरत्ययः ।
मणिहेम्नोरिव तथा, योगो जगति निर्मलः ॥२५९॥

राजा वीरमतीं श्वश्रून्मानयामास भक्तितः ।
गुणावल्यपि तं नित्यं, प्रणनाम पराऽऽदरात् ॥२६०॥

बालोऽपि चन्द्रभूपालः, शुशुभे कामदेववत् ।
उदयाद्रौ दिवानाथ, इव सिंहासने बभौ ॥२६१॥

स्तम्बेरमा महामेघा, इव श्यामकलेवराः ।
रेजिरे यस्य भूपस्य, मन्दिरे [१]भीमगर्जनाः ।। २६२ ।।

च्यवन्मदजलाऽऽसारा, हेमबद्धरदाग्रिका ।
दन्त्याली सतडित् प्रावृ-डिव राजगृहे बभौ ।। २६३ ।।

तस्य चन्द्रस्य भूपस्य, द्वारोद्याने समन्ततः ।
श्वेतै[२] रक्तैश्चित्रवर्णैः, जात्यैरश्वैः सकेशरैः[३] ।। २६४ ।।
चित्रप्रसूनशोभाढ्यै-श्चलत्पुच्छलताङ्कुरैः[४] ।
हेषाकरैः साट्टहासो, वसन्तर्तुरतर्क्यत[५] ।। २६५ ।।

चन्द्रवाणीसुधाबिन्दोः, प्रजाश्रवणशुक्तिषु ।
सद्भावमुक्ताभावेन, शरदृतुरशोभत ।। २६६ ।।

सभायां राजभी रत्न-सञ्चयैरुपदीकृतैः ।
धान्यपुञ्जैरिव खले, हेमन्तोऽभान्नृपाग्रतः[६] ।। २६७ ।।

भीहिमम्लानवक्त्राऽब्जैः, कृपानीशारमीप्सुभिः ।
आज्ञाशीताऽनिलोत्कम्प्रै, राजभिः शिशिरीयितम्[७] ।। २६८ ।।

नृपप्रतापसंतप्ता, द्विषो भूपा अहर्निशम् ।
ग्रीष्मे रव्यातपाप्लुष्टा, इव नो शान्तिमाश्रयन्[८] ।। २६९ ।।

---

१. 'मेघ-' इति पाठा० ।। २. 'नासाद्वयीयन्त्रनाली-स्रवत्पीताम्बुकेशरैः'।। इति पाठा० ।। ३. 'जात्यैः केसरराजितैः।।' इत्यपि च ।। ४. 'आननप्रच्य-वत्फेन-सिन्दूरैरश्वसञ्चयः इति पाठा० ।। ५. 'हेषाहास्यैर्वसन्तोऽसावृतुराजः स्म खेलति ।।' इति पाठा० ।। इतोऽग्रे- 'उक्षाणोऽपि व्यभासन्त, सौरा अश्वा इवापरे ।' इति निष्कासितो पाठो दृश्यते ।। ६. '-पौकसि' इति पाठा० ।। ७. 'भीहिमानीम्लानवक्त्र-कज्जाः कम्प्रहनुस्थलाः । नम्रा आगत्य भूपालाः [राजानः], शिशिरर्तुं व्यडम्बयन् ।।' इति पाठा० ।। ८. 'निदाघ इव तद्-राज्ये न क्वचिच्छान्तिमाश्रयन्' इति पाठा० ।।

चन्द्रप्रतापे तपति, नातपन्नाश्रिताः प्रजाः ।
दृष्ट्वैतद्व्यतिरेकं किं, रविर्दिवमशिश्रियत् ?[१] ।। २७० ।।

चन्द्रराजस्य सदसि, विदुषां शतपञ्चकम् ।
नैत्यद्याऽपि गुरुर्मन्ये, दृष्ट्वा भीतो गतो दिवम्[२] ।। २७१ ।।

अनेकमतसिद्धान्त-चुञ्चवः स्वस्वसम्मतम् ।
तिष्ठापयिषवस्तत्र, वादमाश्रित्य रेजिरे[३] ।। २७२ ।।

कवयः सरसं काव्यं, समस्यापूर्तिमेव च ।
कृत्वा राज्ञे[४] स्वकौशल्यं, दर्शयामासुरादरात् ।। २७३ ।।

खगोलमथ भूगोलं, फलश्रुत्यादिकं[५] तथा ।
चतुराः प्रकटीचक्रु-र्गणकास्तस्य सन्निधौ ।। २७४ ।।

सूर्याचन्द्रमसौ चित्रं[६], सभां चित्रां[७] महीपतेः ।
दिदृक्षू इव तद्भित्ता-वालेख्यत्वमुपेयतुः[८] ।। २७५ ।।

यथा नक्षत्रसङ्घाते, चन्द्रमाः शोभतेतराम् ।
तथा सर्वजनौघेऽसौ, चन्द्रराजो व्यराजत ।। २७६ ।।

अथैकदा भोजनादि-कर्म कृत्वा गुणावली ।
प्रासादे निषसादाऽसौ, निजदासीजनैर्वृता ।। २७७ ।।

काचिदवीजयत् काचित्, ताम्बूलं व्यतरत् तथा ।
काचित् सुधासमं स्वच्छं, भृङ्गारेऽम्बु समार्पयत् ।। २७८ ।।

---

१. 'चन्द्रे यदा (चन्द्रभूपे -पाठा०) धृतच्छत्रा-स्तदङ्गरक्षका अमी । तदा तप्ता अप्यसुख्यन्, प्रपन्नः को न सुख्यति ।। इति पाठा० ।।' २. 'चन्द्रराजस्य सदसि, पञ्चाशत् (धीमतां) पण्डितोद्धुराः । बृहस्पतिसमं शास्त्रै, राजानमन्वरञ्जयत् ।।' इति पाठा० ।। ३. 'तिष्ठापयिषवः सर्वे, व्यवदन्त परस्परम्' इति पाठा० ।। ४. '[भूपं]' इति पाठा० ।। ५. 'ग्रहस्थित्यादिकं' इति पाठा० ।। ६. 'व्योम्नि' इति पाठा० ।। ७. 'यस्य' इति पाठा० ।। ८. 'दिदृक्षू इव सोत्कण्ठं, क्षणं तस्थतुरद्भुताम्' इति पाठा० ।।

काचित् कण्ठे हारलतां, न्यस्यति स्म निजा सखी ।
इत्थं संसेव्यमाना सा, दासीभिः सुखमन्वभूत्[१] ।। २७९ ।।

अथ वीरमती तत्र, गोष्ठीं कर्तुं समागमत् ।
गुणावल्या समं स्वीयं, रूपं कृत्वा मनोहरम् ।। २८० ।।

आयान्तीं तां समालोक्य, तत्सखी सहसाऽवदत् ।
गुणावली'मयि शुभे !, श्वश्रूं सत्कुरु साम्प्रतम् ।। २८१ ।।

इयं श्वश्रूः समायाता, माननीया धवस्य ते ।
अस्या नमन-सत्कारा-वुचितौ तव भाविनि !' ।। २८२ ।।

इति सख्या वचः श्रुत्वा, हसन्ती सहसैव सा ।
श्वश्रूचरणपाथोजे, प्रणनाम सुभक्तितः ।। २८३ ।।

'कृतार्थाऽस्मि सुपुण्योऽयं, दिवसः समुपागतः ।
तव प्रसादादद्याऽहं, शचीतोऽपि गरीयसी ।। २८४ ।।

ममाऽजिरे कल्पलता, प्रकटाऽभून्न संशयः ।
तवाऽऽगमेन हे श्वश्रु !, जानेऽहमिति साम्प्रतम्' ।। २८५ ।।

इति तद्वचनं श्रुत्वा, हृष्टा वीरमती जगौ ।
'कुलीनाऽसि सुशीलाऽसि, गुणवत्यसि सुन्दरि ! ।। २८६ ।।

अतस्ते वचनं चारु, नाऽत्र चित्रं मनागपि[२] ।
सुधास्रावश्चन्द्रिकातः, स्वभावादुपजायते ।। २८७ ।।

---

१. 'आज्ञेव कामदेवस्य, नृपते राजतेतराम् ।।' इति पाठा० ।।, इतोऽग्रे- 'मध्याह्ने द्युमणिः स्वीयं, रथं संरुध्य वेगतः । यत्सौन्दर्यं दिदृक्षुः संस्तस्थौ रागवशंवदः' ।। इति निष्कासितः श्लोको दृश्यते ।। २. 'चित्रमत्र विभाति किम् ?' इति पाठा० ।।

पद्मिन्याः सौरभं यद्व-दिक्षुतो रसनिःसृतिः ।
तथा त्वद्विनयः सुभ्रु !, निसर्गादेव निर्मितः[1] ॥२८८॥

सौभाग्यं भुङ्क्ष्व चाऽऽकल्पं, चन्द्रेण सह सुन्दरि !।
मम प्राणसमाऽसि त्वं, वधूः सर्वजनप्रिया ॥२८९॥

त्वां पुत्रीसदृशीं मन्ये, न च मे वचनं त्वया ।
उल्लङ्घनीयमित्येव-माशासेऽहं सदैव हि ॥२९०॥

यदि त्वं मम वाक्येऽसि, सर्वथा विनयान्विते ! ।
सर्वविद्या तवैवाऽस्ति, मम नाऽस्त्यत्र संशयः' ॥२९१॥

इत्युक्त्वा गाढमालिङ्ग्य, वधूं वीरमती ततः।
स्नेहं प्रदर्शयामास, स्वाशीर्वचनविस्तरैः[2] ॥२९२॥

ततः सा विजनीकृत्य, वधूमूचे कृतादरा ।
'हे वत्से ! यदहं वच्मि, तच्छृणु त्वं समाहिता[3] ॥२९३॥

त्वं राजपुत्री राजा ते, भर्ता यदि[4] कदाचन ।
गर्वेत् तदा न ते जन्मा-ऽमोघं स्यादिति मन्यते' ॥२९४॥

इति तस्या वचः श्रुत्वा, जगादाऽसौ गुणावली ।
'मातः ! कथं वदस्येवं, का मत्तो भाग्यशालिनी ॥२९५॥

चन्द्रश्चन्द्रसमः स्वामी, सर्वसौख्यं ददाति मे ।
अनुकूलाः परिजनाः, कथं निन्दसि मां ततः ?' ॥२९६॥

[5]'तन्निशम्याऽवदच्छ्वश्रू-स्'त्वं न भावमवैषि मे ।
भावावबोधचतुरा, भवन्ति विरला यतः ॥२९७॥

---

१. 'निर्गतः' इति पाठा० ॥ २. 'सरले ! त्वं न जानीषे, छलं किमपि लौकिकम्' इति पाठा० ॥ ३. 'प्रयत्नतः' इति पाठा० ॥ ४. 'भर्तेत्येव' इति पाठा० ॥ ५. 'तन्निशम्याऽवदत् सुभ्रु ! सा' इति पाठा० ॥

हे सुन्दरि ! जगत्यस्मिन्, गुणे रज्यन्ति जन्तवः ।
न रूपे न धने क्वाऽपि, न सद्वंशभवे तथा ॥२९८॥

त्वं मूर्खेव न जानीषे, हिताहितमवेक्षितुम् ।
केवलं क्षणिकेनैव, सुखभोगेन तुष्यसि ॥२९९॥

त्वमात्मानं बुद्धिमतीं, मन्यसे राज्यगौरवात् ।
अहं [1]त्वामनया वाचा, जाने चातुर्यवर्जिताम्' ॥३००॥

गुणावली निशम्यैत-दूचे, 'का न्यूनता मयि[2] ? ।
यदित्थमसकृन्मां त्वं, निन्दसि श्वश्रु ! साम्प्रतम्[3] ॥३०१॥

जगत्त्रयललामोऽसौ, तव पुत्रो महीश्वरः ।
पतिर्मम, न यस्याऽस्ति, गुणैरन्यः समो भुवि' ॥३०२॥

'गुणावलि ! न ते स्वामी, गणनीयोऽस्ति सज्जनैः ।
अदृष्टगुणिवर्या त्व-मतः प्रलपसीति माम् ॥३०३॥

नहि व्यक्षो[4] विजानाति, [5]जगद्रूपमनुत्तमम् ।
समुद्रस्य तरङ्गं हि, वेत्ति किं कूपदर्दुरः[6]' ॥३०४॥

इति श्वश्रूवचः श्रुत्वा, पुनरूचे गुणावली ।
'नो वदैवं भवेदन्यः, कोऽत्र रूपाधिको भुवि ? ॥३०५॥

---

१. 'त्वां वचनेनैव' इति पाठा० ॥ २. 'मम कथं मतिः' इति पाठा० ॥ ३. 'अज्ञात्वोच्यते सदसद्विचाररहिता त्वया' इति पाठा० ॥ ४. 'व्यक्षी' इति पाठा० ॥ ५. 'रते' इति पाठा० ॥ ६. इतोऽग्रे- 'वन्यो न हि विजानाति, नागरस्य सुखं तथा। न निम्बरसविद् वेत्ति, रसालस्य रसालताम् ॥१॥ यो न भृङ्गारमैक्षिष्ट, स वाञ्छति कमण्डलुम् । काकवाक् तस्य मधुरा, यश्चाऽश्रुतपिकस्वरः ॥२॥ तैलकारस्य वृषभो, हलं वहति किं क्वचित् ? । मत्कुणः किं विजानाति, शुभाशुभविचारणाम् ॥३॥ सुन्दरः कोऽपि भातीदृग्, यस्य रूपे विलोकिते । कामदेवाश्विनीसूनु-प्रमुखा अप्यकिञ्चनाः ॥४॥' इति निष्कासिताः श्लोकाः दृश्यन्ते ॥

सन्त्यन्ये[1] जगत्यत्र, जगदाह्लादिनः परम् ।
चन्द्र एवाऽद्वितीयोऽस्ति, चन्द्रशेखरभूषणः ॥३०६॥
वने मृगा अनेकेऽपि, भवन्ति तृणभक्षकाः ।
किन्तु [2]पुष्कलकस्तत्र, जायते कोऽपि सन्मृगः ॥३०७॥
चन्द्रश्चन्द्र इवाऽऽभाती-तरेभूपा नखा इव ।
तस्य पादसरोजस्य, मन्येऽहं जननि ! क्षितौ[3] ॥३०८॥
पुष्पितः फलितो यत्र, कल्पवृक्षः प्रशस्यते ।
एरण्डभूरुहस्तत्र, न कैश्चित् स्तूयते जनैः ॥३०९॥
तवाऽऽत्मजसमो मात-र्नास्ति नास्ति जगत्त्रये ।
स स्वामी मम तेनाऽहं, धन्यं मन्ये निजं जनुः[4] ॥३१०॥
गुणावल्या वचः श्रुत्वा, ततो वीरमती जगौ ।
'सत्यं चन्द्रोऽतिरम्योऽस्ति, तथाऽपि शृणु मद्वचः ॥३११॥
पृथ्वीयं बहुरत्नाऽस्ति, तस्माच्चन्द्रादपि वधु[5] !
गुणवान् रूपवान् धीमान्, विद्यते जगतीतले ॥३१२॥
अनालोकितपृथ्वीका, त्वमेवं प्रब्रवीषि हि ।
अद्रक्ष्यः पृथिवीं त्वं चेत्, तदा नैवमवक्ष्यथाः ॥३१३॥
आभापुरीं विलोक्यैव, त्वं जाताऽसि विवेकिनी ।
अयं रम्यो न रम्योऽसा-विति मिथ्यावचोग्रहा ॥३१४॥
जन्मनस्तव वैफल्य-मित्यहं वच्मि भामिनि ! ।
क्रोधं मा कुरु यत्नं च, चर कौतुकदर्शने ॥३१५॥

---

१. 'अन्ये सन्ति' इति पाठा० ॥ २. 'गन्धमृगः' इति टि० ॥ ३. इतोऽग्रे-'वैशाखनन्दनायन्ते, मातस्त्वत्सूनुसन्निधौ । गजेन्द्रा यत्र मीयन्ते, खरस्तत्र नखायते ॥१॥ विद्रुमप्रतिमश्चन्द्रो-ऽन्ये राजानः पतङ्गवत् । नक्षत्राणां यथा चन्द्रस्तथाऽयं मम वल्लभः ॥२॥' इति निष्कासितौ श्लोकौ दृश्येते ॥
४. 'जन्म' इति टि० ॥ ५. 'प्रिये !' इति पाठा० ॥

त्वं योग्यसमये मादृक्-श्वश्रूं प्राप्याऽपि सुन्दरि ! ।
न कौतुकमलोकिष्ठा, इत्यतश्चिन्त्यते मया ।। ३१६ ।।

नवं तीर्थं नवो देशो, नवं राज्यं नवं वनम् ।
नवं सर्वं यया दृष्टं, तस्याः फलति जीवितम् ।। ३१७ ।।

वनस्थमालतीवत् ते व्यर्थं भामिनि ! जीवनम् ।
चित्रशोभान्[1] परान् देशा-नपश्यन्त्याः सुकौतुकान्[2] ।। ३१८ ।।

तानदृष्ट्वा[3] कुतः सौख्यं, तव राजसुते ! वधु ! ।
त्वत्तो वरं पक्षिणो यद्, विचरन्ति यथेप्सितम् ।। ३१९ ।।

गेहेशूराश्च ये लोका, ये च पण्डितमानिनः ।
ते सर्वे स्वगृहे पूज्या, न तु देशान्तरे क्वचित् ।। ३२० ।।

धनस्याऽऽहुर्यथा दानं, फलं सत्त्वस्य रक्षणम् ।
तथा देशाटनं प्राहु-र्जन्मनः शोभनं फलम्' ।। ३२१ ।।

इति श्वश्रूवचः श्रुत्वा, वधूः प्रोवाच 'हा कथम् ? ।
देशाटनमहो मातः !, क्रियते योषिता मया' ।। ३२२ ।।

या स्वेच्छाचारिणी बाला, कौतुकाद् भयवर्जिता ।
निरङ्कुशा भ्राम्यति सा, देशाद्देशान्तरं सदा ।। ३२३ ।।

अहं तु राजवनिता, बहिर्यास्यामि तत्कथम् ।
राजाऽधीनाऽस्मि स्वच्छन्दा, नैव तत्त्वं न वेत्सि किम्[4] ? ।। ३२४ ।।

यदि ते वचनेनाऽह-मस्मि देशाटनोत्सुका ।
तथापि तन्न घटते, विशेषेण हि मादृशाम् ।। ३२५ ।।

यद्यहं कपटं कृत्वा, प्रयायां तच्च मे प्रियः[5] ।
लक्षयेत् तर्हि न हि मे, शान्त्यै देशाटनं भवेत् ।। ३२६ ।।

---

१. 'मानुषत्वं' इति पाठा० ।। २. 'प्रगच्छति' इति पाठा० ।। ३. 'तान्यदृष्ट्वा' इति पाठा० ।। ४. 'नास्मि हे श्वश्रु ! सर्वदा' इति पाठा० ।। ५. 'यदि स प्रभुः' इति पाठा० ।।

खगश्च पवनश्चैव, यथेष्टं गच्छति क्वचित् ।
पतिं विना न नारीणां, देशाटनमिहोचितम्' ।। ३२७ ।।

तदा वीरमती प्रोचे, 'मुग्धे ! भीतेव लक्ष्यसे ।
यन्नारी विदधात्याशु, कुर्यात् तत्पुरुषः कथम् ? ।। ३२८ ।।

न कोऽपि नारीचारित्र्य-पारदृश्वा नरः क्वचित् ।
ये न नारीवशीभूता-स्ते दृश्यन्ते न कुत्रचित् ।। ३२९ ।।

नारी भीषणकान्तार-दुरारोह[1]गिरिव्रजम् ।
उल्लङ्घयति क्रोधान्ध-मप्यधीनीकरोत्यहिम्[2] ।। ३३० ।।

बिभेति सिंहादपि नो, पारमेति महोदधेः ।
वह्नेरपि शिखां धत्ते, किं न कुर्वन्ति योषितः ? ।। ३३१ ।।

प्रसीदति यदा नारी, तदा कल्पलतायते ।
अप्रसन्ना यदा सा स्याद्, विषवल्लीयते तदा ।। ३३२ ।।

पत्युर्बिभेति या नारी, तस्या जन्म निरर्थकम् ।
न शिक्षयति कोऽप्यस्या-श्चरित्रं निजमञ्जसा ।। ३३३ ।।

को बर्हिणश्चित्रयति, मरालस्य गतिं तथा ।
कः शिक्षयति सिंहस्य, कुम्भिकुम्भविभेदनम् ।। ३३४ ।।

अतः स्वभावतः प्राणी, गुणं प्राप्नोति निश्चितम् ।
मनागपि भयं पुत्रि !, कार्यं चन्द्रान्नहि त्वया ।। ३३५ ।।

आकाशगामिनी विद्या, [3]ममाऽस्ति वरसुन्दरि ! ।
रन्त्वा निशि तया प्रात-रागच्छेव[4] गृहं प्रति ।। ३३६ ।।

---

१. '-भयङ्कर-' इति पाठा० ।। २. इतोऽग्रे- 'मञ्जूषा कपटस्येयं, युवतिर्निजकौशलैः । वेगशीलापगापारं, यात्यसाव्ञ्जसा वधु ! ।।' इति निष्कासितः श्लोको दृश्यते ।। ३. 'मय्यस्ति' इति पाठा० ।। ४. 'तया निशि रमित्वाऽऽवामागच्छेव' इति पाठा० ।।

यद् रात्रौ रंस्यसे सोऽयं, तव भर्ता कथं वधु ! ।
लक्षयिष्यति तद् निद्रा-पराधीनोऽतिमुग्धवत् ॥ ३३७ ॥

यदि चन्द्रो विजानीया-न्नो तदाऽपि भयं तव ।
मशकोत्पाततोऽगारं, किं त्यजन्ति जनाः क्वचित् ?' ॥ ३३८ ॥

इति श्वश्रूवचः श्रुत्वा, हर्षमाप गुणावली ।
दुष्टसङ्गेन लोकानां, न दोषो जायते किमु ? ॥ ३३९ ॥

'तव विद्याप्रभावेण, मां राजाऽपि न लक्षयेत्[१]' ।
इति निश्चित्य 'हे श्वश्रु !, त्वदधीनाऽस्मि साम्प्रतम् ॥ ३४० ॥

परन्तु मातर्मे लज्जा, तव हस्तेऽधुना किल ।
तदेतदनुसन्धेहि, यथोक्तं ते करोम्यहम्[२]' ॥ ३४१ ॥

वशीभूतेयमित्येवं, ज्ञात्वा वीरमती जगौ[३] ।
'जगत्स्वापकरी विद्या, ममाऽस्ति शुभदर्शने ! ॥ ३४२ ॥

तयाऽहं नगरं सर्वं, [४]शववत् स्वापये चिरम् ।
एको राजा न मे चिन्ता-हेतुः स्यादिति निश्चितम् ॥ ३४३ ॥

दृश्यं कौतूहलं ते चेत्, तदा शृणु पुरादतः ।
अष्टादशशतक्रोश-पर्यन्ते विमलापुरी ॥ ३४४ ॥

मकरध्वजनामाऽत्र, मकरध्वजरूपवान् ।
राजाऽस्ति सर्वभूपाल-नमस्कृतपदद्वयः ॥ ३४५ ॥

---

१. 'भोत्स्यते' इति पाठा० ॥ २. 'दर्शयस्व विचित्राणि, कौतुकानि स्वविद्यया (दृश्यानि निजविद्यया)' इति पाठा० ॥, इतोऽग्रे- 'विद्याबलेन तनयं, वशीकृत्य प्रवर्त्यताम् । या नरी नृत्यते नारी, तस्या लज्जा कुतो भवेत्' ॥ इति निष्कासितः श्लोको दृश्यते ॥ ३. 'चिन्तयित्वाऽवदत् ततः' इति पाठा० ॥ ४. 'मृत-' इति पाठा० ॥

तस्य लक्ष्मीरिव गुणैः, कन्याऽस्ति प्रेमलाभिधा ।
यां विधिः स्नेहतो नूनं, रचयामास कौशलात् ।। ३४६ ।।

श्रीसिंहरथनामाऽस्ति, सिंहले पृथिवीपतिः ।
कनकध्वजनामाऽस्य, पुत्रस्तां परिणेष्यति ।। ३४७ ।।

अस्यां रात्रौ यदि भवेद्, दिदृक्षा तव सुन्दरि ! ।
तदाऽहं दर्शयेयं त्वां, तत्पाणिग्रहणोत्सवम्' ।। ३४८ ।।

इति श्वश्रूवचः श्रुत्वा, हर्षमाप गुणावली ।
'भाग्यतस्त्वादृशी श्वश्रू-र्मया प्राप्ताऽधुना खलु ।। ३४९ ।।

परं कथं दूरमितो, गम्येत रात्रिमात्रतः ? ।
देवगम्यं पदं यच्च, गच्छेत् तन्मानुषी कथम् ?' ।। ३५० ।।

'अयि ! दूरमिति श्रुत्वा, विस्मिताऽसि कथं पुनः ? ।
लक्षयोजनमप्येक-रात्रितो गन्तुमुत्सहे' ।। ३५१ ।।

इति श्रुत्वा प्रशस्याऽसौ, श्वश्रूं भूरि गुणावली ।
तया चमत्कृता प्रोचे, 'शृणु मातरिदं वचः ।। ३५२ ।।

सभेयं तव पुत्रस्य, यावत् सन्ध्यां प्रवर्तते ।
कथङ्कारं त्वया तस्याः, कर्तुं शक्यं विसर्जनम् ? ।। ३५३ ।।

[1]रात्रेर्यामे गते पुत्रस्तवा-ऽऽयास्यति मेऽन्तिकम् ।
ततो यामद्वयं हास्य-निद्राद्यैर्गमयिष्यति[2] ।। ३५४ ।।

पश्चाद् यामावशेषायां, रजन्यां वल्लभो मम ।
जागर्त्यतो न मे मात-रवकाशः कथञ्चन' ।। ३५५ ।।

तन्निशम्याऽऽह 'रे मुग्धे !, तवाऽद्य पतिरन्तिकम् ।
आगच्छेदतिशीघ्रं तं, सन्तोष्य निजकौशलैः ।। ३५६ ।।

---

१. 'अद्य-' इति पाठा० ।। २. '-निद्रादिना प्रयास्यति ('गमिष्यति', 'व्यतिष्यति' इति च पाठा०)' इति पाठा० ।।

स्वापयेः कूटनिपुणा[१]', प्रबोध्य स्ववधूमिति[२] ।
अगच्छद् भवनं स्वीयं, श्रीमद्वीरमती ततः ।। ३५७ ।। (युग्मम्)

गुणावली स्वमनसि, चिन्तयामास चेतसि[३] ।
'श्वश्रूर्ममाऽतिकुशला, तद्वचो न च सम्भवि[४] ।। ३५८ ।।

आयाति[५] यदि मे स्वामी, शीघ्रमद्य[६] गृहं प्रति ।
तदा तस्या वचः सत्यं, मन्येयाऽहं न चाऽन्यथा' ।। ३५९ ।।

अथ वीरमती विद्यां, सिषाधयिषुरात्मनः ।
सन्ध्याकाले समारेभे, जपहोमादिकं गृहे ।। ३६० ।।

तत्पुरो देवताऽऽगत्यो-वाच 'किं तेऽस्त्यभीप्सितम् ।
येन स्मृताऽस्मि तत्कार्यं, ब्रूहि शीघ्रं करोम्यहम्[७]' ।। ३६१ ।।

सोचे'ऽद्य[८] दिवसे राजा, सभां त्यक्त्वा दिने गृहम् ।
समागच्छेत् तथा कार्यं, न तेऽसाध्यं किमप्यहो !' ।। ३६२ ।।

देवतोवाच 'वनिते !, कर्मैतत्सुकरं नहि[९] ।
तथाऽपि तत्करिष्यामि, साम्प्रतं ते वशंवदा' ।। ३६३ ।।

इतोऽत्र समये काल-घटाजालभयङ्करः ।
मेघः प्रादुर्बभूवाऽथ, केकिकेकासमन्वितः ।। ३६४ ।।

खलानां धिषणेव, द्यौस्तिमिरच्छन्नतामगात् ।
कामदेवस्य खड्गस्य, प्रभेव तडिदाबभौ ।। ३६५ ।।

पथिकानां तर्जनेव, हृदयास्वास्थ्यकारिणी ।
घननिर्घोषणा सद्यः, प्रससार दिगङ्गणे ।। ३६६ ।।

---

१. '-श्चतुरा चेत्थं' इति पाठा० ।। २. '-मसौ' इति पाठा० ।। ३. 'तद्वचः' इति पाठा० ।। ४. 'तथाऽपि न हि तद्धितम्' इति पाठा० ।। ५. 'तथाऽपि' इति पाठा० ।। ६. 'शीघ्रमायाद्' इति पाठा० ।। ७. 'मौनं विसर्जय' इति पाठा० ।।, इतोऽग्रे- 'ततो वीरमती प्रोचे, देवि ! चन्द्रः सुतो मम । यथा मद्वचनं कुर्यात्, तथैतर्हि विधीयताम् ।।' इति निष्कासितः श्लोको दृश्यते ।। ८. 'यथाऽद्य' इति पाठा ।। ९. 'न ते कार्यं दुरासदम्' इति पाठा० ।।

बलाका समयं ज्ञात्वोत्पपाताऽम्बरमण्डले ।
अविच्छिन्नो जलासारः, पपात धरणीतले ॥ ३६७ ॥

घनाघनस्य समय-मित्थं कृत्वा च देवता ।
विज्ञाप्य राजजननीं, स्वकीयं धाम प्रास्थित ॥ ३६८ ॥

घनागममथाऽऽलोक्य, मन्मथोद्योतकारकम् ।
सभां विसृज्य नृपति-र्गुणावल्या गृहं ययौ ॥ ३६९ ॥

गुणावली दिने भूप-मागतं प्रसमीक्ष्य सा ।
विस्मिता वचनं तस्याः, सत्यं मेने विलासिनी ॥ ३७० ॥

बद्धाञ्जलिः प्रियतम-मुवाच 'दिवसे कथम् ? ।
समागतोऽसि, वैलक्ष्यं, लक्ष्यते ते कथं प्रिय !' ॥ ३७१ ॥

इति तद्वचनं श्रुत्वा, राजोवाच 'शृणु प्रिये[1] ! ।
अकालवारिदो वायुः, शीतलश्च समागतः ॥ ३७२ ॥

तेन कोमलमङ्गं मे, कम्पतेऽश्वत्थपत्रवत्[2]' ।
इति तद्वचनाद् राज्ञी, शय्यां स्तीर्त्वा यथासुखम् ॥ ३७३ ॥

प्रेम्णा तं स्वापयामास, कस्तूर्यादिचिकित्सितम् ।
अङ्गे नारायणाख्येन, तैलेनाऽभ्यञ्जयश्च सा[3] ॥ ३७४ ॥ (युग्मम्)

गुग्गुलादिकधूपस्य, धूमं दत्त्वा यथाविधि ।
शीतभीतिं नृपस्याऽसौ, सद्यः शान्तिमुपानयत् ॥ ३७५ ॥

अथ सुप्तं नृपं वीक्ष्य, चतुरा सा गुणावली ।
संवाहनं करोति स्म, पादयोस्तस्य रागतः[4] ॥ ३७६ ॥

---

१. 'प्रभो !' इति पाठा० ॥ २. 'कम्पते कदली यथा' इति पाठा० ॥ ३. '-ञ्जयत् पतिम्' इति पाठा० ॥ ४. इतोऽग्रे- 'क्षणे क्षणे प्रबोधाय, तस्याऽयतत साऽङ्गना ॥' इति निष्कासितः पाठो दृश्यते ॥

इतः सन्ध्या समागच्छद्, रागरक्तेव तत्क्षणे ।
कार्यान्तरासक्तमना-स्ततः साऽभूत् ससम्भ्रमा ।। ३७७ ।।

इति तां चञ्चलां दृष्ट्वा, विस्मितोऽचिन्तयन्नृपः[1] ।
सुशीलेयं कुतो दुष्ट-शीलावच्चेष्टतेऽधुना[2] ।। ३७८ ।।

तन्नूनं दुष्टशीलायाः, कृतसङ्गाऽनुमीयते ।
जन्तोर्गुणा वा दोषा वा, सङ्गतन्त्राः प्रकीर्तिताः ।। ३७९ ।।

मां पतिं समवाप्याऽपि, केन सार्धमियं पुनः ।
प्रीतिबन्धं चकाराऽऽशु, सङ्गदोषेण मत्प्रिया ।। ३८० ।।

इति सो मुखमाच्छाद्य, वस्त्रेण चतुराग्रणीः ।
व्याजनिद्रामुपाश्रित्य, ददर्शाऽस्य विचेष्टितम्[3] ।। ३८१ ।।

गाढान्धसमये राज्ञी, सुप्तं ज्ञात्वा महीपतिम् ।
मत्तमातङ्गगमना-ऽगच्छद् बहिरथ द्रुतम् ।। ३८२ ।।

राजाऽपि शितमादाय, खड्गं तामनुजग्मिवान् ।
बुबुधे सा न तमसि, मेघेन द्विगुणीकृते ।। ३८३ ।।

वधूमार्गं विचिन्वन्ती, वीरमत्यपि तत्क्षणे ।
समागतां तामलोक्य सदकार्षीद् गुणावलीम्[4] ।। ३८४ ।।

पश्चान्मन्त्रस्य माहात्म्यं, जगाद घनकारणम् ।
श्रुत्वा सा कथयाञ्चक्रे, 'मातस्त्वद्वचनादहम् ।। ३८५ ।।

सुप्तं प्रियतमं त्यक्त्वा, समायाताऽस्मि साम्प्रतम् ।
यदाज्ञापयसीदानीं, तत्करिष्यामि निश्चितम्' ।। ३८६ ।। युग्मम्

---

१. 'राजा विस्मयमागतः । इतोऽग्रे- 'मुखमाच्छाद्य वस्त्रेण, तस्याः कृत्यमलक्षयत्' इति दृश्यते ।। २. 'सुशीलेयं यतो दुष्ट-शीलावद् यततेऽधुना' इति पाठा० ।। ३. 'परन्तु चतुरस्याऽग्रे, चातुर्यं प्रकटं विना । कथं तिष्ठेदिति क्ष्मापो, ददर्शाऽस्या विचेष्टितम् ।।' इति पाठा० ।। ४. 'भृशं वधूम्' इति पाठा० ।।

द्वारदेशस्थितश्चन्द्रो, निभृतं तद्रहोवचः ।
सर्वमाकर्णयामास, न केनाऽप्युपलक्षितः ।। ३८७ ।।
ततो वीरमती प्रोचे, 'गच्छाऽऽराममितो वधु ! ।
करवीरस्य शाखां त्वं, गृहीत्वाऽऽगच्छ मत्पुरः ।। ३८८ ।।
तां मन्त्रयित्वा ते दास्ये, यया त्रिस्ताडितस्तव ।
पतिर्निद्रापराधीनः, स्वप्यादागमनावधि' ।। ३८९ ।।
इति श्रुत्वा ययौ शीघ्र-मारामं रात्रिकृद्भयम् ।
बभूव नैव नारीणां, किमकृत्यं कुयोगतः ? ।। ३९० ।।
राजा तामबलां मत्वा-ऽनुगतो[१] वाटिकां प्रति ।
प्रेमा (-म) प्रायः प्रियारक्षा-विधौ प्रेरयते बलात्[२] ।। ३९१ ।।
यावच्छाखां गृहीत्वा सा, श्वश्रूसन्निधिमाययौ ।
तावद् राजा समागच्छत्, स्वपर्यङ्के न लक्षितः ।। ३९२ ।।
वस्त्रैर्नरं विधायाऽथ, शय्यायां तमसूषुपत् ।
आच्छाद्य वसनेनाऽऽशु, गुप्तः स्वयमुपाविशत् ।। ३९३ ।।
इतो वीरमतीदत्तां, शाखामेषाऽभिमन्त्रिताम् ।
आदाय तरसा पत्युः, शयनागारमभ्यगात् ।। ३९४ ।।
संभ्रमात् तमजानत्य-ताडयत् कृत्रिमं नरम् ।
ततस्तत्क्षणमेवाऽसौ, कृतार्था न्यवृतद् द्रुतम् ।। ३९५ ।।
राज्ञा सर्वं समालोक्य, चिन्तितं 'हा ! कथं मम ।
माता निजवधूमेवं, शिक्षयत्यतिगर्हितम्' ।। ३९६ ।।
इत्यालोच्य पुनस्तत्रा-ऽऽजगामाऽसिसहायवान् ।
न धीरा भयहेतौ हि, बिभ्यति क्वचिदण्वपि ।। ३९७ ।।

---

१. '-ऽन्वगाद्' इति पाठा० ।। २. 'राजा तन्न विजानाति, सबला सा तदाऽभवत्' इति पाठा० ।।

निवेद्य चरितं स्वीयं, जगादाऽथ गुणावली ।
'जाग्रत्सु पौरलोकेषु, कथं यास्यामि निर्भयम् ? ।।३९८ ।।

यदि ज्ञात्वेति वृत्तान्तं, राज्ञे कोऽपि निवेदयेत् ।
भवेत् तदा गतिः का मे ?, पूर्वमेतद् विचारय' ।।३९९ ।।

श्रुत्वोचे सा 'त्वया चिन्ता, न कार्याऽहं करोमि तत्।
येन निद्रावशीभूता, जनाः स्थास्यन्ति नागराः ।।४०० ।।

यदि कश्चिदकस्मान्मे, गृहद्वारं समाव्रजेत् ।
तदा तस्य प्रभावोऽत्र, न स्फुरेद् वरसुन्दरि !' ।।४०१ ।।

इति श्रुत्वा नरेन्द्रोऽसौ, तद्द्वारे निभृतं स्थितः ।
स्थापयित्वा वधूं सा च, गृहान्तः समुपाविशत् ।।४०२ ।।

विधाय गर्दभीरूपं, बहिर्गत्वा खरस्वरम् ।
उच्चैश्चकार तेनाऽऽसन्, निद्रोन्मत्ताः समे जनाः ।।४०३ ।।

इति निद्रापराधीनान्, जनान् कृत्वा निजं वपुः ।
विधायाऽसौ समागच्छद्, गुणावल्याः पुरः पुनः ।।४०४ ।।

'पुत्रि ! मद्विद्यया सर्वे, पौरलोका मृता इव ।
चल त्वं चन्दनोद्याने, चूतवृक्षस्य सन्निधौ ।।४०५ ।।

मन्त्रप्रसादाद् वृक्षः स, निमेषान्तरमात्रतः ।
प्रापयिष्यत्यतो देशाद्, विमलानगरीं वधु !' ।।४०६ ।।

राजाऽप्यपरमातुस्त-दाकर्ण्य वचनं तदा ।
खड्गमादाय वृक्षस्य, कोटरे समुपाविशत् ।।४०७ ।।

अथ द्वे ते क्षणादेव[१], तत्राऽऽजग्मतुरञ्जसा ।
अनालोक्यैव राजानं, वृक्षमूचे कृताञ्जलिः ।।४०८ ।।

---

१. 'अथ क्षणादेव ते द्वे' इति पाठा० ।।

करवीरस्य शाखाभि-स्त्रिः प्रहारं विधाय सा ।
'विमलानगरीं शीघ्रं, दर्शयस्व वरद्रुम !' ।।४०९ ।। युग्मम्

इति वीरमतीवाक्यं, श्रुत्वा वृक्षस्तदैव सः ।
विमान इव देवानामुत्पपात नभोऽङ्गणे ।।४१० ।।

वृक्षस्य कोटरे राजा, लीनः सर्वं व्यलोकत ।
यथा शरीरे संछन्नो, जीवः पश्यति सर्वतः ।।४११ ।।

स चूतवृक्षो मनसो-ऽप्यतिवेगोऽभिमन्त्रितः ।
नभोदेशे चलन् क्षीर-समुद्रे पोतवद्[1] बभौ ।।४१२ ।।

अथ वीरमती प्रोचे, "वधु ! पश्य स्वरापगाम्[2] ।
या पूतनीरसम्पूर्णा, तीर्थभूता विराजते[3] ।।४१३ ।।

पापकन्दसमुच्छेदे, या खनित्रायतेऽनिशम् ।
स्नानेनाऽत्र यतः पापा, अपि यान्ति पवित्रताम्[4] ।।४१४ ।।

नूनं स्वर्गं प्रयात्याशु, निर्धूयाऽखिलपातकम् ।
सेयं नीलजला भाति, कालिन्दी सरिदुत्तमा ।।४१५ ।।

केशपाशीव या नूनं, पृथिव्याः सम्प्रकाशते ।
अयमष्टापदाख्योऽस्ति, पर्वतः सिद्धिदायकः ।।४१६ ।।

स्वशक्त्यारूढभव्यानां, तत्र श्रीजिनमन्दिरम् ।
भरतश्चक्रवर्ती यत्, पञ्चरत्नैरकारयत् ।।४१७ ।।

तस्य दक्षिणभागेऽस्ति, सम्भवादिचतुष्टयम् ।
सुपार्श्वादिजिनेन्द्राश्चा-ऽष्टौ प्रतीच्यां बभासिरे ।।४१८ ।।

---

१. 'नौकावत्' इति टि० ।।, 'प्लववद्' इति पाठा० ।। २. 'पुरीमिमाम्' इति पाठा० ।। ३. 'अलकेयं कुबेरस्य, भातीयं सर्वसम्पदा ।।' इति निष्कासितः पाठो दृश्यते ।। ४. 'पापकन्दपरिच्छेदे, खड्गधारेव राजते । यत्र स्नानेन पापीया-नपि याति पवित्रताम् (यत्र स्नानेन पापिष्ठोऽप्यति-सञ्चितपुण्यवत् ।। - पाठा०) ।।' इति पाठा० ।।

धर्मनाथादयस्तत्र, दश तीर्थकरा बभुः ।
उत्तरस्यां प्राचि वत्से !, वृषभोऽजितसङ्गतः ॥४१९॥
विधास्यत्यत्र लङ्केशो, जिनकर्मार्जनं पुनः ।
जाह्नवी वलयाभाऽत्र, विभाति तटिनीवरा[१] ॥४२०॥
एवं समेतशिखरं, दर्शयित्वा न्यवेदयत् ।
प्रणामं भक्तितः पुत्रि !, कुरुष्वेप्सितसिद्धये ॥४२१॥
आदिनाथो वासुपूज्यो, नेमि-वीरौ च तीर्थपौ ।
विहायेमान् जिनाः सर्वे-ऽत्र यातारः परं पदम् ॥४२२॥
सप्तदश जिनास्तेषु, यावदद्य महाशयाः ।
मोक्षं प्रापुरिहैव त्रि-जगन्नाथास्त्रयः[२] पुनः ॥४२३॥
पुनरावर्तरहितं, मोक्षं प्राप्स्यन्ति सुन्दरि ! ।
को नो पुनाति स्वात्मानं, दृष्ट्वेमं पर्वताग्रिमम्[३] ॥४२४॥
अयं वैभारनामाऽस्ति, पर्वतः सर्वपावनः ।
अर्बुदाचल एवाऽसौ, भक्त्या तं प्रणमाऽधुना ॥४२५॥
अयं सिद्धाचलस्तीर्थात्, सर्वस्माच्च महत्तरः ।
यस्य स्मरणमात्रेण, पापं दूरं पलायते ॥४२६॥
य एतं वीक्षते प्राणी, तस्य कीतिर्जगत्त्रये ।
न तस्य पुनरावृत्तिः, कदाऽपि खलु जायते ॥४२७॥
अनेके पुण्यचरिता, ज्ञानं सम्प्राप्य केवलम् ।
मुक्तिभाजो बभुवुस्त, इहैव वरवर्णिनि ! ॥४२८॥
प्रथमं भरतो भूपो[४], दण्डवीर्यो द्वितीयकम् ।
ईशानेन्द्रस्तृतीयं च, समुद्धारमकारयत् ॥४२९॥

---

१. 'सरिदुत्तमा' इति पाठा० ॥ २. 'मुनिसुव्रत-नमि-पार्श्वनाथा एते त्रयः' इत्यर्थः' इति टि० ॥ ३. 'इत्थं वैभारशैलोऽपि, समागाद् दृक्पथं तयोः' इति पाठा० ॥ ४. 'भरतः प्रथमोद्धारं' इति पाठा० ॥

चतुर्थं च महेन्द्रेश, उद्धारमथ पञ्चमम् ।
ब्रह्मेन्द्रो भुवनाधीशः, षष्ठोद्धारमकल्पयत् ॥४३० ॥
सप्तमं सगरो राजा, भूषट्खण्डाधिनायकः ।
उद्धारमष्टमं चक्रे, व्यन्तराधिपतिस्तथा ॥४३१ ॥
उद्धारं नवमं चन्द्र-यशा नाम महीपतिः ।
उद्धारं दशमं चक्रे, चक्रायुधनृपः पुरा[१] ॥४३२ ॥
एते महान्त उद्धारा, जाताः शत्रुञ्जये दश ।
इतः परेऽपि बहव, उद्धारा नैकधाऽभवन् ॥ ४३३ ॥
समादिककृतोद्धारा, भविष्यन्त्यत्र भाविनि ! ।
क्लिष्टकर्मक्षयेणैष, भव्यानां वाञ्छितप्रदः ॥४३४ ॥
मनोवाक्कायिकैर्योगैः, प्रणामं नियतं कुरु ।
तीर्थोऽयं भवपाथोधि-समुत्तारणसाधनम्[२] ॥४३५ ॥
अयं श्रीगिरि(र)नाराख्य-स्तीर्थः परमपुण्यदः ।
राजीमत्याः पतिः श्रीमान्, नेमिनाथ इहैव हि ॥४३६ ॥
भविता मुक्तिवनिता-परिणेता शुचिस्मिते ! ।
पुण्डरीकसमोऽयं श्री-पुण्डरीकगिरिः किल ॥४३७ ॥
ऐरावतगजेन्द्रस्य, संसक्तं चरणं ततः ।
कुण्डं गजपदं जातं, कुमुदादिमनोहरम् ॥४३८ ॥
द्विलक्षयोजनायामः, समुद्रो यत्रदीपतिः ।
वलयाकारतः पृथ्वीं, परिवृत्याऽवतिष्ठते" ॥४३९ ॥
इत्थं वीरमती हस्त-संज्ञया तां गुणावलीम् ।
सर्वं देशं वनं शैलं, सरोऽदर्शयदम्बरात् ॥४४० ॥

---

१. 'उद्धारश्चन्द्रयशसो, नवमश्च गुणावलि ! । चक्रायुधस्य सञ्जात, उद्धारो दशमः शुभः ॥' इति पाठा० ॥ २. '-रैकसाधनम्' इति पाठा० ॥

अथ द्वयोस्तयोरित्थं, गच्छन्त्योर्व्योमवर्त्मना ।
विमलानगरीपार्श्वे, समागात् तरुरञ्जसा[१] ।।४४१ ।।
राज्ञी गुणावली तत्र, रत्नपल्लवसञ्चितम् ।
प्रफुल्लपुष्पशोभाढ्यं, वनमैक्षत शोभनम् ।।४४२ ।।
सुषमामवलोक्यैव, यस्येन्द्रस्यापि नन्दनम् ।
लज्जापराधीनतया, परलोकमशिश्रियत् ।।४४३ ।।
केतकी चम्पकाशोक-जातीशेफालिकादयः ।
मल्लिकाकरवीराद्याः, पुष्पद्रुमलता बभुः ।।४४४ ।।
तारका धरिणीपृष्ठे-ऽवतीर्णा इव रेजिरे ।
सुगन्धभारशिथिलः, सरीसर्ति समीरणः ।।४४५ ।।
चञ्चच्चन्द्रकरस्पर्श-समुज्ज्वलतरः शुचिः ।
कमलामोदसंसर्गी, वरीवर्ति जलाशयः ।।४४६ ।।
मन्ये नभश्चन्द्रमसा, कृतस्पर्धो महीतले ।
जलविम्बच्छलाद् हास्यं, चरीकर्ति परः शशी ।।४४७ ।।
विमलानगरीमित्थं, विलोक्य क्षितिपाङ्गना ।
कैलासो रोहणोऽयं वा, वरीवर्तीत्यशङ्कत ।।४४८ ।।
अनेकरत्नरचिता, आढ्यलोकाश्रिता अमी ।
प्रासादा अमरावत्या, जरीहर्ति परां द्युतिम् ।।४४९ ।।
मन्दिरस्थाः प्रदीपास्ते, चन्द्रं द्रष्टुं पुरस्य हि ।
नेत्राणीव विभासन्ते, हर्षोत्कर्षवशंवदाः ।।४५० ।।
'मातः ! केयं पुरी'त्येवं, पृच्छति स्म गुणावली ।
ततो वीरमती प्रोचे, 'सैवेयं विमलापुरी' ।।४५१ ।।

---

१. 'यावद् वार्तां प्रकुरुत, उभे ते कौतुकान्विते । विमलानगरीपार्श्वे, तावदा-या[गा]त् स वृक्षराट् ।।' इति पाठा० ।।

यावतेति ब्रुवाणे ते, अभूतां भुवि तावता ।
चूतवृक्षः समागत्या-धितष्ठौ क्वचिदन्तरम् ।।४५२ ।।

उभे वृक्षात् समुत्तीर्य, चेलतुर्नगरीं प्रति ।
राजाऽप्यलक्षितस्ताभ्यां, पृष्ठतोऽन्वसरत् तयोः ।।४५३ ।।

तादृशीं जननीविद्यां, विलोक्य धरणीपतिः ।
भयं लेभे न 'धीराणां, जायते भीः कुतोऽपि हि' ।।४५४ ।।

यथा यथा जग्मतुस्ते, राजाऽन्वातीत्[1] तथा तथा ।
श्वश्रूर्वधूकरं धृत्वा, विमलापुरमाविशत् ।।४५५ ।।

विचित्रशोभां पश्यन्त्यौ, पाणिग्रहणमण्डपम् ।
आसेदतुर्नृत्यगीत-वादित्रादिविभूषितम् ।।४५६ ।।

अनेकमङ्गलैः शश्वद्, वर्धमानं विलोक्य ते ।
आनन्दमग्नहृदये, श्वश्रूवध्वौ बभूवतुः ।।४५७ ।।

इतो राजाऽपि नगरी-शोभामालोकयन् शनैः ।
दूरतो दुष्प्रवेशं तत्पुरद्वारं व्यलोकत[2] ।।४५८ ।।

(स्रग्धरावृत्तम्)

इति बहुविधशोभा-ऽऽलोकनालोलचित्तो
नृपतिवरकिरीट-स्पृष्टपादारविन्दः ।
युवतिजनविरुद्धं मातृ-वध्वोः स वृत्तं
समनुभवितुकाम-स्तत्पुरद्वारमाप[3] ।।४५९ ।।

## इति श्रीकस्तूरसूरिविरचिते श्रीचन्द्रचरित्रे
## प्रथम सर्गः समाप्तः

---

१. 'राजाऽप्याजीत्' इति पाठा० ।। २. 'निजाभीष्टं पूरयितुं, पुरद्वारमुपागमत्' इति पाठा० ।। ३. '-पुरान्तर्विवेश' इति पाठा० ।।

शासनसम्राट्पूज्याचार्यश्रीविजयनेमिसूरीश्वरपट्टधर-
पूज्याचार्यश्रीविजयविज्ञानसूरीश्वरपट्टधरप्राकृतविशारद-
पूज्याचार्यश्रीविजयश्रीकस्तूरसूरिप्रणीते

# चन्द्रचरित्रे द्वितीयः सर्गः

अथ चन्द्रमहीपालो, विमलायाः पुरः पुरः ।
तत्रस्थैः सेवकैः कैश्चिद्[१], निरैक्षिच्छन्नवेषधृक् ॥ १ ॥

ते सेवकास्तु[२] विनयैस्तं प्रणेमुः पुनः पुनः ।
'अहो चन्द्रमहीपाल !, विजयस्व गुणाकर ! ॥ २ ॥

राजंस्तवाऽऽगमेनाऽद्या-ऽस्माकमाधिः क्षयं गतः ।
चिराद् द्वितीयेन्दुवत् त्वां, मार्गमाणा अभूम हि ॥ ३ ॥

कीर्त्युद्भासितदिक्चक्र !, चन्द्रराज ! चल प्रभो ! ।
सिंहलद्वीपभूपाल-सभां शीघ्रमलङ्कुरु' ॥ ४ ॥

तत्सेवकानां[३] वचनं, श्रुत्वा दध्यौ स चेतसि ।
'परचित्तज्ञवन्मां ही !!, कथङ्कारमिमे विदुः ॥ ५ ॥

नामग्राहं कथं चाऽत्र, मामी समबोधयन्' ।
इति चिन्तासमाक्रान्तः, प्रोवाच क्षितिनायकः ॥ ६ ॥

'हे सेवकाः[४] ! कथं यूय-मेकनाम्ना भ्रमं गताः ।
कश्चन्द्रराजश्चन्द्रस्तु, खे भात्यन्यः स कः क्षितौ ? ॥ ७ ॥

असम्भाव्यां कथं यूयं, घटनां कुरुथ स्फुटम् ।
मार्गं दत्त वयं यामो, निजकार्यस्य सिद्धये' ॥ ८ ॥

---

१. 'प्रथमद्वारपालैः स' इति पाठा० ॥ २. 'ते द्वारपाला' इति पाठा० ॥ ३. 'दौवारिकानां' इति पाठा० ॥ ४. 'दौवारिकाः' इति पाठा० ॥

ते निशम्य वचस्तस्य, जगदुस्तं नताः पुनः ।
'कथं वञ्चयसे राजंस्त्वं हि चन्द्रमहीपतिः ॥ ९ ॥

जाज्वल्यमानः सवितो-दीयमानः कुतः पुनः ।
आच्छादनीयो भविनां, सहस्त्रकिरणः क्षितौ ? ॥ १० ॥

कस्तूरिकाया आमोदो, न कथञ्चिज्जनैरपि ।
गोपाय्यते क्वापि राजंस्तथा रत्नाकरोऽथवा' ॥ ११ ॥

इत्युक्त्वा सेवकः कश्चित्, तं जग्राह कराम्बुजे ।
उवाच राजा 'हे भ्रात-र्मुञ्च मां पथिकं लघु ॥ १२ ॥

यूयं सुप्तोत्थिताः स्वप्ने, दृष्ट्वा तं चन्द्रभूपतिम् ।
मां मन्यमाना रुन्ध्वं यत्, तन्न सम्प्रति साम्प्रतम् ॥ १३ ॥

अनेके चन्द्रसदृशा, लोकाः सन्ति महीतले ।
कथं स्वनाम मतिमान्, गोपयिष्यति निष्फलम् ॥ १४ ॥

अकारणं किमर्थं मां, गृह्णासि शठ ! ते यदि ।
द्वारदेयं भवेद् ब्रूहि, दास्ये तेऽहं न संशयः ॥ १५ ॥

व्यर्थं कदर्थयसि मां, मम माताऽसहायिका ।
वने गतस्य मार्गं मे, नूनं मार्गयते भृशम्' ॥ १६ ॥

स सेवको[1]'ऽवदत् स्वामिन्नतिदूरे गृहं तव ।
इतोऽस्ति गोपयस्येवं, कथाङ्कारं निजं वपुः ॥ १७ ॥

त्वादृशा यदि वक्ष्यन्ति, मृषा वद कथं ततः ।
धरिष्यत्यचला भारं, मेघो वृष्टिं विधास्यति ॥ १८ ॥

त्वादृशानां महाराज !, सेवातो वेद्मि सर्वशः ।
यादृशं सेवते लोकस्तादृशं फलमश्नुते ॥ १९ ॥

---

१. 'प्रतीहारो-' इति पाठा० ॥

त्वया सह महाराज !, भर्तुर्मेऽस्ति प्रयोजनम् ।
अतो विज्ञापनां स्वामिन् !, गृहाण मम साम्प्रतम्' ।। २० ।।

राजा दध्यौ 'वीरमती, शृणुयाद् यदि मेऽभिधाम् ।
तदा कष्टं भवेत् तस्माद्, विवादो नहि युज्यते' ।। २१ ।।

इति सञ्चिन्त्य तद्वाक्य-मवधार्य चचाल सः ।
अनेकलोकरचित-नमस्कारपुरस्सरम् ।। २२ ।।

द्वितीयद्वारमागच्छत्, तत्राऽपि नियतैर्जनैः ।
'आगच्छ चन्द्रभूपाले'-त्यूचे नतिपुरस्सरम् ।। २३ ।।

'सततं तव मार्गस्य, मम भूपः प्रतीक्षकः ।
त्वयि स्वातीजले राजन् !, किमु नो चातकायते ? ।। २४।।

चक्रदर्शनतो यद्वत्, सिद्धिः स्याच्चक्रवर्तिनः ।
तद्वत् तवाऽऽगमेनैवा-ऽस्माकं कार्यं प्रसेत्स्यति' ।। २५ ।।

राजोवाच 'यथा शुक्तौ, रजतभ्रान्तिभागिनः ।
जिघृक्षवस्तथा चन्द्रं, मां बुद्ध्वेत्थं प्रभाषसे ।। २६ ।।

एकविद्यालयच्छात्रा, यूयं निःसंशयं मया ।
ज्ञायन्ते तव भूपालस्तवैव सदृशो भवेत् ? ।। २७ ।।

तव राज्ञो मया साकं, जातुचिन्नहि सङ्गतिः ।
न च कार्यं भवेद् यूयं, सर्वे धूर्ता न संशयः ।। २८ ।।

अविवेकस्य शिक्षेयं, प्राप्ता युष्माभिरीदृशी ।
जाने चन्द्रं भणित्वैवं, वञ्च्यन्ते निखिला जनाः' ।। २९ ।।

इति श्रुत्वाऽगदंस्तेऽपि, 'वयं सिंहलभूपतेः ।
मनोनुगाः सेवकाः स्मो-ऽस्मान् राजाऽशिक्षयद् यथा ।।३०।।

तथा त्वां भूप ! जानीमः, सत्यं वद ममाऽधुना[1] ।
आगतोऽसि तथैव त्वं, यथाऽस्मान् रहसि न्यवक्' ।। ३१ ।। युग्मम्
ततश्चन्द्रोऽवदत् 'त्वं हि, सङ्केतं प्रकटीकुरु' ।
तदाऽसौ सेवको बद्धा-ञ्जलिरेवं व्यजिज्ञपत् ।। ३२ ।।
'एकदा सिंहलेशो मां, रहस्येवमवोचत ।
हे दूत ! त्वं पूर्वराज-द्वारे तिष्ठ निराकुलः ।। ३३ ।।
यामे व्यतीते यामिन्या, आगच्छेतां हि ये स्त्रियौ ।
तत्पश्चात् पुरुषः कश्चि-दागमिष्यति निश्चितम् ।। ३४ ।।
चन्द्रं भणित्वा सत्कार्यः, स जनो नतिपूर्वकम् ।
मम पार्श्वं ततो नून-मानेतव्योऽञ्जसा त्वया ।। ३५ ।।
इति शासनमादाय, सावधानमवस्थितैः ।
दृष्टोऽस्यस्माभिरे[2]तर्हि ललनाद्वयपृष्ठगः(-तः) ।। ३६ ।।
इति त्वां चन्द्रनामान-माभानगरभूपतिम् ।
जानामि निजभूपाल-सङ्केताद् राजशेखर ! ।। ३७ ।।
इति ज्ञात्वाऽविलम्बेन, सिंहलस्य महीभुजः ।
आवासं चल भूपाल !, देवराजोपमस्य हि' ।। ३८ ।।
इत्थं सेवकसद्वाक्यै, राज्ञा मनसि चिन्तितम् ।
'अहो मातुर्भयं तादृग्, राज्ञोऽस्य च महाऽऽदरः ।। ३९ ।।
एकाकिना मयेदानीं, किं कर्तव्यं ? न सेवकैः ।
बुध्यते बोध्यमानैर्हि, प्राकृतैः प्राकृतैरिव ।। ४० ।।
अत एतैः समं नोच्चैः, क्षमं हि विचिकित्सनम्[3] ।
यथा व्यवहरेद् यश्च, तेन कार्यं तथैव हि' ।। ४१ ।।

---

१. 'तथैव हि' इति पाठा० ।। २. '-रेतस्मिल्ल-' इति पाठा० ।। ३. 'निराकरणम्' इति टि० ।।

इति निश्चित्य तान् राजा-ऽकथयद् 'भो यथा तव ।
कथयिष्यति भूपालो, विधास्येऽहं तथा खलु' ॥ ४२ ॥

अथ ते भूपतिं माना-दग्रेकृत्वा प्रहृष्टवत् ।
सर्वद्वारस्थिताः सर्वे, चेलुर्नृपतिपृष्ठतः ॥ ४३ ॥

द्वारे निधाय तं भूपं, निजभूपमजिज्ञपन् ।
'राजन् ! समागतश्चन्द्रो, द्वारि तिष्ठति साम्प्रतम्' ॥ ४४ ॥

इति दूतवचः श्रुत्वा, सिंहलेशो महोत्सवम् ।
कृत्वा स्वमन्दिरं तूर्ण-मानयच्चन्द्रभूपतिम् ॥ ४५ ॥

''वीरसेनमहीपाल-कुलपाथोजभास्कर ! ।
तवाऽऽगमेन भूपाल !, कृतार्थोऽस्मि पुनः पुनः ॥ ४६ ॥

तव संदर्शनायाऽहं, भृशमुत्कण्ठितोऽभवम् ।
तदद्य दैवयोगेन, लेभे मनसि चिन्तितम् ॥ ४७ ॥

यथा दूरस्थितः सूर्यो, बोधयत्यब्जमण्डलम् ।
तथा दूरस्थितोऽपि त्वं, हृत्कञ्जं[१] फुल्लयस्यदः ॥ ४८ ॥

क्व चन्द्रः ? क्व चकोरोऽसौ ?, क्व मेघः ? क्व च बर्हिणः ।
परन्तु प्रेमवशतः, सङ्गमो निश्चलस्तयोः ॥ ४९ ॥

सम्बन्धिदर्शनाच्चेतो, हृष्यत्येव सुनिश्चितम् ।
न तत्र महदाश्चर्यं, तदभावेऽद्भुतं हि तत्[२] ॥ ५० ॥

चन्द्रस्योदयतो वारि-राशेर्हर्षः प्रजायते ।
न विस्मयोऽत्र[३] भूयोऽपि, कुमुदिन्याः प्रकाशनात्'' ॥ ५१ ॥

---

१. 'हृत्पद्मम्' इति टि० ॥ २. 'न तत्र चित्रतश्चित्रं, तदभावेऽपि यद् भवेत्' इति पाठा० ॥ ३. 'उदधिसुतत्वाच्चन्द्रस्य' इति टि० ॥

इत्थं चन्द्रं प्रशस्याऽसौ, सिंहलद्वीपभूपतिः ।
प्रेम्णा सिंहासनस्याऽर्द्धे, समुपावेशयन्निजे ।। ५२ ।।

बह्वादरेण चन्द्रोऽपि, समध्यष्ठान्नृपासनम् ।
भाग्यवान् क्व न [1]सम्मान-माप्नोति तनुधारकः[2] ? ।। ५३ ।।

सिंहलाधिपतिश्चन्द्रं, कुशलं स्म प्रपृच्छति ।
'मम त्वं शेखरः किं वा, प्राणाधीशोऽसि भूपते ! ।। ५४ ।।

चातको यद्वदम्भोद-मब्जं यद्वच्च भास्करम्[3] ।
तथा त्वां नरनाथाऽहं, दिदृक्षुः सर्वदाऽभवम् ।। ५५ ।।

स्वेच्छयाऽऽगमनेना-ऽद्याऽनुग्रहीतुं हि मां प्रभो ! ।
अलङ्करोष्यमुं देशं, राजचक्रशिरोमणे ! ।। ५६ ।।

तव संदर्शनादद्य, महानन्देन मोहितः ।
नोपचारमहं जाने, तत्क्षमस्व महीपते ! ।। ५७ ।।

पुष्पपत्रादिकार्चाभि-र्यथा तुष्यन्ति देवताः ।
तथा मयि महाराज !, तुष्य सम्मानलेशतः[4] ।। ५८ ।।

हस्त्यश्वरथरत्नाना-माकरोऽसि यतस्ततः ।
तस्य विश्राणनं नैव, पर्याप्तं तव तुष्टये[5]' ।। ५९ ।।

---

१. 'संभोग-' इति पाठा० ।। २. इतोऽग्रे- 'सौभाग्यशालिनः पुंसः, सुलभः स पदे पदे । निधीनां दर्शनं तद्वच्छत्रुर्मित्रायते तथा ।।' इति श्लोको दृश्यते ।। ३. 'गौर्वत्सं यद्वदिच्छति' इति पाठा० ।। ४. 'अकिञ्चनौ हि पितरौ, केवलं प्रेमतः शिशुम् । संलालयत एवं मे, तुष्य सम्मानलेशतः' इति पाठा० ।। ५. 'विश्राण्य कोऽपि किं कुर्यान्नवाराधनमत्र ते ।।' इति पाठा० ।।, इतोऽग्रे- ''यदि मद्विषयं राजन्नायास्त्वं तर्हि ते निजम् । राज्यं वा नगरं वाऽपि, देशं दद्यामहं ध्रुवम् ।। वैदेशिको भवान् यद्वत्, तथैवाऽहमपि प्रभो ! । इति ज्ञात्वाऽखिलां राजंस्त्रुटिं मे क्षन्तुमर्हसि ।।'' इति निष्कासितौ श्लोकौ दृश्येते ।।

इत्थं विनयसम्पन्नं, सिंहलाधिपतेर्वचः ।
श्रुत्वा चन्द्रोऽवदद् दन्त-प्रभोद्द्योतितदिङ्मुखः ।। ६० ।।

'मयि चन्द्रभ्रमं कृत्वा, कथं सम्मानमीदृशम् ।
करोष्यहं कोऽपि राज-न्नस्मि वैदेशिको लघुः ।। ६१ ।।

प्राज्ञोऽसि त्वं कथं भ्रान्तिं, करोषि, वद, ते मया ।
सङ्गमः क्वाऽभवच्चन्द्रः, क्व च पूर्वदिशापतिः ।। ६२ ।।

अहं क्व क्षत्रियशिशुः, कदर्थयसि मां कुतः ? ।
संसारेऽस्मिन्ननेकोऽस्ति, समानाऽऽकृतिको नरः ।। ६३ ।। युग्मम्

प्रमाणं नाऽऽकृतिः तस्माद्, गुणो भवति भेदकः[१] ।
यथा कर्पूरलवणे, बकहंसौ पिकद्विकौ' ।। ६४ ।।

श्रुत्वेदं वचनं तस्य, सिंहलाधिपतिस्ततः ।
प्रोवाच 'शृणु भूपाल !, च्छलं सम्प्रत्यसाम्प्रतम् ।। ६५ ।।

आकृत्यैवाऽनुमीयन्ते, प्रकारा भुवने सताम् ।
न हि तुम्बीफलं जातु, जले मज्जति यत्नतः ।। ६६ ।।

न हि कस्तूरिकामोदो, गोपनेन सहस्त्रशः[२] ।
गोपाय्यते क्वाऽपि, राजन्नुद्यन् रविरिवाम्बरे ।। ६७ ।।

त्वं चिरान्मम राजेन्द्र !, मिलितोऽसि कुतः पुनः ।
आत्मानं निह्नुषेऽकाण्डे, प्रसन्नो भव सम्प्रति' ।। ६८ ।।

यावदेवं वदत्येव, तावत् कपटनीरधिः ।
कदाग्रही समागच्छद्, हिंसकः सचिवाग्रणीः ।। ६९ ।।

जलं स्थलं साधयति, प्रपञ्चविधियोगतः ।
दिवानिशं स एवाऽस्य, व्यापारः प्रथितः क्षितौ ।। ७० ।।

---

१. '-किन्तु, गुणः सर्वत्र पूज्यते' इति पाठा० ।। २. '-स्त्रधा' इति पाठा० ।।

विनीतश्चन्द्रभूपालं, प्रणम्य निजमासनम् ।
अधिष्ठाय नरेन्द्रं तं, कौटिल्यादवदल्लघु ॥ ७१ ॥
'सुप्रभाता निशा मेऽद्य, सफला शकुनावली ।
येन मे लोचनपथं, समायातोऽसि भूपते ! ॥ ७२ ॥
विनयं मम भूपस्य, कथं नाऽऽद्रियसे प्रभो ! ।
अलीकमुक्त्वा स्वो वंशः, कथं निह्नूयते त्वया ॥ ७३ ॥
मुग्धबालमिव[1] त्वं हि, कुतो वञ्चयसे नृपम् ।
सत्यं वदामि चन्द्रस्त्व-माग्रहं मुञ्च निष्फलम् ॥ ७४ ॥
शृङ्खलाबद्धवत्त्वं तु[2], कथं यास्यसि मेऽग्रतः ।
आभानगरभूपाल !, बह्व्याशा त्वयि विद्यते ॥ ७५ ॥
देवीवचनतो ज्ञातं, तव सर्वं कुलादिकम् ।
अतश्छलं विहायाऽऽशु, प्रतिपद्यस्व मे वचः ॥ ७६ ॥
दीपा निष्प्रभतां याताः, पाण्डुतामगमच्छशी ।
प्रभातकल्पा रजनी, जाताऽऽभापुरपालक !' ॥ ७७ ॥
इति मन्त्रिवचः श्रुत्वा, जगाद नृपतिस्ततः ।
'वद चन्द्रेण ते कार्य-मस्ति किं यत्करोम्यहम्' ॥ ७८ ॥
इति तन्निश्चयं बुद्ध्वा, सिंहलाधिपतेस्तनुः ।
कदम्बपुष्पवन्मोद-पुलकाङ्कुरिताऽभवत् ॥ ७९ ॥
अथाऽवदन्नृपं मन्त्री, 'चन्द्रोऽयं[3] शोकनाशनः ।
अतो लज्जां विहायाऽमुं, स्वकार्यं विनिवेदय' ॥ ८० ॥
इति मन्त्रिवचः श्रुत्वा, चन्द्रश्चिन्ताकुलोऽभवत् ।
'किं कार्यं काऽत्र लज्जा स्यात् ?, किं वा स्यान्मम यत्नतः ? ॥ ८१ ॥

---

१. 'गर्भरूप इव' इति पाठा० ॥ २. 'शृङ्खलाबद्धपादोऽसि' इति पाठा० ॥
३. '-ऽहं' इति पाठा० ॥

वशीभूतोऽस्मि किं कुर्या-मिदानीं धूर्तसङ्गतः' ।
सचिन्तमाकृतेर्ज्ञात्वा[१], चन्द्रं प्रोवाच भूपतिः ॥ ८२ ॥

'अहो चिन्तयसे किं त्वं, धन्यः[२] कोऽपि जगत्त्रये ।
यः परोपकृतौ स्वं स्वं, प्रयुङ्क्ते धरणीपते ![३] ॥ ८३ ॥

कः स्वार्थो मिहिरस्याऽस्ति, प्रकाशे ? फलिनः फले ।
नद्या गोः सरसश्चैव, परोपकृतितोऽपरः[४] ? ॥ ८४ ॥

परोपकारकरणे, सदृशस्तव भूतले ।
नास्ति कोऽपि ततो मे त्व-मुपकारं कुरुष्व भोः !' ॥ ८५ ॥

चन्द्रोऽवदच्'छलं त्यक्त्वा, वद कार्यं निजेप्सितम् ।
तच्छ्रुत्वाऽनुभविष्यामि, कार्याकार्यविवेचनम् ॥ ८६ ॥

मन्नामग्रामगोत्रं च, समागमनमत्र च ।
कथं ज्ञातं त्वया सर्वं, वद शीघ्रं ममाऽग्रतः ॥ ८७ ॥

कथं यूयं सचिन्ताः स्थ ?, विवाहोऽद्य च वर्तते ।
तस्मान्महोत्सवे का ते, चिन्ता सन्तापकारणम्' ॥ ८८ ॥

अथ सिंहलभूपेन, कृतसंज्ञः स मन्त्रिराट् ।
ऊचे 'हे चन्द्रराज ! त्वं, त्राता चिन्ताब्धितो भव ॥ ८९ ॥

येन कार्यं न तेनाऽस्ति, गोप्यं किञ्चित् क्वचिन्नृणाम्[५] ।
अतोऽवधानतो वाक्यं, शृणु त्वं मम भूपते ! ॥ ९० ॥

अस्ति सिंहलभूपस्य, कुमारः कनकध्वजः ।
तस्मै श्रीप्रेमलां लक्ष्मीं, परिणीय समर्पय ॥ ९१ ॥

---

१. 'इति चिन्तितमालोक्य' इति, 'विमृशन्तमिदं दृष्ट्वा' इति, 'विचारयन्तं तं दृष्ट्वा' इति च पाठा० ॥ २. 'कस्माद् धन्यः' इति पाठा० ॥ ३. 'यः परोपकृतावात्मा-नंप्रयुङ्क्तेऽवनीतले' इति पाठा० ॥ ४. 'नाऽन्यः' इति टि० ॥ ५. 'अतो न गोपनीयं त्वन्न, नटी ह्रीमती क्वचित्' इति पाठा० ॥

परोपकारचुञ्चुस्त्वं, त्वत्समो न दयापरः[१] ।
यथाऽहं कथयामि त्वां, प्रसद्य मयि तत् कुरु[२]' ।। ९२ ।।

अथोवाच महीपालः, '[३]प्रोक्तमेवं कथं त्वया ? ।
कर्णाकर्णि श्रूयते यत्सिंहलाधिपतेः सुतः[४] ।। ९३ ।।

प्रेमलां परिणेता तत्, कथं न परिणेष्यति ? ।
कुमारस्य वधूः सेति, जगज्जानाति तत्र किम् ।। ९४ ।।

एवं कपटकार्यं मां, कर्तुं योजयसे वृथा ?' ।
इति श्रुत्वाऽवदन्मन्त्री, 'शृणु चन्द्र ! वचो मम ।।९५।।(कलापकम्)

पूर्वकर्मविपाकेन, कुष्ठी नृपतिनन्दनः ।
अयं भेदो न कुत्राऽपि, प्रकटोऽस्ति कदाचन ।। ९६ ।।

दैवयोगेन[५] तस्याश्च, परिणेता नृपाङ्गजः ।
परन्त्वयं तवैवाऽऽस्ते, हस्ते परिणयोत्सवः ।। ९७ ।।

हे राजन् ! सिंहलेशस्य, लज्जा तव करेऽधुना ।
त्वय्येव महती चन्द्र !, ममाशेति विदाङ्कुरु[६]' ।। ९८ ।।

चन्द्रोऽवदत् 'कथङ्कार-मित्थमज्ञानता कृता ।
प्रेमलायाः कुष्ठिना हि, कथं परिणयो भवेत् ? ।। ९९ ।।

यूयं सर्वे मिलित्वेवं, कथं जन्म निरर्थकम् ।
अबलाया विधद्ध्वे तत्, कथं दैवं सहिष्यते[७] ! ।। १०० ।।

---

१. 'तस्मात् कार्यं त्वया प्रभो !' इति पाठा० ।। २. 'तथा कुरु दयानिधे !।।' इति, 'प्रसीद मे दयानिधे ! ।।' इति च पाठा० ।। ३. 'युक्त-' इति पाठा० ।। ४. 'गद्येन श्रूयते श्रीमत्सिंहलाधिपतेः सुतः' इति पाठा० ।। ५. 'लेखमात्रेण' इति पाठा० ।। ६. 'त्वय्येव महती (भूप !) चन्द्र !, ममाशा परिवर्तते' इति पाठा० ।। ७. '-विधद्ध्वेयदीश्वरस्तत्सहिष्यते ?' इति पाठा० ।।

मकरध्वजकन्येयं, परिणीता कथं मया ।
भवेत् ? सा च कथं तस्मै, देया स्याददतिनिन्दितम् ।। १०१ ।।

अकस्मात्सङ्गते पुंसि, न न्याय्यो मन्त्रिराट् ! तव[1] ।
भारारोपो, न मतिमान्, गर्हितं कुरुते क्वचित् ।। १०२ ।।

अयं हा ! कपटाटोपो, मदग्रे सचिवेश्वर ! ।
किमर्थं कुरुषे मुञ्च, कपटं सरले मयि ।। १०३ ।।

हे मन्त्रिन् ! प्रेमला बाला, लक्ष्मीरिव महीयसी ।
कुष्ठिना सह सम्बन्धं, तस्या मा कुरु निन्दितम् ।। १०४ ।।

को देशस्तव भूपस्य ?, नाम किं ? कुत्र संस्थितिः ? ।
कथं च तं विधिं मत्त-श्चिकारयिषुरस्ति सः[2] ।। १०५ ।।

तत्सर्वं गुप्तमथवा, प्रकटं मम सन्निधौ ।
विनिवेदय यच्छ्रुत्वा, यथायोगं करिष्यते ।। १०६ ।।

पश्चाद्धिंसकमन्त्रीशे[3]-श्चन्द्रं[4] वक्तुं मिताक्षरम् ।
संप्राक्रमत राजाऽपि, सावधानहृदाऽशृणोत् ।। १०७ ।।

"सिन्धुनद्यास्तटे राजन् !, सदाशय इवाऽद्भुतः ।
मनोहरः सिन्धुदेशो, वरीवर्ति महोन्नतः ।। १०८ ।।

गङ्गासिन्धुमहानद्यौ, शोभेते यत्र भूभृताम् ।
दूरतो दृश्यतां यान्ति, शिखराणि महान्ति हि ।। १०९ ।।

सरित्पतिं व्रजन्त्यत्र, सङ्केतं कुरुते सरित् ।
इतस्ततो भ्रमन्त्यो हि, नावः कुर्वन्ति दूतताम् ।। ११० ।।

---

१. 'न न्याय्यमपि मन्त्रिराट् ! ।' इति, 'न न्याय्योऽस्ति मन्त्रिराट् ! ।' इति च पाठा० ।। २. 'कथं मे तदनर्थं च, कर्तुं तस्य मनोऽभवत् ?' इति पाठा० ।। ३. 'हिंसकनामा मन्त्रीश' इत्यर्थः' इति टि० ।। ४. 'नृपं' इति पाठा० ।।

न तत्र द्वेषिणः केऽपि, सर्वे च सरला जनाः ।
सर्वे विद्याविनीताश्च, धनिनः शिल्पिनस्तथा ॥१११॥

मध्ये क्षारसमुद्रस्य, वर्तते यद्यपि प्रभो ! ।
तथाऽपि माधुर्यगुणै-र्गरिष्ठो देशभूषणः ॥११२॥

धूलिधूसरभक्ताङ्गा, मातङ्गा मदवर्षिणः ।
यान् दृष्ट्वा वारिवाहोऽपि, लज्जते राजशेखर ! ॥११३॥

तत्र सिंहलनामाऽस्ति, नगरं सर्वसिद्धिभाक् ।
रत्नद्वीपे न यद् दृष्ट्वा[1], वसति श्रीरचञ्चला ॥११४॥

चतुष्के यत्र रत्नानि, शोभते पतितानि हि ।
भारात् संपीडितायाश्च, पृथिव्या दशना इव ॥११५॥

यद् दृष्ट्वा राजराजस्य[2], नगरी ह्रीमती सती ।
हिमालयं ययौ प्राणान्, हातुं तद्धि सतां व्रतम् ॥११६॥

तत्र कामाकृतिः श्रीमान्, कनकादिरथाह्वयः[3] ।
राजाऽस्ति शत्रुवृक्षाणां, पातने चण्डमारुतः ॥११७॥

[4]स्वर्णवत्यभिधा तस्य, राज्ञी रतिस्वरूपिणी ।
धर्मकर्मवती शील-वती स्वामिप्रियंवदा ॥११८॥

तस्याऽहं हिंसको नाम्ना, मन्त्री राज्यप्रशासकः ।
राज्ञो बहुमतः शश्वन्नीतिशास्त्रावलोककः ॥११९॥

तस्याऽस्ति कपिलानाम्नी, धात्री धात्रीव भाग्यतः ।
सरस्वतीव बुद्ध्या सा, राजमान्या विशेषतः[5] ॥१२०॥

---

१. 'यद् दृष्ट्वा न मणिद्वीपे' इति पाठा० ॥ २. 'कुबेरस्याऽलकापुरी' इति टि० ॥ ३. 'सुवर्णरथसंज्ञिनः' इति, 'कनकरथसंज्ञकः' इति च पाठा० ॥ ४. 'कनकवती' इति टि० ॥ ५. 'सरस्वतीव बुद्ध्याऽस्याः, सुधापूर्णौ पयोधरौ' इति पाठा० ॥

हस्त्यश्वरथपादातीन्, कः सङ्ख्यातुमिहेश्वरः ।
सम्पदा किं धनाध्यक्षो, जितोऽगाद् द्यामलक्षितः[१] ॥ १२१ ॥

रत्नाकरोऽब्धितां भेजे, रत्नराशिजितो ध्रुवम् ।
एतद्विद्वद्भयान्नूनं, नामशेषो बृहस्पतिः[२] ॥ १२२ ॥

यत्र सर्वे धनाधीशाः, स्वेष्टभोगनिराकुलाः ।
दादिद्र्यस्य तु दारिद्र्यं, दैवमेवात्र कारणम्[३] ॥ १२३ ॥

अथैकदा स्वर्णवती, मन्दिरे स्वर्णमञ्चके ।
उपविष्टा विशालाक्षी, शुशोच तनयं विना ॥ १२४ ॥

दीर्घश्वासं विमुञ्चन्ती, तनुं नेत्रजलैरलम् ।
स्नापयन्ती सखीवाक्य-मरुचन्नहि तत्क्षणे ॥ १२५ ॥

आतपे पतिता मत्सी-वेयं शोकपरायणा ।
न क्वापि लभते स्वास्थ्यं, सत्यपि स्वास्थ्यसाधने ॥ १२६ ॥

भुजिष्या काऽपि राजानं, वृत्तान्तं तद् व्यजिज्ञपत् ।
श्रुत्वैव राजा तत्राऽगात्, प्रियाप्रेमवशंवदः ॥ १२७ ॥

'हे चन्द्रवदने ! किं ते, वैमनस्यस्य कारणम् ? ।
कथमञ्चलपर्यन्त-मार्द्रयस्यक्षिजैर्जलैः ॥ १२८ ॥

---

१. 'हस्त्यश्वरथपादातीन्, सङ्ख्यातुं तस्य गीष्पतिः । शक्नोति न, धनाध्यक्ष-समृद्धेः पारमभ्यगात् ॥' इति पाठा०, 'सम्पदा किं नाध्यक्षो, समृद्धेः पारमाप न' इत्यपि च पाठा० ॥, इतोऽग्रे-'पराभवाय शत्रूणां, सुरङ्गाऽस्ति तथाऽस्य च। यामालोक्य त्रपाऽऽविष्टा, गङ्गाऽभूत् पूर्ववाहिनी ॥' इति निष्कासितः श्लोको दृश्यते ॥ २. 'सर्वे धनाढ्या विद्वांसः, स्वमतस्य समर्थकाः । लोकानां नादृतो वार्धिस्त्रपां भेजेऽत्र पत्तने ॥' इति पाठा० ॥ ३. 'अत्यन्तचपला लक्ष्मीः, स्थिरीभूय विराजते । न तत्र कोऽपि शोकानां, पात्रभूतोऽस्ति नागरः॥' इति पाठा० ॥

प्रिये ! वद तवाऽऽदेशं, कः करोत्यन्यथा जनः ।
तस्य शिक्षां विधास्यामि, भूयोऽन्यो न करिष्यति ॥१२९॥

हे प्रिये ! धनधान्यादि-रत्नानि मणयस्तथा ।
नगराणि च देशाश्च, सन्ति किं ते प्रयोजनम् ?' ॥१३०॥

इति प्रियवचः श्रुत्वा, दीर्घश्वासं विधाय सा ।
'तव प्रसादात् सौख्यं मे, सर्वमि'त्यवदत् सती ॥१३१॥

'यावत् तव कृपादृष्टि-र्मय्यस्ति प्राणवल्लभ ! ।
तावदाज्ञां मदीयां को, विलङ्घयितुमर्हति ॥१३२॥

पूर्वजन्मकृतात् पुण्यात्, पतिभूतोऽसि मे प्रिय[1] ! ।
इन्द्राण्यपि न तं भोगं, कुरुते यं करोम्यहम् ॥१३३॥

यथेष्टं स्वादुभोज्यं मे, मणिरत्नविराजितम् ।
आभूषणं पट्टवस्त्र-मनासाद्यं न किञ्चन ॥१३४॥

कस्तूर्यगरुश्रीखण्ड-चन्दनाद्यविलेपनैः ।
सखीनां हस्तकमलं, न मे शुष्यति कर्हिचित् ॥१३५॥

इत्यनेकं सुखं मेऽस्ति, तथाऽपि तृणवन्मम ।
सौख्यस्य साधनं नास्ति, विना पुत्रेण वल्लभ ! ॥१३६॥

वने कुसुमितां वल्ली-मिव स्वां जनिमद्य भोः ।
निष्फलामेव जानामि, तनयाभावकारणात् ॥१३७॥

अनपत्यस्य लोकस्य, धनिनोऽपि सुखं नहि ।
आलोकते जनो दुःखं, नास्ति निष्पुत्रतासमम् ॥१३८॥

धूलिधूसरसर्वाङ्गं, विप्रकीर्णशिरोरुहम् ।
इतस्ततश्च धावन्त-मनतिस्पष्टभाषिणम् ॥१३९॥

---

१. 'प्रभो !' इति पाठा० ॥

विमुग्धमुग्धहसितं, यो यष्टिकृतवाहनम् ।
पुत्रं पश्यति तस्यैव, सफलं जननादिकम्[१] ॥१४०॥

कीर्तिः समेधते सम्यक्, चिराय तनयात् कुलम् ।
पुत्रिणो वनवासोऽपि, प्रीतये भवति प्रिय ! ॥१४१॥

पुत्रेण सफला सम्पज्जन्मादि सफलं ततः ।
धर्मध्यानादिके वृद्धिः, वार्द्धक्ये जायते ततः[२] ॥१४२॥

स्वामिन् ! पुत्रकृता चिन्ता, वर्तते हृदये मम ।
कदा पुत्रमुखं दृष्ट्वा, संप्रहृष्यामि भाग्ययुक्[३]' ॥१४३॥

'प्राणप्रिये ! शृणु वच-श्चिन्तां जहि मुदं भज ।
चिन्तयाऽलं बलीयस्ये'-त्यवदन्नृपतिः प्रियाम् ॥१४४॥

'मणिमन्त्रौषधीनां च, प्रयोगं कुरु यत्नतः ।
तेन ते यदि भाग्यं स्यात्, तदा स्यान्नियतं सुतः[४]' ॥१४५॥

इत्थं स्वर्णवतीचित्तं, परिबोध्य महीपतिः ।
मामाऽऽह्वातुं समादिक्षद्, दासीमेकां तदैव सः ॥१४६॥

आगतं मां समस्तं तद्, राज्ञ्योक्तं विन्यवेदयत् ।
मया पुनर्विचार्यैवं, न्यवेदि विनयान्नृपः ॥१४७॥

'तपोऽष्टमं समाधाय, कुलदेव्याः प्रसाधनम् ।
कुरु तस्याः प्रसादेन, शीघ्रमीप्सितमेष्यसि' ॥१४८॥

इति संश्रुत्य राज्ञाऽपि, हर्षात् तदुररीकृतम् ।
धीरैः सदुपदेशान्न, विमुखीभूयते क्वचित् ॥१४९॥

---

१. 'भवनादिकम्' इति पाठा० ॥ २. 'परपिण्डग्रहोऽप्यस्मै, रोचते परवेश्मनि' इति, 'वार्धक्ये हि सुखं तेन, गतो ग्रासोऽपि लभ्यते' इति च पाठा० ॥ ३. 'नाथ ! हे' इति पाठा० ॥ ४. 'प्रिये !' इति पाठा० ॥

व्यधाद् राजा विधानेन, कुलदेव्याः प्रपूजनम् ।
तस्थौ तद्दर्शनं याव-दभिग्रहपुरस्सरम् ।।१५० ।।

ततस्तृतीयदिवसे, व्रतेन परितोषिता ।
मनोहराऽऽकृतिस्तस्य, कुलदेवी पुरोऽभवत् ।।१५१ ।।

अम्लानपुष्पमालाभि-र्निर्निमेषविलोचना ।
ऊर्ध्वस्थितैः शस्त्रहस्तैः, प्रसन्नमुखपङ्कजा ।।१५२ ।।

मञ्जीरमञ्जुक्काणेन[१], रशनारणितेन च ।
भानुलक्षप्रतीकाश-तेजोभिरुपलक्षिता ।।१५३ ।।

उवाच देवी 'भो राजन् !, किमर्थं मम पूजनम् ।
अकार्षीर्यत् तवाऽभीष्टं, तद् वृणीष्व पुरो मम' ।।१५४ ।।

इति प्रसन्नवचनं, कुलदेव्या निशम्य सः ।
उवाच राजा 'हे मातः !, शृणु त्वं मदभीप्सितम् ।।१५५ ।।

मातस्त्वं कुल-सम्पत्त्योर्ममौन्नत्यविधायिनी ।
सर्वदैवाऽसि तेन त्वां, स्मरामि विषमे स्थितः ।।१५६ ।।

मम वंशकरः पुत्रो, नास्ति देवि ! ततो न हि ।
राज्यादिकाखिलसुखं, रोचते जगदम्बिके[२] ! ।।१५७ ।।

यदि वंशकरः पुत्रो, न स्यात् तर्हि तवाऽर्चनम् ।
मत्परोक्षे कथं स्यात् त्वं, कस्य वा कुलदेवता[३] ।।१५८ ।।

---

१. '-गुञ्जेन' इति पाठा० ।। २. इतोऽग्रे- ''मातः पुण्यप्रतापेन, जनस्य हृदयाम्बुजे । ज्ञानसूर्योदयो भाति, गृहे साधुसमागमः ।। पुत्रसङ्कीर्ण उत्सङ्गो, गुरुदेवेषु रागिता । जायते नान्यथा मातस्तस्मात् पुत्रं प्रयच्छ मे ।।'' इति निष्कासितौ द्वौ श्लोकौ दृश्येते ।। ३. '-देविका' इति पाठा० ।।

कल्पवल्लीसमीपस्थो, जनो दीनो भवेद् यदि ।
तदा तदीयलज्जायाः, कारणं तन्महद् भवेत्' ।।१५९।।

इति तद्वचनं श्रुत्वा, देव्युवाच शुचिस्मिता ।
'प्रसन्नाऽहं प्रयच्छामि, पुत्रमेकं नरेश्वर ! ।।१६०।।

किन्त्वस्य विग्रहे राजन् !, कुष्ठरोगो भविष्यति' ।
इति तस्या वचः श्रुत्वा, राजोवाच शुचाकुलः ।।१६१।।

'नीरोगं तनयं देहि, प्रणतोऽस्मि पुनः पुनः ।
मदीयां प्रार्थनामेतां, पिपूर्हि कुलदेवते !' ।।१६२।।

इति राजवचः श्रुत्वा, प्रोवाच कुलदेवता ।
'तव पुत्रो भवेदेव, कुष्ठरोगी नराधिप ! ।।१६३।।

देवेन्द्रोऽपि[1] न तत्कर्म, समुल्लङ्घयितुं क्षमः ।
किं च मद्वचनं राजन् !, नाऽन्यथा भवति क्वचित्' ।।१६४।।

राजोवाच 'कथं तुष्टा, कुष्ठिपुत्रमदाः शिवे !' ।
साऽप्युवाच 'यतो दत्त-स्तत्कारणमदः शृणु ।।१६५।।

सुरशेखरनामाऽस्ति, पतिर्मे गुणभाजनम् ।
तस्याऽऽवां वनिते देव्यौ, स्वश्च सर्वसुखान्विते ।।१६६।।

आवां नवनवं सौख्यं, तेन साकं सदा नृप ! ।
अभुक्ष्वहि सपत्न्यौ द्वे, दिव्यं विषयजं भृशम् ।।१६७।।

एकदा वञ्चयित्वा मां, सपत्न्यै हारमुत्तमम् ।
पतिर्ददौ तन्निशम्य, मम शोको महानभूत् ।।१६८।।

अथो विवाद आरब्धस्तया साकं महाँस्ततः ।
पतिस्तस्या व्यधात् पक्षं, तेन दुःखाकुलाऽभवम् ।।१६९।।

---

१. 'इश्वरोऽपि' इति पाठा० ।।

एतर्हि कुपिताया मे, त्वमाराधनमाचरः ।
तेन ते कुष्ठसंयुक्तः, पुत्रो भावी नरेश्वर !' ॥१७०॥

इत्युक्त्वाऽन्तर्दधे देवी, नृपोऽपि नैरपत्यतः ।
मूर्ध्नाऽभिनन्द्य तद्वाक्यं, व्रतं पूर्णं विधाय च ॥१७१॥

आगत्य गेहं देव्यै तद्, देवीवाक्यं न्यवेदयत् ।
मां चाऽऽहूयाऽब्रवीत् सर्वं, नरनाथो यथातथम् ॥१७२॥

'राजन् ! पुत्रोऽस्तु विविधै-रुपायैः कुष्ठरोगकम् ।
निवारयिष्ये' तच्छ्रुत्वा, राज्ञी[1] हर्षमुपागमत् ॥१७३॥

अथ रात्रौ कोऽपि जीवस्तस्याः कुक्षाववातरत् ।
राज्ञी गर्भवती जाता, सशस्या पृथिवी यथा ॥१७४॥

यथा गृध्नुः सुरङ्गायां, वित्तं गोपायति[2] क्षितौ ।
तथा गर्भभराक्रान्तां, गोपायामास[3] तां नृपः ॥१७५॥

पूर्णे कालेऽथ राज्ञी सा, सुषुवे कोमलं सुतम् ।
राज्ञे निवेदयाञ्चक्रु-रन्तःपुरजनास्ततः ॥१७६॥

राजा तेभ्यो ददौ वित्त-मीप्सितादधिकं तदा ।
भेरीमृदङ्गढक्कानां, शब्दोऽभूद् गगनस्पृशः ॥१७७॥

यथा मेघेन नृत्यन्ति, मयूरा नागरा जनाः ।
पुत्रोदयात् तथैवाऽमी, ननृतुर्हर्षनिर्भराः[4] ॥१७८॥

महेन[5] तस्य राजेन्द्रो, जातकर्मादिकं व्यधात् ।
कनकध्वज इत्येवं, नाम तस्य चकार च[6] ॥१७९॥

---

१. 'देवी' इति पाठा० ॥ २. 'गोपयति' इति पाठा० ॥ ३. 'गोपयामास' इति पाठा० ॥ ४. '-रात्' इति पाठा० ॥ ५. 'गुप्तेन' इति पाठा० ॥ ६. 'कनकध्वज इत्याख्यां, चक्रे तस्य महीश्वरः' इति पाठा० ॥

तस्य जन्मदिनादैव, कुष्ठरोगो बभूव ह ।
न हि कर्मफलं जातु, विना भोगेन नश्यति ॥१८० ॥

रत्नानामाकरे वृद्धि-र्यथा भवति नित्यशः ।
तथा भूमिगृहे राज-नन्दनो ववृधेतराम् ॥१८१ ॥

अनेकदेशादादाय, रत्नानि द्युतिमन्ति च ।
राजानः समुपाजग्मू, राजपुत्रदिदृक्षया ॥१८२ ॥

तस्मै मया कथ्यते स्म, 'रूपमप्रतिमानुषम् ।
कुमारस्याऽस्ति, यन्न, स्याद् देवराजात्मजेऽपि तत् ॥१८३ ॥

अतः कस्याऽपि नो दृष्टि-दोषः सज्जतु तेन सः ।
सुरङ्गायां स्थापितोऽस्ति, नाऽतस्तद्दर्शनं भवेत्' ॥१८४ ॥

इति मे वचनं सत्यं, मन्यस्वाथ पृथग्जनाः ।
नागरा अप्यवोचन्त, 'कुमारस्याऽङ्गसौष्ठवम् ॥१८५ ॥

अहो कुमारो धन्योऽस्ति, यस्य रूपदिदृक्षया ।
उदेति सूर्यस्तन्नाऽऽप्य, पुनरस्तं प्रयाति हि' ॥१८६ ॥

उत्तमस्य पदार्थस्य, यत्नतो गोपनं किल ।
शास्त्रेऽपि कथितं तस्माद्, गोप्यते राजनन्दनः ॥१८७ ॥

इत्थं [1]देशे विदशेऽपि, किंवदन्ती व्यजृम्भत ।
अन्येषां कुटिलां वृत्तिं, बोद्धुं धाताऽपि न क्षमः ॥१८८ ॥

इतोऽस्मन्नगरात् कोऽपि, श्रेष्ठी रत्नसमुच्चयम् ।
व्यापरीतुं ययौ लात्वा, विमलानगरीं वराम् ॥१८९ ॥

मकरध्वजाह्वयस्तत्र[2], भूपः कीर्तिसमुज्ज्वलः ।
दर्शनायागमच्छ्रेष्ठी, तस्योपायनसंभृतः ॥१९० ॥

---

१. 'देशवि-' इति पाठा० ॥ २. 'मकरध्वजनामाऽस्ति' इति पाठा० ॥

सम्मानं प्राप्य सदसि, स उपाविशदासने ।
तावत् समाययौ तस्य, तनया प्रेमलाभिधा ।।१९१।।

नृपोत्सङ्गे समाविक्षच्चतुःषष्टिकला यथा ।
पिण्डीभूता तथैवाऽसौ, रराज नृपनन्दिनी ।।१९२।।

तां चन्द्रवदनां दृष्ट्वा, किञ्चित्संभिन्नयौवनाम् ।
उपमानदरिद्राश्च, विस्मयं परमं ययुः ।।१९३।।

अथ राजाऽवदत् 'कस्माद्देशात् त्वं समुपागमः ? ।
कस्तत्र राजा ? सर्वं मे, शंस श्रेष्ठिन् ! सविस्तरम्' ।।१९४।।

'राजन् ! सिंहलनामाऽस्ति, सिन्धुदेशे महापुरम् ।
यद् दृष्ट्वाऽगादूर्ध्वदेशं, त्रपाविष्टामरावती ।।१९५।।

तत्र सर्वगुणोपेतो, राजा स्वर्णरथाभिधः ।
तस्य कामसमाकारः, पुत्रोऽस्ति कनकध्वजः ।।१९६।।

यो दृष्टिभयतो राज्ञा, सुरङ्गायां निधीयते ।
न तस्य रूपसौन्दर्यं, [1]कुमारावपि प्राप्नुतः' ।।१९७।।

इति श्रुत्वा महीपालो, हर्षविस्फारितेक्षणः ।
श्रेष्ठिनं बहुमानेन, दृष्ट्वा तं विससर्ज सः ।।१९८।।

'प्रातः पुनः समागच्छे-रि'त्युक्त्वा निजमन्त्रिणम् ।
आजुहाव स सद्बुद्ध्या, गीर्वाणगुरुजित्वरम् ।।१९९।।

तदग्रे कथयामास, कनकध्वजवर्णनम् ।
यच्छ्रुत्वा न्यगदन्मन्त्री, 'किं तस्य परिवर्णनैः ?' ।।२००।।

---

१. 'अश्विनीकुमारौ' इत्यर्थः ।।

राजोवाच 'कुमारीयं, वरयोग्याऽस्ति सम्प्रति ।
यदि योग्यो वरोऽस्याः स्यात्, तन्मे मोदो भवेन्महान्[१] ।। २०१ ।।

न चाऽन्यः कोऽपि जगति, वरोऽस्ति तत्समः खलु ।
यदि ते सम्मतिस्तर्हि, तस्मै दद्यां निजाङ्गजाम्' ।। २०२ ।।

इति राजवचः श्रुत्वा, प्रोचे सचिवशेखरः ।
'इत्थं वैदेशिकोक्त्या त्वं, कथमुत्कोऽसि भूपते ! ।। २०३ ।।

स्वीयं वर्णयते को न, साधु वाऽसाधु मानवः ।
न कोऽपि डाकिनीमाह, लोको हि निजमातरम्[२] ।। २०४ ।।

सर्वेषां प्रियतामेति, निजदेशस्य कण्टकम् ।
यथा तथा विदेशस्थ-मपि पुष्पं न सुन्दरम्[३] ।। २०५ ।।

वैदेशिकोक्तौ नो तस्मादा-स्था कार्या विचक्षणैः ।
असाधु कीर्त्यते यत्तत्[४], न स्याद् विश्वासकारणम्' ।। २०६ ।।

एवं मन्त्रिवचः श्रुत्वा, राजा हृष्टतरोऽभवत् ।
विसृज्य प्रेमलामागान्मृगयायै क्षितीश्वरः ।। २०७ ।।

चतुरङ्गबलः पश्चान्मन्त्री च वाजिवाहनः ।
अन्वगाद् बहुशो जन्तून्, जघान नृपतिर्वने ।। २०८ ।।

श्रान्तो भूपो घनच्छाया-जटिलं हि सरोवरम् ।
दृष्ट्वा तत्र समागच्छद्, विश्रामाय त्वरान्वितः ।। २०९ ।।

इतः कोऽपि धनी श्रेष्ठी, पानीयं पातुमागतः ।
पीत्वा जलं नृपं नत्वा, विनयात् समुपाविशत् ।। २१० ।।

---

१. 'तन्मे स्नेहस्य भाजनम्' इति, 'तन्मे प्रीतिकर भाजनम्' इति च पाठा० ।।
२. 'स्वमातरमिहान्यवान्' इति पाठा० ।। ३. 'यथा तथा विदेशस्थं, स्पृहत्यथ नो सुमम्' इति पाठा० ।। ४. '-कीर्त्तयेत् तत् किं' इति पाठा० ।।

'पान्थ ! वैदेशिकाऽजस्रं[1], देशाद्देशान्तरं व्रजन् ।
आश्चर्यजनकं किञ्चि-दपश्यस्तर्हि तद्वद' ॥२११॥

अथाऽञ्जलिं विधायोचे, 'शृणु पृथ्वीपुरन्दर ! ।
सिन्धुदेशे सिंहलाख्यं, नगरं हि समृद्धिमत् ॥२१२॥

तत्र स्वर्णरथो नामा, राजाऽस्ति सर्वशक्तिमान् ।
तस्याऽस्ति तनयः श्रीमान्, कनकध्वजनामकः ॥२१३॥

न तस्य रूपसदृशो, विद्यतेऽपि जगत्त्रये ।
तं राजा स्थापयत्युच्चैः, सुरङ्गायां सदैव हि ॥२१४॥

न तं सूर्योऽपि वाऽपूर्वं[2], द्रष्टुं शक्नोति कर्हिचित् ।
ततश्च[3] कोऽपि नो तस्य, स्वरूपं दृष्टवान् जनः ॥२१५॥

इत्येवाऽऽश्चर्यजनकं, श्रुतं तत्र मया प्रभो !' ।
इति श्रुत्वा विसृज्यैनं, राजा नगरमीयिवान्[4] ॥२१६॥

समाहूय च तत्कालं[5], वचनं पथिकस्य तत् ।
मन्त्रिणे कथयामास, दुहितृवरलिप्सया ॥२१७॥

उवाच सचिवः श्रुत्वा, 'स्वामिञ्छ्रवणमात्रतः ।
विश्वासो न विधातव्यो, विना प्रत्यक्षदर्शनम् ॥२१८॥

अतः स्वसेवकः कश्चिद्, गत्वा पश्यतु तं वरम् ।
आगत्य तस्य रूपं यत्, तद् विज्ञापयतु प्रभुम् ॥२१९॥

पश्चात् कन्याप्रदानस्य, विचारः क्रियतामि'ति ।
सचिवस्य वचः श्रुत्वा, राजा श्रेष्ठिनमाह्वयत् ॥२२०॥

---

१. 'वैदेशिकोऽपि पथिको' इति पाठा० ॥ २. 'अद्भुतम्' इति टि० ॥
३. 'परन्तु' इति पाठा० ॥ ४. 'हर्षमवाप्तवान्' इति पाठा० ॥ ५. 'राजा नगरमागत्य' इति पाठा० ॥

आगतं तं जगादाऽथ, 'श्रेष्ठिन् ! कार्यं कुरुष्व मे ।
सचिवांस्त्वमुपादाय, सिंहलं नगरं व्रज ॥ २२१ ॥

तत्र भूपानुमत्या त्वं, सचिवेभ्यो नृपाङ्गजम् ।
दर्शयित्वा यदि भवेद्, रूपं मत्कन्यकासमम् ॥ २२२ ॥

तदा श्रीफलदानेन, विवाहदिननिश्चयम् ।
कृत्वाऽऽगच्छोपकारोऽयं, विस्मर्येत न ते मया' ॥ २२३ ॥ युग्मम्

स उवाच 'कथं राजन्नेवं प्रार्थयते भवान् ।
सर्वं करिष्ये त्वद्वाक्यं, किं पुनः स्वनृपाश्रयम् ॥ २२४ ॥

यथा समुद्रजा-विष्णवोर्गिरिजा-कामवैरिणोः ।
पुलोमजादिवस्पत्यो-रेतयोः सङ्गमस्तथा' ॥ २२५ ॥

इति श्रेष्ठिवचः श्रुत्वा, सम्मानसहितं तदा ।
चतुर्भिर्मन्त्रिभिः सार्धं, विससर्ज महीश्वरः ॥ २२६ ॥

ते ग्रामनगरारण्य-पर्वतांश्च सरांसि च ।
विलोकयन्तः सम्प्रापु-र्नगरं सिंहलाभिधम् ॥ २२७ ॥

गत्वा स्वभवनं श्रेष्ठी, सम्भृतिं[1] परिगृह्य च ।
स्नापयित्वा भोजनानि, कारयामास भक्तितः ॥ २२८ ॥

सुविश्रान्तान् समालोक्य, सन्ध्याकाले च तैः समम् ।
[2]कनकरथभूपस्य, सभामाप विशालधीः ॥ २२९ ॥

द्वारे संस्थाप्य ताञ्छ्रेष्ठी, स्वयं राजगृहं ययौ ।
उपायनं समर्प्याऽथ, प्रणनाम महीश्वरम् ॥ २३० ॥

---

१. 'सत्कारस्य सामग्रीम्' इति टि० ॥ २. 'श्रीस्वर्णरथ-' इति पाठा० ॥

अन्यान्यवार्तां कृत्वाऽथ, विमलानगरीभवम् ।
उदन्तं गदितुं श्रेष्ठी, प्रारेभे नृपसन्निधौ ॥२३१॥

'मकरध्वजनामाऽस्ति, नृपः सर्वगुणान्वितः ।
तदग्रेऽकथयं रूपं, राजपुत्रस्य विस्तृतम् ॥२३२॥

यत्सौन्दर्यस्य महिम-श्रवणान्नृपतिर्द्रुतम् ।
कन्यायाः प्रेमलालक्ष्म्याः, प्रदानं हृदयेऽकरोत् ॥२३३॥

अथ मां बहुमानेन, समाहूय न्यवेदयत् ।
यथा मे कन्यकायाः स, वरः स्यात् त्वं तथा कुरु ॥२३४॥

मदीयसचिवैः सार्धं, गच्छ तत्र यदीप्सितम् ।
राज्ञो भवेत् तदा देयं, श्रीफलं विधिपूर्वकम् ॥२३५॥

अतो राजन्निहाऽऽयाता[1], द्वारि तिष्ठन्ति मन्त्रिणः' ।
इति तद्वचनं राजा, श्रुत्वा तानाह्वयल्लघु ॥२३६॥

उपायनं पुरस्कृत्य, ब्रह्मेव चतुराननः ।
नवैर्नवैः स्तोत्रपदैः, स्तुवन्ति स्म नरेश्वरम् ॥२३७॥

अथ तानासने मुख्ये, स्थातुमाज्ञामकारयत् ।
कुशलप्रश्नतो राजा-ऽप्रीणयत् तान् हि मन्त्रिणः ॥२३८॥

'कुतः समागताः ? कुत्र, गन्तास्थ ? कस्य वा कृते ?' ।
आ(अ)त्राऽऽगमनतः सर्वं, कथयध्वं यथार्थतः ॥२३९॥

तेषु कश्चित् पटिष्ठः स, राजानं विनयान्वितः ।
जगाद 'शृणु राजेन्द्र !, सौराष्ट्रादागता वयम् ॥२४०॥

---

१. 'अतो राजन् ! समागच्छ' इति पाठा० ॥

मकरध्वजनामाऽस्ति, प्रभुर्मे तव सन्निधौ ।
प्रैषयच्छ्रेष्ठिनो राजं-स्तव पौरस्य वाक्यतः ।।२४१ ।।

अयं तवोज्ज्वलां कीर्ति-मुपश्लोकयति स्म च ।
आत्मजस्य महीपाल !, सौन्दर्यमतिदुर्लभम् ।।२४२ ।।

सौन्दर्यं राजपुत्रे यत्, तच्च चित्रयति प्रजाः ।
रोहणे जायते किं वा, त्रपुशीशकलोहकम्[१] ? ।।२४३।। युग्मम्

प्रभोर्मे प्रेमलानाम्नी, कन्यकाऽस्ति सुरूपिणी ।
तस्याः पाणिग्रहं राजं-स्तव पुत्रेण काङ्क्षति ।।२४४ ।।

यथा प्रभा भास्करेण, रोहिणी शशिना यथा ।
तथाऽयं भविता योगः, सर्वेषां मोदकारकः ।।२४५ ।।

अतोऽहं श्रेष्ठिना साक-मागतोऽस्मि तवाऽन्तिकम् ।
अतः परं स्वकर्तव्यं, वद भूमिपते!ऽचिरात् ।।२४६ ।।

यथा सिन्धुप्रदेशस्य[२], तथैव नृपशेखरः ।
सौराष्ट्रस्याऽस्ति राजाऽयं, युवां सर्वगुणैः समौ ।।२४७ ।।

अतो न विषयेऽस्मिन्नो, वाक्यं वाच्यं त्वया प्रभो! ।
सदृशस्य च संयोगः, सदृशे शोभतेऽधिकम्' ।।२४८ ।।

इति तन्मन्त्रिणो वाक्यं, श्रुत्वा [३]भूपोऽवदत् ततः ।
'कथं मीमांसितव्येऽस्मिन्, कार्ये संत्वरते भवान् ।।२४९ ।।

शैघ्र्याद् विरसतामेति, धैर्यात् स्वादुः प्रतीयते ।
अतो विचार्य कर्तव्यं, सर्वदैव विपश्चिता ।।२५० ।।

---

१. '-शीशकमेव हि ?' इति पाठा० ।। २. 'सिंहलदेशस्य' इति पाठा० ।।
३. 'मान्योऽ-' इति पाठा० ।।

अद्याऽपि मे कुमारोऽस्ति, शिशुरेव कथं ततः ।
विवाहं कारयिष्यामि, वयस्थस्य हि स स्मृतः[१] ॥ २५१ ॥

नाऽद्याऽपि विवरस्थेना-ऽमुना दृष्टं गृहाङ्गणम् ।
तं नोत्सङ्गे निधायाऽला-लयं न च श्रुतं वचः[२] ॥ २५२ ॥

कथं पाणिग्रहं तस्य, भविष्यति न ते प्रभोः ।
कन्या न दृष्टा, ज्ञाता वा, योग्या साऽस्मै पुनर्मया[३] ॥ २५३ ॥

तव चेच्छीघ्रता मन्त्रिन् !, वरमन्यं प्रमार्गय' ।
इत्येवं कथयित्वा तान्, विश्रामायाऽमुचन्नृपः ॥ २५४ ॥

प्रत्यहं कथयत्स्वेवं[४], मन्त्रिभ्यस्तस्य मन्त्रिषु[५] ।
अथैकदा मां विजने, राजोवाच विचिन्तितः ॥ २५५ ॥

'कमुपायं करिष्यामि मन्त्रिणस्त इहाऽऽगताः[६] ।
दृढं[७] मामनुबध्नन्ति, कथं गुप्तं भवेदिदम् ? ॥ २५६ ॥

सा कन्या रूपवत्यस्ति, पुत्रो मे कुष्ठरोगभाक् ।
वञ्चयित्वा कथं कुर्यां, श्रीफलस्य परिग्रहम् ॥ २५७ ॥

मन्त्रिन् ! कदाऽपि नो कार्यं, [८]कूटं पापस्य कारणम् ।
ज्ञात्वा कथं कुष्ठभाजा, कन्यापाणिग्रहो भवेत् ? ॥ २५८ ॥

पूर्वजन्मकृतं कर्म, निःशङ्कं वञ्चनात्मकम् ।
तेनाऽयं कुष्ठरोगेण, पीडितस्तनयो मम ॥ २५९ ॥

---

१. 'विषयाश्चेतनस्य हि' इति पाठा० ॥ २. 'तमुत्सङ्गे निधायाऽहं, नालीलिङ्ग न श्रुतं वचः' इति पाठा० ॥ ३. 'कन्या दृष्टा कथं तस्माच्छ्रीघ्रं पाणिग्रहो भवेत्' इति पाठा० ॥ ४. '-न्त्वेव' इति पाठा० ॥ ५. 'मन्त्रिणः' इति पाठा० ॥ ६. 'प्रत्यहं दूरदेशिनः' इति पाठा० ॥ ७. 'एवं' इति पाठा० ॥ ८. 'कुटपा-' इति पाठा० ॥

अतः सत्यमुदित्वैतान्, विसर्जय सखे ! द्रुतम् ।
तदेव पथ्यं पश्यामि, काऽत्र कार्या विचारणा ?' ।।२६० ।।

ततोऽहमवदं 'देव !, दैवात् कुष्ठी तवाऽऽत्मजः ।
न तत् कोऽपि विजानाति, राजवेश्मन्यपि प्रभो ! ।।२६१ ।।

संसारेऽस्मिन् मृषावाक्यं, स्वदते सम्पदामपि ।
मूलभूतं तदेवाऽस्ति, विरोधात् सत्यसम्पदोः[१] ।।२६२ ।।

प्रतिकूलोऽपि मिथ्यातो-ऽनुकूलो जायते नृप ! ।
अन्यथा[२] किं कुमारस्य, सुरङ्गास्थापने फलम् ? ।।२६३ ।।

मूलादेव न चेन्मिथ्या, ततः कोऽपि न तं प्रति ।
समागच्छेदतः कस्मान्मिथ्यातो भयमस्ति ते ? ।।२६४ ।।

परदेशात् समायात, आशया स कथं पुनः ।
राजन् ! निराशः कर्तव्य, आशाभङ्गे ह्यघं महत् ।।२६५ ।।

न चौरो ग्रहणाद् भीतिं, करोति क्वचिदेव हि ।
इति त्वया न भेतव्य-मकृत्यकरणेष्वपि' ।।२६६ ।।

इति मन्त्रिवचः श्रुत्वा, राजोवाच 'न मे फलम् ।
अस्य ते भविता सर्वं, मन्त्रिन् ! कपटकारक !' ।।२६७ ।।

एवं मन्त्रयतोरेवा-ऽऽगतास्ते[३] मन्त्रिणो द्रुतम् ।
[४]ऊचु'र्मन्त्रयतां व्यत्यै-दस्माकं समयो बहुः ।।२६८ ।।

न बलात्कारतः प्रीतिः, काऽपि[५] कस्याऽपि जायते ? ।
अतो न रोचते ते चेद्, वद त्वं निश्चलं ततः ।।२६९ ।।

---

१. 'सर्वेषां क्ष्मापुरन्दर !' इति पाठा० ।। २. 'अथवा' इति पाठा० ।। ३. '-ऽऽगच्छंस्ते' इति पाठा० ।। ४. 'राजन्' इति पाठा० ।। ५. 'प्रीतः, कोऽपि' इति पाठा० ।।

मत्स्वामिनः कन्यका ते[१], स्नुषाभूताऽस्ति तर्ह्यसौ ।
अन्यस्मै यदि दीयेत, तत् किं न स्यादसाम्प्रतम् ? ॥२७०॥

गृहे समागतां लक्ष्मीं, को विसृजति[२] बुद्धिमान् ? ।
अतः प्राज्ञेन भवता, कथमेवं विधीयते ?' ॥२७१॥

तत्कालेऽप्यवदं भूपं, 'राजन्! मन्त्रि(मम)वचः शृणु ।
आशया समुपायातो, निराशः क्रियते कथम् ? ॥२७२॥

परदेशाद् दूरदेश-मागतः स कथं वृथा ।
गच्छेदतो ग्रहीतव्य-मेवं वचनमादरात्' ॥२७३॥

इत्येवं नृपतिं चन्द्र !, बोधयित्वाऽथ मन्त्रिणः ।
स्व्यकार्षं वचनं तस्य, गृहीतमपि[३] श्रीफलम् ॥२७४॥

श्रीफलग्रहणे तत्र, मिलिताः सर्वसज्जनाः ।
जहृषुर्नृत्यवादित्रै-र्मयूरा इव प्रावृषि ॥२७५॥

अथ ते सचिवा ऊचु-'रुपकारो महान् कृतः ।
साम्प्रतं तु कुमारस्य[४], रूपं दर्शय मन्त्रिराट् ! ॥२७६॥

कुमाररूपं दृष्ट्वाऽहं, वदिष्यामि स्वभूपतिम् ।
उत्कण्ठा प्रबला राज-कुमारं द्रष्टुमस्ति मे ॥२७७॥

यथा राजकुमारी मे, प्रेमला राजसूनुना ।
परिणीता कृतार्था स्याद, वयं च दर्शनात् तयोः' ॥२७८॥

तदाऽहं कपटं कृत्वा-ऽवदं तान् युक्तिपूर्वकम् ।
'कुमारो मातुलागारे-ऽतः सार्द्धशतयोजने[५] ॥२७९॥

---

१. 'सा' इति पाठा० ॥ २. 'विसर्जति' इति पाठा० ॥ ३. 'तस्यो-पाददामपि' इति पाठा० ॥ ४. 'साम्प्रतं श्रीकुमारस्य' इति पाठा० ॥ ५. 'एकान्ते पाठशालायां, कुमारः शतयोजने' इति पाठा० ॥

धात्रीसहायः पठति, तत्राऽपि च विले स्थितः[१] ।
अध्यापको बहिःस्थित्वा, तं पाठयति नित्यशः ।।२८० ।।

दुर्लभं दर्शनं तस्य, सूर्यो यं नाऽवलोकते ।
किं पुनस्त्वादृशो मन्त्रि-न्नेकसौन्दर्यशालिनम्' ।।२८१ ।।

तथाऽपि तेऽतिनिर्बन्धं, चक्रुर्मन्त्रिजनास्ततः ।
तान् गृहीत्वा स्वभवन-मगमं मानपूर्वकम् ।।२८२ ।।

सुगन्धितैलैरभ्यज्य, स्नापयित्वा शुभैर्जलैः ।
कर्पूरकेशराद्यैश्च, व्यलेपयमिमानहम् ।।२८३ ।।

रत्नस्थाले समानीय, लेह्यचोष्याद्यनेकशः ।
भोज्यं च सरसं तेभ्यो-ऽददां प्रेम्णा सपेयकम् ।।२८४ ।।

ताम्बूलमर्पयित्वाऽहं, पर्यङ्के विनिवेश्य तान् ।
व्यजनैः शीतलं वायुं, व्याजिजं गततन्द्रितः ।।२८५ ।।

अनेकरत्नरचित-मलङ्कारं सवाससम् ।
दत्त्वा सत्कारबहुल-मप्यकार्षमहं ततः ।।२८६ ।।

इत्थं समर्चिता भूयो, राजनन्दनदर्शनम् ।
प्रार्थयाञ्चक्रिरे, तेभ्यो-ऽकथयं 'शृणुताऽधुना ।।२८७ ।।

कुमारो रूपवानस्ति, नाऽत्र कश्चन संशयः ।
अन्यच्च स्वनृपः क्रुध्येत्, तादृशं क्रियते कथम् ?[२] ।।२८८।।

भवत्सु प्रियमित्रेषु, छलं कुर्यामहं कथम् ? ।
तत्सौन्दर्यं न संदेह्यं, सत्यमेतद् ब्रवीम्यहम् ।।२८९ ।।

---

१. 'विलस्थितः' इति पाठा० ।। २. 'दर्शितेऽस्मिन्नृपः क्रुध्येत्, तस्मात् स दर्श्यतां कथम् ?' इति, 'दर्शितेऽस्मिन्नृपः किञ्च, क्रुध्येत् तद् दर्श्यतां कथम्' इति च पाठा० ।।

मयैव सुविचार्येदं, कृतं कार्यं ततो नहि ।
हास्यं जायेत युष्माकं, क्वाऽपि मन्त्रिमहोदयाः ! ॥२९० ॥

सुपात्रमस्त्ययं येन, भवतामीप्सितं फलम् ।
प्रेमलायाः फलमभूद्, गौरीपूजनजं स्फुटम् ॥२९१ ॥

अमान्यो[1] न वृथा कार्य, आग्रहो वरदर्शने ।
राजाज्ञोल्लङ्घनं भूरि-यन्त्रणायै यतो भवेत्[2] ॥२९२ ॥

अयं तु विधिना बद्धः, संयोगो जायते किल ।
विवाहो जन्ममरणं च, भवन्ति विधियोगतः[3]' ॥२९३ ॥

छलवाग्भिरप्येताभि-र्बोधिता मन्त्रिणो नहि[4] ।
आग्रहं मुमुचुः पश्चाल्लोभं तेभ्योऽददां बहु ॥२९४ ॥

कोटिसंख्यकदीनारं, सर्वेभ्यो दापयामि वः ।
इत्थं लोभेन ते सर्वे, समानीता वशं बलात्[5] ॥२९५ ॥

श्यामास्या अपि ते शीघ्रं, प्रसन्नास्याः प्रजज्ञिरे ।
न लोभस्य समं लोके, वशीकरणमस्ति हि ॥२९६ ॥

राज्ञः पुरो गतास्तेऽथ[6], विवाहदिननिश्चयम् ।
कर्तुं राजाऽपि दैवज्ञां-स्तदैवाऽऽजूहवद् द्रुतम् ॥२९७ ॥

तेऽपि सर्वं समालोक्य, स्थिरीकृत्य ग्रहानथ ।
षण्मासानन्तरं योग्यं, समयं संव्यजिज्ञपन् ॥२९८ ॥

---

१. 'अनुचितः' इति टि०॥ २. 'राजा चेच्छृणुयादेतत्, तदा न कुशलं भवेत्' इति पाठा० ॥ ३. 'विवाहजन्ममरणा-न्यासते दैवयोगतः' इति पाठा० ॥ ४. 'इत्थं छलैर्बहुविधैश्छलयित्वाऽपि नो पुनः' इति पाठाः०'॥ ५. 'लुब्धा भूता नृपाश्रयाः' इति, 'वशीकृताश्च मन्त्रिणः' इति च पाठा०॥ ६. 'समागच्छन्' इति पाठा० ॥

अथ गन्तुं समुद्युक्ता, राज्ञः सम्मानिता भृशम् ।
सौराष्ट्रं प्रययुः सर्वे[१], दिवसैर्बहुभिस्ततः ॥२९९॥

सर्वं राज्ञे समाचख्यु-र्येन राज्ञाऽपि ते पुनः ।
सम्मानिताश्चतुर्लक्ष-द्रव्यदानेन मन्त्रिणः ॥३००॥

इतः सिंहलभूमीन्द्रः, पुत्रपाणिग्रहोत्सवे ।
गजाश्वरथपत्तीनां, शृङ्गाराणि समादिशत् ॥३०१॥

दृष्ट्वा तन्नागरा ऊचु-र्विस्मिता 'हेतुरत्र किम्[२] ?' ।
राजभृत्याः 'कुमारस्य, विवाहोत्सवमा'लपन् ॥३०२॥

कुमारदर्शनोत्कास्ते, चिरादाकर्ण्य तद्वचः ।
प्रमदाम्भोधिसंमग्न-चित्ताः पौरास्तदाऽभवन्[३] ॥३०३॥

अथ मामवदद् राजा, 'कथं रे कुटिलाग्रणीः ? ।
प्रेमलाया जनुर्व्यर्थं, क्रियते साम्प्रतं त्वया ॥३०४॥

यदि मे तनयस्तत्र, प्रकटः स्यात् तदा कथम् ।
प्रेमलायाः पाणिपद्मं, गृह्णीयात् कुष्ठरोगभाक्' ॥३०५॥

इति तद्वचनं श्रुत्वा, चिन्तितो[४]ऽहमगां गृहम् ।
कुलदेवीं समाराद्धुं, प्राक्रमे भक्तितत्परः ॥३०६॥

प्रत्यक्षीभूय सा देवी, कथयामास 'त्वं कथम् ? ।
मामाराध्नोषि किं कार्यं ?, वद शीघ्रं ममाऽग्रतः' ॥३०७॥

ततोऽहमवदं 'देवि !, राजपुत्रस्य सम्प्रति ।
विवाहनिश्चयो मातः !, कृतो यो मयका, कथम् ॥३०८॥

---

१. 'अधिसौराष्ट्रमाजग्मु-' इति पाठा० ॥ २. 'किं महोत्सवकारणम्' इति पाठा० ॥ ३. 'उच्छलत्प्रमदाम्भोधि-चित्ता आसन् हि नागराः' इति पाठा०॥ ४. 'चिन्तायुक्तः' इति टि० ॥

भविता स महादेवि !, कुष्ठं तस्माद् विमोचय ।
न मे त्वदन्यः संकष्टे, शरणं विद्यतेऽम्बिके !'।। ३०९ ।।युग्मम्

तदाऽवदन्महादेवी, 'कर्मभोगं विना नहि ।
क्षयोऽस्य भविता किन्तु, सदुपायं वदामि ते ।। ३१० ।।

यदा विवाहसमयो, भविष्यति तदा किल ।
आभानरेशः श्रीचन्द्र-स्तत्र द्रष्टुं समेष्यति ।। ३११ ।।

वधूर्द्वितीया माताऽस्य, प्रथमं विमलापुरे ।
आगमिष्यति तत्पश्चान्नृपोऽपि गुप्तभावतः ।। ३१२ ।।

स प्रेमलां विवाह्य त्वा-मर्पयिष्यति भूपतिः' ।
इत्थमुक्त्वा तिरोभूय, गता सा देवता दिवम् ।। ३१३ ।।

सर्वमेतन्नृपस्याऽग्रे, न्यवेदयमहं ततः ।
राजा हर्षसमायुक्तो, गमनाय मनो दधे ।। ३१४ ।।

[१]मदस्राविमहामत्त-मातङ्गं भूषणैरलम् ।
विचित्राच्छादनैश्चाल-ङ्कारयत् स समाहितः ।। ३१५ ।।

वाद्येषु वाद्यमानेषु, वन्दिवृन्दे प्रगायति ।
[२]दुर्भेद्यगुप्तभावेना-ऽरक्षयत्[३] कनकध्वजम् ।। ३१६ ।।

'केनाऽपि लक्षितो नाऽसौ, भवत्वि'ति मतिर्नृपः[४] ।
बलिष्ठान् रक्षकांस्तत्र, युयोज दृढभक्तिकान्[५] ।। ३१७ ।।

अनेकमण्डनैर्युक्ता, जना वाहैरनेकशः ।
समाजग्मुः क्रमेणाऽथ, विमलापुरमुत्तमम् ।। ३१८ ।।

---

१. 'क्षरन्मद-' इति पाठा० ।। २. 'अनेक-' इति पाठा० ।। ३. '-रोपयत्' इति पाठा० ।। ४. 'राजपुत्रं दिदृक्षुणा' इति पाठा० ।। ५. 'नृपतिस्ततः' इति पाठा० ।।

राजाऽस्मान् मन्दिरेऽमुष्मिन्, समुत्तार्य यथाविधि ।
भोज्यादिना सदकरोद्, हे चन्द्र ! मकरध्वजः ॥३१९॥

अद्यैव रात्रिसमये, भावी परिणयोत्सवः[१] ।
इति तेऽभ्यागमं राज-न्नन्वेष्टुं निजसेवकान्[२] ॥३२०॥

सप्तद्वारेऽत्र नगरे, सङ्केतमभिधाय च ।
प्रैषयं देवतावाक्यात्, तैरानीतोऽसि मेऽन्तिकम् ॥३२१॥

त्वां दृष्ट्वाऽथ भृशं मान-माप्ताः स्मो वयमप्यहो ! ।
इति ते कथितः सर्वो, वृत्तान्तोऽवितथो मया ॥३२२॥

यद्यत्र मिथ्या किमपि, भवेत् ते चरणं तदा ।
स्पृशामि राजराजेन्द्र-मौलिलालितसत्क्रम ! ॥३२३॥

अतो मे विनयं राजन् !, स्वीकृत्य मदभीप्सितम् ।
संसाधय, सतां यत्नः[३], परोपकृतये यतः ॥३२४॥

त्वं गतिर्नो न चाऽन्याऽस्ति, लज्जाऽस्माकं तवैव हि ।
हस्तेऽस्ति, न परो विद्याद्, यथा कुरु तथाऽचिरम्" ॥३२५॥

हिंसकाचरितं दीर्घं, विचार्य[४] निखिलं ततः ।
सिंहलाधिपतिं चन्द्रो, जगाद नयपूर्वकम् ॥३२६॥

'राजन् ! न घटतेऽनीति-मेवं कर्तुं तवाऽधुना ।
राजा चेत् कुरुतेऽन्यायं, जनः कं शरणं श्रयेत् ॥३२७॥

प्रेमलां परिणीयाऽपि, दद्यां पुत्राय ते कथम् ? ।
क्षत्रियोऽस्मि न तज्जातिं, कलङ्कयितुमुत्सहे' ॥३२८॥

---

१. 'प्रेमलां परिणेष्यति' इति पाठा० ॥ २. '-दूतकान्' इति पाठा० ॥ ३. 'मार्गः' इति पाठा० ॥ ४. 'विज्ञाय' इति पाठा० ॥

एवं चन्द्रवचः श्रुत्वा, राजामात्यौ विनीतवत् ।
छलेन प्रार्थनाभिश्च, तं वशीचक्रतुः क्रमात् ॥३२९॥

पश्चाद्विचार्य चन्द्रोऽपि, स्वीचकार वचस्तयोः ।
यच्छ्रुत्वा हर्षसंमग्नौ, राजामात्यौ बभूवतुः ॥३३०॥

अथ सिंहलभूपालो, विचित्राभरणैर्नृपम् ।
मण्डयामास विधिवद्, वरयोग्यैरनेकशः ॥३३१॥

हस्त्यश्वरथवाहादी-नलङ्कर्तुं समादिशत् ।
वाद्यशब्दोऽभवद् येन, रोदसी पूरिते भृशम्[1] ॥३३२॥

गजानां घण्टिकाशब्दै-रश्वानां भूषणस्वनैः ।
टनत्कारै रथानां च, शब्दाद्वैतमभूज्जगत् ॥३३३॥

पताकानां किङ्किणिकाः, सस्वनुर्दिवि संस्थिताः ।
देवान् विज्ञापयन्तीव, प्रेमलाचन्द्रसङ्गमम् ॥३३४॥

चन्द्रं दिदृक्षुश्चन्द्रोऽपि, कलाभिः परिपूरितः ।
समाजगाम, गम्भीरो, ढक्काशब्दो व्यजृम्भत ॥३३५॥

अलीनाह्वयता द्रष्टुं, चन्द्रोद्वाहक्षणं ध्रुवम्[2] ।
गजानां मदगन्धेन, व्यानशे जगतीतलम् ॥३३६॥

गजानां बृंहितैर्हेषा-रावैरासंश्च वाजिनाम् ।
जगद्व्याप्तैरन्यशब्दा-स्तिरोधानं गता बलात्[3] ॥३३७॥

विमलायाः पुरो लोका, वरं द्रष्टुं समागताः ।
स्पर्धयेव कृतानेक-नेपथ्याश्चारुदर्शनाः[4] ॥३३८॥

---

१. 'बधिरीकृते' इति पाठा० ॥ २. 'येन शब्देन साशङ्को, देवराजोऽप्यजायत' इति पाठा०॥ ३. 'जगद्व्याप्तैरनेकेषां, कर्णा बधिरतां गताः' इति पाठा० ॥ ४. 'विचित्रवेषा विविध-नेपथ्यवर- भूषिताः' इति पाठा० ॥

राजमार्गेऽथ यान्तं त-मूरीकृतवराह्वयम् ।
गवाक्षन्यस्तवक्त्राब्जाः, पश्यन्ति स्मैणलोचनाः[१] ।। ३३९ ।।
काचित् कृतार्द्धनेपथ्या, वरं वीक्षितुमुत्सुका[२] ।
काचित् स्खलद्वस्त्रहस्ता, समागात् परितो द्रुतम्[३] ।। ३४० ।।
लाक्षारञ्जितपादैका, नेत्रार्धकृतकज्जला ।
गृहकर्माऽसमाप्यैव, काचिदागात् त्वरान्विता[४] ।। ३४१ ।।
तासामाबालवृद्धानां, वृन्दैर्भूरि स्तुतो वरः ।
प्रतिरथ्यं विलम्ब्यैव, ययौ भूपस्य मन्दिरम् ।। ३४२ ।।
गन्धतैलावसिक्ताश्च, दीपास्तत्र शतं बभुः ।
किं द्रष्टुमागतास्तारा, नभस्तः पृथिवीतलम्[५] ।। ३४३ ।।
चन्द्रं दृष्ट्वाऽपरं भूम्या-मिव पौरा वरं चिरम् ।
निर्निमेषा बभुर्देवा, ध्रुवं तत्र समागताः[६] ।। ३४४ ।।

---

१. 'काचिद् गवाक्षजालेन, पश्यन्ती मृगलोचना । सिंहलेशतनूजोऽयं, प्रेमलां परिणेष्यति ।।' इति पाठा० ।। २. '-मङ्गना' इति पाठा० ।। ३. 'दर्शनोत्सुका' इति पाठा० ।।, इतोऽग्रे- ''नूपुरे मूर्ध्नि विन्यस्य, चूडारत्नं पदाम्बुजे । काञ्चीं कण्ठे समागच्छद्, हारं विन्यस्य सत्कटौ ।। लाक्षारसं नेत्रयुगे, कज्जलं चरणद्वये । (अत्र पाठान्तरम्- 'नूपुरे पदयोर्न्यस्य, चूडारत्नं च मूर्धनि । काञ्चीं कटौ समागच्छद्, हारं गलतले तथा ।। लाक्षारसं पदद्वन्द्वे, कज्जलं नयनद्वये ।) प्रयोज्य काचिदागच्छत्, प्रमदा संभ्रमान्विता ।। ३. उत्तरीयमधोदेशेऽन्तरीयं न्यस्य चोपरि ।'' इति निष्कासिताः श्लोका दृश्यन्ते ।। ४. 'लाक्षारञ्जितपादैका, जगामाऽऽलोकनोत्सुका । अयि ते स्रंसते वस्त्रं, कथमेषि ससंभ्रमम्' इति पाठा० ।। इतोऽग्रे- 'सखि ! यास्याम्यहमपि, क्षणं तिष्ठ समुत्सके !। इत्येवं युवतीवाक्यं, संशृण्वन् स महीपतिः ।।' इति निष्कासितः श्लोको दृश्यते ।। ५. 'गन्धतैलावसिक्तानां, दीपानां शतमाबभौ । किं द्रष्टुमागतः सूर्यः, किं चन्द्रः परिणेष्यति ।।' इति पाठा० ।। ६. 'सूर्ये सति कथं चन्द्रः, समागादिति नागराः। विवदन्ते मिथो लोका, वीक्ष्य तत्कौतुकं महत् ।।' इति पाठा० ।।, इतोऽग्रे- 'संवीजितानि मन्येऽहं, व्यजनानि पुनः पुनः । कनकध्वजभिन्नोऽयं, शंसन्तीव विरेजिरे ।।' इति निष्कासितः श्लोको दृश्यते ।।

यथा श्रुतस्तथैवाऽयं, चक्षुःकैरवचन्द्रमाः ।
प्रेमलायाः पूर्वजन्म-सुकृतैर्भविता वरः[१] ।।३४५ ।।

धन्यौ स्तः पितरौ याभ्यां, पुत्ररत्नममूदृशम् ।
उदपादयतां लोक-नेत्राऽऽसेचनकं क्षितौ[२] ।।३४६ ।।

नाऽस्य रूपस्य कलया-ऽप्यसर्जि मकरध्वजः ।
नो वाऽश्विनीकुमारौ वा, देवा अन्येऽपि किं पुनः ? ।।३४७ ।।

एवं प्रशस्यमानोऽसौ, पौरलोकैः पदे पदे[३] ।
बह्वाडम्बरतोऽगच्छद्, वरो मण्डपसन्निधिम् ।।३४८ ।।

सिंहलाधिपतिस्तद्वद्, हिंसको मन्त्रिसत्तमः ।
मण्डपान्तं समागच्छद्, वरेण सह सङ्गतः[४] ।।३४९ ।।

मङ्गलैर्गीतनृत्याद्यैः, स निन्ये मातृमन्दिरम्[५] ।
प्रेमलाऽपि सहाऽनेन, कृतमङ्गलमण्डना ।।३५० ।।

वरेण चन्द्रभूपेन, प्रेमलायाश्च सङ्गमः ।
रत्याः [६]पुष्पेषुणेवाभा-च्छच्या [७]गिरिभिदेव वा ।।३५१ ।।

इति लोका उल्लपन्तः, शुभाशिषमदुर्भृशम् ।
अखण्डभोगं भजता-माचन्द्रार्कं वधू-वरौ ।।३५२ ।।

अथ गुणावली-वीर-मत्यौ पुरमहोत्सवम् ।
दृष्ट्वा मण्डपमायातां, वधूवरविभूषितम् ।।३५३ ।।

---

१. 'पतिः' इति पाठा० ।। २. 'अहो विधातर्धन्योऽसि, धन्याऽस्य जननी तथा। यत्सर्गप्रसवालङ्कृत्, पुत्ररत्नं महीतले ।।' इति पाठा० ।। ३. 'गृहे गृहे' इति पाठा० ।। ४. इतोऽग्रे- 'महोत्सवः कृतस्तत्र, यस्तं देवगुरोरपि। गदितुं क्षमता नास्ति, किमुताऽन्यस्य कस्यचित्' इति निष्कासितः श्लोको दृश्यते ।। ५. ''मायरु' इति भाषायाम्' इति टि० ।। ६. 'कामेन' इति टि० ।। ७. 'इन्द्रेण' इति टि० ।।

इतो विवाहवेलायां, वेदविज्ञैः पुरोहितैः ।
वेद्यां वधू-वरौ [१]सार्ध-मानीतौ विधिपूर्वकम् ॥ ३५४ ॥

विवाहयाञ्चक्रुरुभौ[२], मन्त्रोच्चारणपूर्वकम् ।
न कदाचिद् विधिज्ञो हि, विधिं त्यजति शाश्वतीम् ॥ ३५५ ॥

इतो गुणावली श्वश्रू-मुवाच चकिता सती ।
'अयं वरस्तवैवाऽस्ति, पुत्रः सत्यं वदाम्यहम् ॥ ३५६ ॥

प्रेमला मेऽभवन्मातः !, सपत्नीह न संशयः ।
कथं वा तव पुत्रस्या-ऽभूदत्राऽऽगमनं वद' ॥ ३५७ ॥

तदा वीरमती प्राह, 'पुत्रि ! भ्रान्ताऽसि साम्यतः[३] ।
नाऽयं तव पतिः किन्तु, सैंहलः[४] कनकध्वजः ॥ ३५८ ॥

मया प्रागेव कथितं, चन्द्रादप्यस्ति रूपवान् ।
लोकोऽत्र भुवने पुत्रि !, स सम्प्रति विलोक्यताम् ॥ ३५९ ॥

सुप्रयुक्तेन मन्त्रेण, गारुडेणाऽहिवत् तव ।
पतिरस्ति कृतस्तम्भः, पुत्रि ! मा संशयं कृथाः[५] ॥ ३६० ॥

मुग्धे ! मुधा भ्रमो नैव, कर्तव्यश्चन्द्रगोचरः ।
लक्षाधिका जनाः पृथ्व्यां, वर्तन्ते तादृशाः किल' ॥ ३६१ ॥

एवं श्वश्रूवचः श्रुत्वा-ऽप्यसौ नैव गुणावली ।
प्रतीयाय हि प्रत्यक्षे, न प्रमाणमपेक्ष्यते ॥ ३६२ ॥

जामातृरूपं संप्रेक्ष्य, मकरध्वजभूपतिः ।
प्रहृष्टः प्रेमलाभाग्यं, प्रशशंस मुहुर्मुहुः ॥ ३६३ ॥

---

१. 'सम्यग्-' इति पाठा० ॥ २. '-ञ्चकारोभौ' इति पाठा० ॥ ३. 'संदेहं मा कृथा वृथा' इति पाठा० ॥ ४. 'सद्वरः' इति पाठा० ॥ ५. 'यथा गारुडमन्त्रेण, सर्पो भवति निर्विषः । तथा तव पतिः पुत्रि !, मन्त्रेण कीलितोऽस्ति हि ॥' इति पाठा० ॥

'पुत्री गुणवती यादृग्, भूपतेस्तादृशः[1] खलु ।
वरोऽयं निर्मितो धात्रे'-त्यूचुः पौरजनास्तदा[2] ॥३६४॥
हस्त्यश्वरथमुक्तादि-स्वर्णभूषणरूप्यकम् ।
वस्त्राण्यदाद् वराया-ऽऽशु महीपः करमोचने ॥३६५॥
जग्मतुः कौतुकागारं, सानन्दौ तौ वधू-वरौ ।
प्रेमला व्याजतः पत्यु-रालुलोके मुखाम्बुजम् ॥३६६॥
दध्यौ[3] 'देवसमानोऽयं, पतिर्मेऽजायत ध्रुवम् ।
भूयो भाग्यवती विद्ये, सर्वासु प्रमदास्वहम्' ॥३६७॥
तदा तस्या[4] दक्षिणाक्षि, पस्पन्देऽथ मुहुर्मुहुः[5] ।
भृशं ततः सा[6] विधुरा, बभूव क्षितिपाङ्गजा ॥३६८॥
तन्नैव प्रकटीचक्रे, धीरा सा प्रेमला तदा[7] ।
महतां सुखदुःखे हि, मनस्येव निमज्जतः ॥३६९॥
एवं वधू-वरौ तत्र, परिणाय्य महीपतिः ।
सोत्सवं याचकेभ्यश्च, सोऽन्नवस्त्रादिकं ददौ ॥३७०॥
ततः स्वर्णमयान् पाशान्, रहस्यादाय दम्पती ।
चिक्रीडतुश्चन्द्रभूपस्तत्र सङ्केतमातनोत् ॥३७१॥
सिंहलादिमहीपालो, न जानीत यथा तथा ।
श्लोकमेकमपाठीत् स, श्रीचन्द्रश्चतुराग्रणीः[8] ॥३७२॥

---

१. '-शी' इति पाठा० ॥ २. इतोऽग्रे- 'अमू वधूवरौ नित्य-मखण्डसुखभाजिनौ । भूयास्तामिति संप्रोचु-राशिषं नागरा जनाः ॥' इति निष्कासितः श्लोको दृश्यते ॥ ३. 'अहो' इति पाठा० ॥ ४. 'प्रेमलाया' इति पाठा० ॥ ५. '-ऽलं तदैव हि' इति, '-न्यन्न येन सा' इति च पाठा० ॥ ६. 'भृशं तदानीं' इति पाठा० ॥ ७. 'महाशया न तत् क्वाऽपि, प्राचकाशन्नृपात्मजा' इति पाठा० ॥ ८. 'समस्यां चन्द्रभूपालः, प्रारेभे वक्तुमेतदा' इति पाठा० ॥

'[1]आभापुरस्थश्चन्द्रोऽय-मुद्गतो विमलापुरे ।
अप्रार्थितस्य प्रेम्णोऽस्ति, निर्वाहो विधिहस्तगः' ।। ३७३ ।।

इत्युक्त्वा स झणत्कारं, पाशं राजाऽमुचद् द्रुतम् ।
परन्तु प्रेमला तस्य, वचनाद् विस्मिताऽभवत् ।। ३७४ ।।

'इदं किमुच्यतेऽनेन ?', चिन्तयन्ती हृदीत्यसौ ।
जिज्ञासमाना तस्यार्थ-मवोचत् पाशहस्तिका ।। ३७५ ।।

'[2]गगनस्थः शशाङ्कः स, विमलयामुदेतु तत् ।
येनैव विहितो योगः, सैव निर्वाहयिष्यति[2]' ।। ३७६ ।।

इत्युक्त्वा साऽऽनयत् पाशाञ्छ्रुत्वा तच्चन्द्रभूपतिः ।
'इयं नावगता[3] मेऽभि-प्रेतार्थमि'त्यचिन्तयत् ।। ३७७ ।।

गाथां प्रत्येकमुक्त्वैवं, रेमाते दम्पती ततः ।
बुबोधयिषुणा भावं, चन्द्रेणोक्तमिदं पुनः[4] ।। ३७८ ।।

'प्राच्यामाभापुरी नाम, नगरं सुमनोहरम्[5] ।
तत्र चन्द्रमहीपाल-स्तस्य वेश्मनि सुन्दरि ! ।। ३७९ ।।

विचित्ररत्नखचिताः, सन्त्यक्षा यादृशाः प्रिये ! ।
तादृशा न क्वचिद् देवि !, वीक्ष्यन्ते ते धरातले ।। ३८० ।।

तादृशाश्चेद् भवेयुस्ते, क्रीडेयं[6] तर्ह्यहं खलु ।
अन्यथा किं मुधैवेतां[7], रजनीमतिवाहयै' ।। ३८१ ।। कलापकम्

---

१. 'आभापुरम्मि निवसइ, विमलपुरे ससहरो समुग्गमिओ । अपत्थियस्स पिम्मस्स, विहिहत्थे हवइ निव्वाहो ।।' इति प्राकृतगाथा ।। २. 'वसिओ ससि आगासे, विमलपुरे उग्गमिओ जहा सुहं । जेणाभिभूओ जोगो, स करिस्सइ तस्स निव्वाहं ।।' इति प्राकृतगाथा ।। ३. 'नैवाबुद्ध' इति पाठा० ।। ४. 'एवं गाथाद्वयं शश्वद्, भणित्वा दम्पती अमू । चिखेलतुर्नृपस्तां स, बुबोधयिषुरित्यवक्' इति पाठा० ।। ५. 'वरीवर्ति मनोहरा' इति पाठा० ।। ६. 'दिव्येयं' इति पाठा० ।। ७. 'मुधैवाहं' इति पाठा० ।।

एवमुक्त्वाऽत्यजत्[१] पाशान्, प्रेमला तन्निशम्य च ।
दध्या'वसम्बद्धमिदं, कथं वदति मत्प्रियः[२] ।। ३८२ ।।

सिंहलात् पुरतोऽभ्येत्य, महोत्सवपुरस्सरम् ।
परिणीतोऽस्ति मामद्य, चन्द्रस्याऽवसरोऽत्र कः[३] ? ।। ३८३ ।।

प्राच्यामाभापुरी कुत्र ?, कुत्राऽसौ चन्द्रभूपतिः ।
पाशाः सरलाः क्व तस्य, संशेतेऽत्र मनो मम[४] ।। ३८४ ।।

सिंहलाधिपपुत्रस्य, मिषाद् वा[५] चन्द्रभूपतिः ।
मां पर्यणैषीदित्येत-द्वचनाल्लक्ष्यतेऽधुना' ।। ३८५ ।।

इत्येवं चिन्तयन्ती सा, क्रीडां परिसमाप्य च ।
मनोजसदृशं दृष्ट्वा[६], वरं कामवशाऽभवत् ।। ३८६ ।।

कायेन मनसा वाचा, लीना पत्यौ शुचिस्मिता ।
तदैव सात्त्विकं भावं, समगाद् रागसञ्चितम्[७] ।। ३८७ ।।

विस्मृतं च ततः सर्वं, वल्लभस्य वचस्तया ।
किन्तु चञ्चलचित्तः स, समैक्ष्यत सविस्मयम्[८] ।। ३८८ ।।

इतः सिंहलभूपालो, जगाद 'शृणु पुत्रक ! ।
उत्तिष्ठ यामिनी याम-शेषैव वर्ततेऽधुना ।। ३८९ ।।

---

१. '-ऽमुचत्' इति पाठा० ।। २. 'अयुक्तमेवं वदति, कथं मे प्राणवल्लभः।' इति पाठा० ।। ३. 'परिणीय हि मां तत् किं, नोच्यतेऽनेन साम्प्रतम् ।' इति पाठा० ।। ४. 'असम्बद्धमिदं जाने, संशयो जायतेऽत्र मे।' इति पाठा० ।। ५. 'किं' इति पाठा० ।। ६. '-सदृशाऽऽकारं, दृष्ट्वा' इति पाठा० ।। ७. 'मनोवाक्कायवचनै-र्लीना पत्यौ शुचिस्मिता । तदैव सात्त्विको भावः, प्रादुरासीत् तदन्तरे' इति पाठा० ।। ८. 'तथाऽपि विस्मरत्येषा, वल्लभस्य हि तद्वचः। उत्कण्ठितं पतिं ताव-दीक्षाञ्चक्रे प्रियं तदा ।।' इति पाठा० ।।

न ते सुदुर्लभं सङ्गं, मोक्तुं चित्तं भविष्यति ।
तथाऽपि पूर्ववृत्तान्तं, स्मृत्वोत्तिष्ठ गुणालय ! ।।३९० ।।

यथा न कोऽपि जानीयात्, तथा कुरु दयाम्बुधे !'।
इति तद्वचनं श्रुत्वा, चन्द्रो गन्तुं मनो दधे ।।३९१ ।।

यथा न सागरो वेला-मुल्लङ्घयति कर्हिचित् ।
तथा नैव प्रतिज्ञातं, स्वार्थे सत्यपि सत्यवाक्[१] ।।३९२ ।।

दृढप्रतिज्ञस्तच्चन्द्रः[२], परिणीय नृपाङ्गजाम् ।
त्यक्तुं नहि मनाक् खेदं, चकार सत्त्वसंस्थितः ।।३९३ ।।

अथ प्रातर्महीपालो[३], रथारूढस्तया सह ।
ददद्वित्तं याचकेभ्यः, सिंहलेशगृहं ययौ ।।३९४ ।।

तौ दम्पती पुनस्तद्व-देकान्तेऽतिष्ठतां ततः ।
प्रेमला चञ्चलं दृष्ट्वा-ऽचिन्तयन्निजवल्लभम् ।।३९५ ।।

'पाणिग्रहणवेलायां, दृष्टः प्रियतमो यथा ।
तथा न साम्प्रतं किन्तु, विलक्षणतरः कुतः[४] ?' ।।३९६ ।।

इतः सिंहलभूपालः, संज्ञया तमजूहवत् ।
तज्ज्ञात्वा चन्द्रभूपाल-श्चिन्तयामास चेतसि[५] ।।३९७ ।।

सम्पन्नः स्वार्थ एतस्य, विसिसृक्षति मां ततः ।
किन्त्वहं विस्मरिष्यामि, वृत्तमेतं कथं श्वसन्[६] ।।३९८ ।।

---

१. 'प्रहारं सहते नैव, वेगवानश्वपुङ्गवः । तथा न सत्यवाक् वाक्य-विपरीतं करोति हि।।' इति पाठा० ।। २. '-स्तद्रूपः' इति, 'वाक्यबद्धः स भूपालः' इति च पाठा० ।। ३. 'चन्द्रमहीपालो' इति पाठा० ।। ४. '-तरोऽधुना' इति पाठा० ।। ५. 'संज्ञया सिंहलेशस्त-माजुहाव क्षितीश्वरम् । अथ ज्ञात्वा महीपाल-श्चिन्तयामास चेतसि ।।' इति पाठा० ।। ६. 'सम्पन्नः स्वार्थ एतेषां, व्यसृजन् मां ततो नृपः ('विससर्जेति मां ततः' इति पाठा०) । परन्तु जीवनं यावद्, विस्मरिष्यामि नेत्यहम् ।।' इति पाठा० ।।

तस्याऽमूं च स्मृतं सद्यो-ऽपरमातृविचेष्टितम् ।
ननर्त विमलावृत्तं, पुनस्तद्धृदयाङ्गणे[1] ॥३९९॥

इति चिन्तासमाचान्त-स्वान्तोऽशान्त इव क्षणम् ।
तस्थौ पुनर्नृपश्चेतः, समाधाय व्यचारयत् ॥४००॥

यथा न वृक्षमादाय, गच्छेतां ते तथा मया ।
विधातव्यं न चिन्ताभिः, कालक्षेपो हितो मम[2] ॥४०१॥

निश्चित्यैवमथो चन्द्रः, स्वनिर्मोकमिवोरगः ।
त्यक्त्वा तां प्रस्थितो यावत्, सा तावत् तमवोचत[3] ॥४०२॥

'नाथ ! कस्मादतीवाऽसि, चञ्चलो गच्छसि क्व नु ?' ।
'देहचिन्ताकृते यामि, बहिरि'त्यवदन्नृपः ॥४०३॥

निशम्य जलमापूर्य, भृङ्गारे साऽचलत् समम् ।
निवारिताऽपि नो पत्युः, सङ्गं तत्याज भामिनी ॥४०४॥

अवकाशमनासाद्य, ततः पुनरगाद् गृहम् ।
तावद्धिंसक आगत्यो-वाच तं चन्द्रभूपतिम् ॥४०५॥

'राजन् ! रात्रिरियं यावत्, तावत् सुखमवाप्नुहि ।
उदिते पद्मिनीनाथे, स्वरूपं त्वं प्रकाशयेः' ॥४०६॥

इत्येवमुक्तिमाकर्ण्य[4], चन्द्रो द्वारमुपागमत् ।
छायेव देहं तं नैव, शङ्किता सा व्यमुञ्चत ॥४०७॥

---

१. 'वृत्तान्तमिति सञ्चिन्त्या-ऽपरमातृविचेष्टितम् । ननर्त विमलावृत्तं, चन्द्रस्य हृदयाङ्गणे ॥' इति पाठा० ॥ २. 'विधातव्यं कृतं स्नेहै-रनया सह मेऽधुना ।' इति पाठा० ॥ ३. 'यथोरगः स्वनिर्मोकं, मुञ्चत्यवनिपस्तथा । तामुपेक्ष्य स्थितो यावत्, तावत् सा तमवोचत ॥' इति पाठा० ॥ ४. 'इत्यन्योक्तिं समाकर्ण्य' इति पाठा० ॥

प्रेमरश्मिनिबद्धस्तां मोक्तुं, चन्द्रोऽपि नाऽशकत् ।
करे गृहीत्वा भवने, समानयत सा पतिम् ॥४०८॥
प्रार्थनाभिरनेकाभिः, पर्यङ्के विनिवेश्य तम् ।
बद्धाञ्जलिपुटा कान्तं, विनयादित्यजिज्ञपत् ॥४०९॥
"क्षणे क्षणे कथं स्वामिं-श्चाञ्चल्यमवलम्बसे ? ।
सङ्गमे प्रथमेऽपि त्वं, कथं छलयसेऽत्र माम् ॥४१०॥
प्रथमे कवले स्वामिन् !, मक्षिका निपतेद् यदि ।
तदा का भोजने [१]प्रीति-र्जायेताऽशनशालिनः ? ॥४११॥
इत्थं मामबलां नाथ !, कथं त्यजसि निष्ठुरः ।
आदावेव, कुतः[२] पश्चात्, स्नेहो वृद्धिमुपैष्यति ? ॥४१२॥
अतश्चञ्चलतां त्यक्त्वा, प्रेमबन्धं कुरुष्व मे ।
मिलितुं भवता नाथ !, भृशमुत्कण्ठते मनः[३] ॥४१३॥
यथादेशमहं नाथ !, करिष्ये नाऽत्र संशयः ।
वृथैव मां कथं चिन्ता-ज्वरेण दहसि प्रभो ! ॥४१४॥
इयं ते सर्वसम्पत्ति-रधीनाऽस्ति न संशयः ।
स्निग्धाश्च सर्वे वर्तन्ते, स्वजनास्त्वयि सर्वथा[४] ॥४१५॥
तवाऽस्मि किङ्करी त्वं च, ममाऽसि हृदि देवता ।
एवं स्थिते प्रियाऽऽख्याहि, कारणं किं तवाऽरतेः[५] ॥४१६॥

---

१. 'को भोजने स्वादः' इति पाठा० ॥ २. 'कथं' इति पाठा० ॥ ३. इतोऽग्रे- 'ये द्वे गाथे त्वया पूर्वं, कथिते हि तयोरहम् । जानाम्यर्थमतो न त्वां, मोक्ष्यामि हृदयङ्गमम् ॥ चन्द्राननचकोरीं मा-माश्वास्य हि कथं पुनः । निराशयति दीनां त्व-माग्रहं त्यज सुन्दर ! ॥" इति निष्कासितौ द्वौ श्लोकौ दृश्येते ॥ ४. 'इयं ते सर्वसम्पत्तिर्वचनाऽऽचरणक्षमा । अहं त्वच्चरणाम्भोज-भ्रमर्येवाऽस्मि सर्वदा ('सम्प्रति' इत्यपि पाठा०)' इति पाठा० ॥ ५. 'उपानदिव पादस्य, तवाऽहं मौलिभूषणम्। असि नाथ ! पुनः कस्मान्नोच्यते प्रेमवागहो ॥, इतोऽग्रे- 'सिंहलं नगरं क्वास्ति ?, क्वास्तीयं विमलापुरी । दैवयोगात् समुत्पन्न, आवयोः सङ्गमः प्रभो ! ॥' इति निष्कासितः श्लोको दृश्यते ॥

न तेऽस्त्यविदितं किञ्चि-च्चरित्रं मम साम्प्रतम् ।
प्रतार्याऽपि न मां शोभां, प्राप्स्यसि त्वं मनागपि ।।४१७ ।।

मानिन् ! मानं त्यजेदानीं, शरण्यो न भवेर्यदि ।
तदा किं ते यशो लोके, भविष्यति गुणाकर ! ।।४१८ ।।

न च ते श्वशुरो दातुं, कार्पण्यमवलम्बते ।
तथापि यदि ते याच्यं, वर्तते तर्हि तद्वद[1] ।।४१९ ।।

शारिपाशकवेलायां, यत् त्वयाऽवादि तन्मया ।
ज्ञातं सर्वं न संदेहो, विस्मर्येत न कर्हिचित् ।।४२० ।।

यदि मां छलयित्वा त्वं, गमिष्यसि तथाऽप्यहम् ।
मिलिष्याम्येव जाने हि, प्राच्यामाभापुरी तव" ।।४२१ ।।

चन्द्रोऽवदत् 'कथङ्कारं, निर्बन्धः क्रियते त्वया ।
ज्ञायेते ह्रासवृद्धी नो, विधिलेखस्य सुन्दरि ! ।।४२२ ।।

न ते कथयितुं योग्या, वार्ताऽस्ति वरवर्णिनि ! ।
अतो धैर्यं समास्थाय, चित्तस्थैर्यं विधीयताम् ।।४२३ ।।

यदि तिष्ठामि नो वाक्यं, सत्यं स्याद् यामि तर्ह्यहम् ।
स्नेहबन्धः स्थिरो न स्यात्, किं करोम्यधुनाऽवशः ।।४२४ ।।

---

१. इतोऽग्रे- 'जामाताऽनुरुणद्ध्येतं, शावको ('लघुः' इत्यत्र टीप्पणी) यदि तत्क्षमम् । न तु स्वार्थं विनैवाऽस्य, रोषो हि शोभते क्वचित् ।। रुदतोऽपि स्वभार्यादींस्त्यजन्ति मुनिपुङ्गवाः । भवादृशास्तु न क्वाऽपि, शृङ्गाररसरागिणः ।। किन्त्वयं समयो नाथ !, शृङ्गाररसवर्त्मना । देवदेवस्य कामस्य, समाराधनभाजनम् ।।' इति त्रयः श्लोका निष्कासिता दृश्यन्ते ।।

छुच्छुन्दरी यथा सर्पं, गिलित्वाऽज्ञानतस्तथा ।
परितप्याम्यहं पश्चा-द्धिंसकच्छलतोऽधुना' ॥४२५॥

तथापि प्रेमला न स्म, मन्यते लवमप्यहो ।
प्रेमबन्धो जितो येन, जितकाशी[1] स मानवः ॥४२६॥

चन्द्रवस्त्राञ्चलं नैवा-ऽमुञ्चत प्रेमला वधूः ।
चन्द्रेण विविधैर्वाक्यै-र्बोधिताऽपि विशङ्किता ॥४२७॥

इतो यथार्थनामा स, हिंसकः समुपागतः ।
कठोरवचनैश्चन्द्रं, निर्गन्तुमवदच्छली ॥४२८॥

तच्छ्रुत्वाऽऽत्ताञ्चलं राजा, मोचयित्वा बहिर्निरैत् ।
सहन्ते जातु नो धीरा, वचनं परुषं यतः ॥४२९॥

प्रेमला मन्त्रिणं दृष्ट्वा, लज्जातोऽन्तः समाविशत् ।
चन्द्रः सिंहलभूपाल-मुपेत्य न्यगदत् सुधीः ॥४३०॥

'यत्कर्तव्यं कृतं सर्वं, मया किन्तु विशां पते ! ।
रोरुद्यमानाया अस्या, लज्जा सम्प्रति ते करे' ॥४३१॥

इत्युक्त्वा खड्गमादाय, समागाद् वृक्षसन्निधौ ।
गुहायां केसरीवाऽसौ, कोटरे समुपाविशत् ॥४३२॥

अथ वीरमती तत्र, वधूयुक्ता समागमत् ।
आमन्त्र्य वृक्षमारुह्य, चचालाऽऽभापुरीं प्रति ॥४३३॥

अर्धयामावशेषे च, वृक्षो[2] रात्रेस्ततोऽचलत् ।
मार्गे वीरमती प्राह, वधूं दृष्ट्वा समुत्सुकाम् ॥४३४॥

'कीदृशी नगरी दृष्टा ?, कीदृशः कनकध्वजः ? ।
कीदृशं कौतुकं दृष्टं, वद सुन्दरि ! मे वधु ! ॥४३५॥

---

१. 'जितशत्रुः' इति टि० ॥ २. 'वृक्षे' इति पाठा० ॥

नाऽऽगमिष्यस्तदाऽद्रक्ष्यः, कथं दृश्यममूदृशम् ।
प्रत्यहं दर्शयेयं चे-दन्विया मे वचस्तदा ॥४३६॥

मत्तः परः कोऽपि नास्ति, गगने गमने क्षमः ।
पतत्रिणोऽपि गच्छन्ति, दिवि द्वादशयोजनीम् ॥४३७॥

चारणर्षिं विना मत्तो[१], निःसीमगमनेऽधिकः[२] ।
कोऽस्ति ? यत्र हि नो[३] वायो-र्गतिस्तत्रापि मे गतिः ॥४३८॥

यत्कार्यं विधिना न स्यात्, तत्कार्यं मन्त्रशक्तितः ।
कर्तुं शक्यं, समस्तं मे, वरीवर्ति वशे जगत्' ॥४३९॥

गुणावली ततः प्रोचे, 'श्वश्रु ! सत्यं वचस्तव ।
प्रत्यक्षे न प्रमाणस्य, ह्यपेक्षा भवति क्वचित् ॥४४०॥

किन्तु मे संशयो मातः, प्रेमलापरिणायकः ।
सत्यं तवैव तनयो, नाऽन्यस्तन्निश्चितं मया' ॥४४१॥

निशम्य न्यगदच्छ्वश्रू-'मुग्धे ! ते प्रबलो भ्रमः ।
जातुचित् तनयो मे न, गर्ह्येतैवं त्वया क्वचित् ॥४४२॥

यं यं त्वं सुन्दरं बाल, ईक्षेथास्तं निजभ्रमात् ।
'चन्द्र एवाऽयमि'त्येवं, कथयेः किं जनं वधु !' ॥४४३॥

एवं तयोरालपन्त्यो-रभूत् ताम्रशिखध्वनिः ।
सपत्नीपद्मिनीद्वेषा-दिव प्राच्यरुणाऽभवत् ॥४४४॥

वृक्षस्य कोटरे लीनं, भान्तं चन्द्रं विडम्बयन् ।
दिशं प्रतीचीमास्थाय, चन्द्रोऽलक्ष्यत्वमाप्तवान्[४] ॥४४५॥

---

१. 'मां वा' इति पाठा० ॥ २. 'प्रभुः' इति पाठा० ॥ ३. 'कोऽप्यस्ति ? यत्र नो' इति पाठा० ॥ ४. 'वृक्षस्य कोटरे यद्वच्चन्द्रो राजति सम्प्रति । प्राच्याः क्रोडे सहस्रांशुरुदगात् तद्वदेव हि ॥' इति पाठा० ॥

अरुणां प्राग्दिशं बालां, तमोहालाहलावलिम् ।
पिबन्तीमिव दृष्ट्वोच्चैः, खगाः कोलाहलं व्यधुः ॥४४६ ॥

प्राचीं सपत्नीमालोक्य, तादृशीं पद्मिनी पुनः ।
दिवाकरकरालम्बा-द्धसन्तीव बभौ तदा ॥४४७ ॥

विकाशिकमलोत्सङ्ग-स्फुरत्परिमलावहः ।
प्रससार शनैर्वायुः, प्राचीं स्वस्थयितुं किमु ? ॥४४८ ॥

अथ ते वाटिकामध्ये, वृक्षादुत्तेरतुः क्षितौ ।
कोटरस्थं न दैवेन, चन्द्रं ददृशतुस्तदा ॥४४९ ॥

गतयोः स्नातुममुयो-र्वाप्यां चन्द्रमहीपतिः ।
उत्तीर्य वृक्षात् स्वं वेश्म, समागाच्चकिताशयः ॥४५० ॥

अन्यवेषं विधायाऽसौ, सुष्वाप शयने ततः ।
छलेन निद्रामास्थाय, [1]भार्याकपटमीक्षितुम् ॥४५१ ॥

श्वश्रू-वध्वावितः स्नात्वा, संप्रहृष्टतरे गृहम् ।
आगच्छतां ततः श्वश्रूः, शाखां दत्त्वाऽवदद् वधूम् ॥४५२ ॥

'अनया ताडय पतिं, येनाऽसौ जागरिष्यति' ।
गुणावली तामादाय, पतिमन्दिरमाविशत् ॥४५३ ॥

[2]पौराणामहरन्निद्रां, वीरमत्यपि तत्क्षणे ।
येन स्म प्रतिबुध्यन्ते, चिरस्वापाज्जना लघु[3] ॥४५४ ॥

बभूवुश्चाऽखिला लोकाः, स्वस्वकार्यपरायणाः ।
रात्रिवृत्तं न केनाऽपि, ज्ञायते स्म मनागपि ॥४५५ ॥

---

१. 'वधू-' इति पाठा० ॥ २. 'नागरस्याऽ-' इति पाठा० ॥ ३. 'सकला नागरा जनाः' इति पाठा० ॥

गुणावली समागत्य, पतिमालोक्य निद्रितम् ।
'अहो पापीयसी श्वश्रूः, पतिं मे स्वापयत्यसौ' ।।४५६ ।।

विचिन्त्यैवं निजं कान्तं, ताडयामास शाखया ।
राजाऽऽलस्यपरीताङ्ग, इव तस्थौ निजासने ।।४५७ ।।

मुग्धेव राज्ञी राजान-मुवाच मधुरस्वरैः ।
'स्वामिन् ! गता निशा प्रात-र्जातं सम्प्रति बुध्यताम् ।।४५८ ।।

प्रभातं सूचयन् दिक्षु, रवीति चरणायुधः[१] ।
उत्तिष्ठाऽतो न मतिमा-ञ्छेते सूर्योदये सति ।।४५९ ।।

सूर्योदये शयानस्य, तन्द्रालोः पुरुषस्य हि ।
वीर्यधैर्ये न भवत-स्तस्माज्जागृहि मे प्रभो ! ।।४६० ।।

निरुद्यमो जनः सर्वं, निद्रया गमयत्यहः ।
प्राभातिकोऽयं समयो, महापुण्यमयः सदा[२] ।।४६१ ।।

उत्तिष्ठ नाथ ! सूर्योऽपि, समागादुदयाचले ।
प्राभातिकं मुखाब्जं स्वं, दर्शयस्व ममाऽधुना ।।४६२ ।।

अहं गङ्गाजलैः पूर्णं, भृङ्गारं धारयामि ते ।
आचम्यतां प्रभो ! राज्ञो, व्यायामसमयोऽधुना ।।४६३ ।।

आर्यपुत्र ! प्रबुध्यस्व, सभां कर्तुं क्षणस्तव ।
अयं चेच्छृणुयान्माता, क्रोधं त्वयि विधास्यति' ।।४६४ ।।

---

१. 'अयं जागर्ति सर्वस्मात्, प्रथमं चरणायुधः ।' इति पाठा० ।। २. इतोऽग्रे- "नाथ ! रात्रिरियं व्यर्थं, विलासेन विनाऽगमत् । अशयानैव या सर्वा, निशेयं गमिता मया ।। बोधितोऽपि मया शश्वन्नाबुद्धाः प्रियवल्लभ !। अस्वस्थता ते किं वाऽन्यां पर्यणैषीः कुमारिकाम् ।।" इति निष्कासितौ द्वौ श्लोकौ दृश्येते।।

इत्येवं वनितावाक्यं, श्रुत्वा राजा ससम्भ्रमम् ।
जहौ कपटनिद्रां द्राक्, प्रत्युवाच प्रियां प्रति ॥४६५॥

'रात्रौ वृष्टिरभूत् तस्मा-दालस्येन प्रिये ! मम ।
शयानस्य गतः पुण्य-मयोऽयं समयः किल ॥४६६॥

न ज्ञातः समयोऽस्माभिः, सूर्योऽप्युदयमागतः ।
अहो प्रमादवशतो, नरः किमपि वेत्ति नो[१] ॥४६७॥

आलस्यजालसंमग्नाऽऽकृतिरस्ति तवाऽपि यत्[२] ।
तेनाऽद्य रममाणा त्वं, क्वाऽप्यासीरिति लक्ष्यते ॥४६८॥

क्व क्रीडितं त्वया रात्रौ, वद तन्मे पुरः प्रिये ! ।
पश्चात् तत्र च संजातं, कौतुकं ब्रूहि सत्यतः' ॥४६९॥

इति राज्ञो वचः[३] श्रुत्वा, देव्युवाच विशङ्किता[४] ।
'जानामि क्रीडनं नाऽहं, किञ्चिन्नाथ ! त्वया विना[५] ॥४७०॥

त्यक्त्वा त्वां च कथं[६] यायां, त्वमेव क्वाऽपि निश्यहो ।
रन्तुं गत इवाऽऽभासि, निद्रया तन्द्रयाऽपि च ॥४७१॥

अबलाऽहं कथं रात्रौ, तवाऽऽज्ञामन्तरेण हि ।
बहिर्गन्तुं समर्थाऽस्मि, स्वामिन् ! सत्यं प्रतीयताम्' ॥४७२॥

राजा तद्वचनं श्रुत्वा-ऽचिन्तयद् वनिताऽसकौ ।
न वामा, किन्तु मे वामा, विमाताऽस्ति न संशयः ॥४७३॥

---

१. इतोऽग्रे- 'आकृत्यैव तवाऽऽभाति, रात्रिजागरणं प्रिये ! । विशेषतो महत् प्रेम, दृश्यते मयि तेऽद्य हि ॥' इति निष्कासितो श्लोको दृश्यते ॥ २. '-ऽऽकृतिस्ते भाति सम्प्रति' इति पाठा० ॥ ३. 'राजवचः' इति पाठा०॥ ४. 'मया नहि' इति पाठा० ॥ ५. 'जानामि क्रीडनं स्वामिंस्तव पादसरो-रुहम्' इति पाठा०॥ ६. 'विहाय त्वां कथं' इति पाठा० ॥

रात्रिमात्रप्रसङ्गेन[1], शङ्कनीया व्यजायत ।
वनितेयं नैवमासी-दकुलीनोचितक्रिया[2] ।।४७४ ।।

नारिकेलाप्प्रसङ्गेन, घनसार इवाऽधुना[3] ।
श्वश्र्वाः सङ्गेन जातेय-मनिष्टगुणसङ्कुला[4] ।।४७५ ।।

यथाऽङ्गारः शीतलोऽपि, स्प्रष्टुः श्यामीकरोति हि ।
उष्णश्च तापयत्यङ्गं, तथा दुर्जनसङ्गमः ।।४७६ ।।

स्त्रियो जलं खड्गलता, नेत्रमश्वो महीपतिः ।
यद्वद् विधीयते तद्वद्, भवतीति न संशयः ।।४७७ ।।

कीटोऽपि भ्रमरीसङ्गात्, स्वां तनुं परिवर्त्य हि ।
शरीरान्तरमाप्नोति, संसर्गः किं करोति न ? ।।४७८ ।।

ध्यात्वैवमथ सोवाच, 'प्रिये ! सत्यं वदाऽधुना[5] ।
विचित्रवेषमाधाया-रंस्था वीतनिशि क्व नु ? ।।४७९ ।।

निशम्य पतिवाक्यं सा, सद्यो मनसि कल्पितम्[6] ।
वृत्तं वक्तुं समारेभे, दुष्क्रिया हि छलप्रसूः[7] ।।४८० ।।

"वैताढ्यपर्वते नाम्ना, विशालाऽस्ति पुरी प्रिय ! ।
तत्र विद्याधरस्वामी, मणिप्रभ इति स्मृतः ।।४८१ ।।

चन्द्रलेखा प्रिया तस्य, तया सह सुखं सदा ।
अन्वभूत् स्वगुणग्राम-वशीकृतनभश्चरः ।।४८२ ।।

---

१. 'रात्रिमात्रं हि सङ्गेन' इति पाठा० ।। २. ' वनितेयं न वामाऽऽसीत् कदापि वशगा मम' इति पाठा० ।। ३. 'कर्पूरोऽपि विषं यथा' इति पाठा० ।। ४. '-मविश्वास्या तथाऽधुना' इति पाठा० ।। ५. 'प्रिये ! स्त्रियाश्चरित्रं त्वं, विहायाऽवितथं वद' इति पाठा० ।। ६. 'किञ्चिन्नूतनकल्पितम्' इति पाठा० ।। ७. 'पतिं वञ्चयितुं सुधीः' इति पाठा० ।।

तीर्थयात्रां गुरोरास्या-न्निशम्य वनितासखः ।
विमानवरमारुह्य, जातश्रद्धोऽकरोदसौ ।।४८३ ।।
भगवन्तं प्रणम्याऽसौ, परावर्तितुमैहत ।
यावत् तावद् विमानोऽस्य, झञ्झावातेन कुण्ठितः ।।४८४ ।।
आभामागत्य यत्नेना-ऽप्यतो गन्तुं न सोऽशकत् ।
इति संदृश्य पप्रच्छ, स्वामिनं तस्य वल्लभा ।।४८५ ।।
'नाथाऽप्रावृष्यपि कुतो, देवो वर्षति सम्प्रति ।
अत्र कस्माद् विमानस्ते, कुण्ठितोऽभूद् वदस्व तत्' ।।४८६ ।।
स उवाच 'प्रिये ! नैतद्, वक्तव्यं भवति क्वचित् ।
किञ्च मोघं न वक्तव्यं, परकीयवचो मनाक्' ।।४८७ ।।
तदा निर्बन्धमत्यन्तं, चकाराऽसौ पतिं प्रति ।
विवेकरहितस्त्रीणां, निर्बन्धो हि प्रवर्तते ।।४८८ ।।
तदोवाचा'ऽत्र राजाऽस्ति, चन्द्राख्यो वरसुन्दरि ! ।
ततो वैराच्च देवेन[1], रचितोऽयं घनाघनः ।।४८९ ।।
तस्य पुण्यप्रभावेण, मद्विमानोऽत्र कुण्ठितः' ।
इति पत्युर्वचः श्रुत्वा, प्रोवाच विनयात् पतिम् ।।४९० ।।
'नाथाऽऽभानगराधीशो, दुःखान्मुक्तो यथा भवेत् ।
तथा त्वया विधातव्यं, धर्मस्याऽऽयतनं हि सः' ।।४९१ ।।
सोवाचा'ऽहमशक्तोऽस्मि[2], किन्तु माताऽस्य मद्वचः ।
कुर्यात् तदाऽनुतिष्ठेय-मुपायं येन शं भवेत्[3]' ।।४९२ ।।
इत्युक्त्वा च[4] ततः शीघ्रं, वीरमत्या गृहेऽसकौ ।
समागात् तत्पुरः सर्वं, कथयामास खेचरः ।।४९३ ।।

---

१. 'विरोधात् केन देवेन' इति पाठा० ।। २. 'नाऽहं मोचयितुं शक्तः' इति पाठा० ।। ३. 'मोक्ष्यसे' इति पाठा० ।। ४. 'इत्युवाच' इति पाठा० ।।

'देवि ! ते तनयस्याऽद्य, महद्भयमुपस्थितम् ।
अतो भक्त्या शान्तिनाथं, स्तुहि दुःखनिवारकम् ।।४९४ ।।

पञ्चमङ्गलदीपैश्च, पुष्पाञ्जलिशतेन च ।
विद्याधरीयं राज्ञी च, त्वं च गायत सम्प्रति ।।४९५ ।।

यावत् प्रभातं भवति, तावदाराध्नुताऽखिलाः ।
पश्चात् सुप्तं महीपालं, शाखया ताडयाऽनया ।।४९६ ।।

येनाऽसौ निद्रया मुक्तः, सज्जः स्थास्यति भूपतिः' ।
इति तद्वचनात् सर्वा, वयं भक्त्या प्रभोर्गुणान् ।।४९७ ।।

गायन्त्यः सकलां रात्रिं, जाग्रत्यस्त्वत्कृते प्रिये[1] ! ।
अयापयामस्त्वां प्रात-र्बोधयित्वाऽगमत् खगः ।।४९८ ।। युग्मम्

इति सर्वं तवाऽग्रेऽहं, रजनीचेष्टितं प्रिय !" ।
यथावदवदं तर्हि, तच्छ्रुत्वा न्यगदन्नृपः ।।४९९ ।।

"चतुरे ! सत्यवचनं, तव नाऽस्त्यत्र संशयः ।
पतिव्रता सदा पत्युः, कल्याणे यतते यतः[2] ।।५०० ।।

मदर्थं यच्च ते कष्ट-मभूत् तेन प्रियंवदे ! ।
मयि प्रीतिरनिन्द्या ते-ऽहं जाने नाऽत्र संशयः[3] ।।५०१ ।।

परन्तु सत्प्रभोर्भक्तिः, कुतः स्याद् भाग्यतो विना ।
पुराकृतेन पुण्येन, देवो हि स्मिर्यते नृभिः[4] ।।५०२ ।।

---

१. 'पते !' इति पाठा० ।। २. इतोऽग्रे- 'माता सूनोः प्रिया पत्यु-र्मङ्गलाय सदैव हि । यतते तत्र किं चित्रं, विश्वस्येयं व्यवस्थितिः ।।' इति निष्कासितो श्लोको दृश्यते ।। ३. 'ऽहंजानेऽनेन कर्मणा' इति पाठा० ।। ४. 'न भाग्येन विना देवि! देवस्मरणमाप्यते' इति पाठा० ।।

देवदेवे यदा जातु, भक्तिर्भवति निर्मला ।
संसारसागरस्याऽपि, पारं तर्ह्येति मानवः ॥५०३॥

यस्मात् प्रभोर्गुणा गीता-स्त्वया तस्माददो निशि ।
स्वप्नोऽभून्मे महाश्चर्य-कारकः शृणु तं प्रिये ! ॥५०४॥

त्वं श्वश्रूसहिता रात्रौ, विमलानगरीमितः ।
गता तत्र च दृष्टाऽपि, विवाहं समहं प्रिये[१] ! ॥५०५॥

इत्येवं यावता दृष्टं, तावन्मां त्वमबोधयः ।
इति स्वप्नस्य महिमा, वद कीदृग् भवेत् प्रिये ! ॥५०६॥

त्वद्वाक्यस्यास्य स्वप्नस्य, विरोधो दिनरात्रिवत् ।
किं सत्यं ? किं मृषाभूतं ?, निश्चिनोति मनो न मे[२] ॥५०७॥

स्वप्नो मिथ्या भवेद् यस्मान्मृषादृष्टान्ततः प्रिये ! ।
स एव कथ्यते लोकै-स्तस्मात् सत्यं वचस्तव" ॥५०८॥

एवं राज्ञो वचः[३] श्रुत्वा, चकिताऽपि स्थिरेव सा[४] ।
पत्युर्मनः समाध्यर्थ-मेकं दृष्टान्तमूचुषी[५] ॥५०९॥

'तथाहि-"शृणु स्वामिन्नधिष्ठाने, कस्मिंश्चिच्छिवसेवकः ।
स्वप्ने मोदकसम्पूर्णं, मन्दिरं दृष्टवान् स्वकम्[६] ॥५१०॥

सहसोत्थाय सर्वेषां, ब्राह्मणानां निमन्त्रणम् ।
कृत्वा यावदगात् तत्र, तावत् किञ्चिन्न सैक्षत ॥५११॥

तदाऽसौ हृदये चिन्ता-मकरोत् किमु शङ्करः ।
अगृह्णान्मोदकं सर्वं, किमु मे मतिविभ्रमः ॥५१२॥

---

१. 'गतवत्यसि कस्याऽपि, विवाहोऽदृश्यत त्वया ।' इति पाठा० ॥ २. 'तथाऽपि मम निश्चयः' इति पाठा० ॥ ३. 'पतिवचः इति पाठा० ॥ ४. 'विस्मिता सा गुणावली' इति पाठा० ॥ ५. 'पतिं वञ्चयितुं भूयः, प्रबन्धमकरोत्नवम् ।' इति पाठा० ॥ ६. 'प्रव्यलोकयत्' इति पाठा० ॥

ध्यायन्नेवं [1]मन्दिरस्या-ऽररं संयन्त्र्य स द्विजः[2] ।
अलक्षितः सन् सुष्वाप, द्विजभीतेर्विमूढधीः[3] ।।५१३ ।।

दिनावसाने -ते सर्वे, ब्राह्मणाः समुपागताः ।
निमन्त्रिताः शिवागारा-ऽररं बद्धं व्यलोकयन् ।।५१४ ।।

'अरेरे मूर्ख ! भोज्यस्य, विलम्बं कुरुषे कथम् ।
उत्तिष्ठ भोजयाऽस्मांस्त्वं, बुभुक्षून् ब्राह्मणान् द्रुतम् ।।५१५ ।।

न च भोज्यस्य कोऽप्यत्र, पदार्थो दृश्यते तव ।
उपहासः कृतः किं वा ?, वद सत्यं नराधम !' ।।५१६ ।।

ततः स न्यगदद् 'यूयं, मौनमाश्रयत क्षणम्[4] ।
स्वप्ने मोदकसम्पूर्णं, मन्दिरं वीक्ष्य भोजये[5] ।।५१७ ।।

श्रुत्वैतद्वचनं सर्वे[6], प्रोचू 'रे ! स्वाप्निकैः कथम् ।
मोदकैः क्षुन्निरस्येत, कदाचिदपि कस्यचित् ?' ।।५१८ ।।

इत्युक्त्वा ते निजावासं, जग्मुर्द्विजवरास्ततः ।
इत्थं स्वप्नस्य महिमा, जायते प्राणवल्लभ ! ।।५१९ ।।

अतो नाथ ! त्वया नैव, स्वप्ने विश्वस्यतामिह ।
असम्भाव्यमपि स्वप्नं, पश्यन्ति विविधं जनाः[7] ।।५२० ।।

बहुदूरे स्थिता साऽस्ति, पुरीति श्रूयते मया ।
रात्रिमात्रेण नो तत्र, गतप्रत्यागतं भवेत्[8] ।।५२१ ।।

---

१. 'स चैत्यस्या-' इति पाठा० ।। २. 'पूजकः' इति पाठा० ।। ३. 'मन्दिरे मुढचेतनः' इति पाठा० ।। ४. 'क्षणं तिष्ठत साम्प्रतम्' इति पाठा० ।। ५. 'चैत्यं दृष्ट्वा प्रभोजये' इति पाठा० ।। ६. 'इति संश्रुत्य ते सर्वे' इति पाठा० ।। ७. 'कथं च क्षणतो यायां, दवीयो विमलापुरम्' इति पाठा० ।। ८. 'कथनेऽपि सतां लज्जा जायते गुणसागर ! ।' इति पाठा० ।।

राजोवाच 'यदुक्तं ते, सत्यमेतन्न चाऽन्यथा ।
स्वप्नश्चित्तविकारोत्थस्तत्राऽऽस्थां को व्रजेत् सुधीः'[१] ॥५२२॥

(उपजातिवृत्तम्)

इत्थं प्रियायाश्छलयुक्तवाचं,
निशम्य राजा वनिताचरित्रम् ।
तोष्टूयमानः कपटेन भूपः,
प्रत्याययामास वधूं स चन्द्रः ॥५२३॥

(वंशस्थवृत्तम्)

किमप्यसाध्यं नहि वर्तते स्त्रिया,
इयं तु तत्राऽपि गुणावली पुनः ।
प्रकाशयेत् क्वापि कथं स्वचेष्टितं,
विशेषतो वीरमतीमते स्थिता ॥५२४॥

## इति श्रीचन्द्रचरित्रे विजयश्रीकस्तूरसूरिविरचिते द्वितीयसर्गः समाप्तः

---

१. 'राजोवाच मया हास्यं, कृतं सुन्दरि ! सम्प्रति । तवैव वचनेऽस्माकं, विश्वासोऽस्ति न संशयः ॥" इति पाठा० ॥

## शासनसम्राट्पूज्याचार्यश्रीविजयनेमिसूरीश्वरपट्टधर-
## पूज्याचार्यश्रीविजयविज्ञानसूरीश्वरपट्टधरप्राकृतविशारद-
# पूज्याचार्यश्रीविजयश्रीकस्तूरसूरिप्रणीते
# चन्द्रचरित्रे तृतीयः सर्गः

(पृथ्वीवृत्तम्)

स्फुरत्फणिफणावलीसुललितातपत्रः सदा,
मृगाङ्कमधुरच्छविर्वरतनुर्महोमण्डितः[१] ।
विमुक्तिवरसुन्दरीकरनिपीडनप्रोल्लस-
न्नमज्जनसुरद्रुमो विजयतां स पार्श्वः प्रभुः ।। १ ।।

(उपजातिवृत्तम् १२+१२)

चन्द्रेण वाग्भिर्बहु बोधिताऽपि,
गुणावली नैव गता प्रतीतिम् ।
कृतोऽपराधो हि जनस्य चित्तं,
करोत्यनास्थाग्रसितं प्रसह्य ।। २ ।।

कृताञ्जलिः साऽथ नृपं जगाद,
'सत्यं मदुक्तं न पुनर्मृषोद्यम् ।
स्वप्नेक्षितस्वीयमृतिः पुनर्ना,
जानाति किं तद्गतमस्तनिद्रः[२] ? ।। ३ ।।

रात्रौ मया जागरितं, न तेऽभूद्,
विश्वास इत्यत्र न काऽपि तेन ।

---

१. 'प्रभावपिहितप्रभाकररुचिश्चिरं राजति ।' इति पाठा० ।। २. 'कृताञ्जलिः स्वामिनमाजगाद, गुणावली नाथ ! वदाऽऽशु तथ्यम् । न जातुचित् स्वप्नवचो यथार्थं, प्रमन्यते कोऽपि विचक्षणोऽत्र ।।' इति पाठा० ।।

हानिः, प्रभुर्वेत्ति समस्तमेव,
जिनाधिपोऽसौ भुवनावलोकी[१] ।। ४ ।।

मृषा गिरन्तः पुरुषाः समस्तं,
जगद् विजानन्ति मृषामयं हि ।
यदीक्षणं पीतिमदोषदुष्टं
पीतं स गृह्णाति पदार्थसार्थम्[२] ।। ५ ।।

कौटिल्यदक्षाः पुरुषा भवन्ति,
नार्यो न कुत्राऽपि कलङ्कभीत्या ।
तथाऽप्यनास्था यदि ते मयि स्यात्,
कुर्यां समाधिं कमहं तदाऽत्र[३] ?' ।। ६ ।।

---

१. 'भुवनस्य साक्षी (भुवने हि साक्षी)' इति पाठा० ।।, इतोऽग्रे-
'धावन्ति वाहा न च सादिनो हि,
तत्र स्थिता एष च यः प्रवादः ।
आसीत् स दैवाद् भवतैव नाम,
सत्यापितः सम्प्रति जीवितेश ! ।।
उक्ताऽपि वार्ता मम या त्वया सा,
सर्वा हि हास्यास्पदमेव जाता ।
शिक्षा कुतस्तेऽजनि वल्लभैवं,
वणिक्कलेयं कपटान्विता हि ।।'
इति निष्कासितौ द्वौ श्लोकौ दृश्येते ।।
२. 'स्वकीयदोषं न विदन्ति किन्तु, परस्य पश्यन्ति सुदूरतस्तम् ।।' इति पाठा० ।।, इतोऽग्रे- 'मुग्धाऽस्मि सर्वं कथितं तवाऽग्रे,
प्रत्येषि सत्यं न हि तत्प्रकामम् ।
हास्यात् परं खिद्यसि चेत् तदाऽहं,
मुञ्चामि हृत्खेदकरीं प्रवृत्तिम् ।।
३. 'तेऽनन्वितं च द्रढयन्ति वस्तु, वाचां प्रपञ्चेन समस्तमेव' इति पाठा० ।।

एवं प्रियाया वचनं निशम्य,
प्रोवाच चन्द्रोऽपि 'वृथा किमर्थम् ।
मह्यं प्रिये ! क्रुध्यसि निष्फलं त्वं,
गायस्व संवादय मे न रोधः ।। ७ ।।

स्वप्ने कथं तेऽभवदिन्दुवक्त्रे !,
विश्वास एवं किल नर्मणोक्ते ।
अथाऽपि चेत् ते हृदयेऽस्त्यनास्था,
जानीहि सर्वं मम सम्यगुक्तम्[१] ।। ८ ।।

श्वश्रूसमेता कुरु सौख्यमग्र्यं,
योगो मनोज्ञो युवयोरयं हि ।
त्वं जातुचिन्माऽप्यनुगृह्य कान्तं,
संदर्शयेस्तत्कुतुकं पुरस्तात्[२] ।। ९ ।।

समीक्षितं यन्निशि वीरमत्या,
सह त्वया तत्सकलं मयाऽपि[३] ।
संलक्षितं कर्म न तेऽस्तु मन्यु-
र्मन्मन्तुमेतं ललने ! क्षमस्व' ।। १० ।।

श्रुत्वा वचस्तस्य गुणावलीत्थं,
प्रोवाच 'सर्वोऽयमसत्प्रलापः[४] ।
[५]तस्मान्मयि प्रेम विनश्वरं ते,
जानामि नाऽन्याऽत्र समस्ति वार्ता[६] ।। ११ ।।

---

१. 'अभ्यर्णसंस्थाऽपि न वेत्सि कस्मात्, त्वं मत्स्वभावं प्रवदाम्यथाऽपि ।।' इति पाठा० ।। २. 'संदर्शयेर्मद्दयिते ! प्रमोदम्' इति पाठा० ।। ३. 'क्रोडस्थितं पश्यसि यद्वदेव, तद्वत् प्रिये ! ते सकलं मयाऽपि ।' इति पाठा० ।। ४. 'प्रोवाच मिथ्या वदसे कथं त्वम् ।' इति पाठा० ।। ५. 'अस्मा-' इति पाठा० ।। ६. '-नाऽन्या तव भावनाऽस्ति' इति पाठा० ।।

निःस्नेहमेवं हसता त्वयाऽहं,
बेभिद्यमानाऽन्तरिदं यथेष्टम् ।
जानामि यत् ते श्रवणेऽद्य कोऽपि,
प्राजञ्जबित्थं कथमन्यथोक्तिः[१] ॥ १२ ॥

बहिः प्रतोल्या अपि नाऽगमं किं,
वृथैव मां दूषयसि प्रियाद्य ? ।
विषाक्तवाक्यं सुधया प्लवित्वा,
जने विमुग्धे मयि किं प्रयुङ्क्षे' ॥ १३ ॥

(वंशस्थवृत्तम्)

[२]करेऽन्वथाऽऽबद्धविवाहकङ्कणं,
निभाल्य कान्तं भयविस्मयाकुला[३] ।
विचिन्तयामास समस्तमेव सा,
चरित्रमेतद् विमलापुरोद्भवम् ॥ १४ ॥

तथाऽपि न स्वीकृतमेतया बहुं,
विधाय मायां परिभोज्य वल्लभम् ।
उपागमद् वीरमतीं गुणावली,
जगाद सर्वं च पतीरितं[४] वचः ॥ १५ ॥

"मयि प्रकोपं कुरुते तवाऽऽत्मजो,
विबुध्य सर्वं विमलापुरोद्भवम् ।
उदन्तमेतस्य पुरोऽखिलं तव,
तृणायते कौशलमेतदम्बिके ! ॥ १६ ॥

---

१. 'जानामि कर्णे तव कोऽपि किञ्चित्, संजप्तवांस्तेन वदस्यदस्त्वम् ।।' इति पाठा० ।। २. 'कराम्बुजे' इति पाठा० ।। ३. 'पतिं समालोक्य विषण्णमानसा' इति पाठा० ।। ४. 'स्वपतीरितं' इति पाठा० ।।

व्यधत्त[१] पाणिग्रहणं तदैव स,
नृपाङ्गजाया विमलापुरं गतः ।
मया भवत्यै कथितं तदैव यत्[२],
त्वया न तत् सत्यतयोपलक्षितम् ।। १७ ।।

जगत्यनेका विदुषी महीयसी,
पुमांसमत्येतुमसौ प्रभुर्नहि ।
पतिं स्वकीयं तच्छलयन्त्यहं स्वयं,
छले निमग्ना दुरदृष्टतो हहा[३] ! ।। १८ ।।

छलेऽतिनिष्णैरपि यः परैर्नृपः
प्रतारितो जातु न स स्त्रिया कथम्[४] ।
प्रतारणीयो, न हि सङ्गतं मया,
व्यधायि तावत् तव सङ्गदोषतः[५] ।। १९ ।।

त्वदीयवाक्यं न मया पुनस्तथा,
करिष्यते प्रेरितयाऽपि जातुचित् ।
कया स्वभर्तुर्विपरीतचेष्टितं,
विधीयते कोपनयाऽपि योषिता ।। २० ।।

विराजतां ते सकला कला ततो,
न मेऽधुना किञ्चिदपि प्रयोजनम् ।

---

१. 'विधाय' इति पाठा० ।। २. 'हि' इति पाठा० ।। ३. 'विचिन्तितं तच्छलयाम्यहं तदा, स्वयं च हाऽहं परिवञ्चिताऽभवम्' इति पाठा० ।। ४. 'विपक्षपक्षाश्रितभूभुजा च्छला-न्न वञ्चितो यः, स कथं स्त्रिया पुनः' इति पाठा० ।। ५. इतोऽग्रे- 'तदस्य मेऽभूत् फलमीदृशं, यया, सदैवमेव क्रियते, हि सा पुनः।' अमूदृशं चेद् विदधीत कर्हिचिद्, भवेच्च मद्वद् विपदास्पदं तदा ।। ('प्रभुर्भवेत् कर्तुममूदृशं यदा, ममैव तत् स्याद् विपदास्पदं तदा ।।' इति पाठा०)

त्वयेतरा भर्तृमती जनन्यथो
न जातु कार्या कुतुकेक्षणोत्सुका[१] ।। २१ ।।

तदीयवाक्यं यदपि स्व्यकारि नो,
विधाय मायां प्रबलां, तथापि किम् ।
मृषा भवेल्लोचनगोचरीकृतं ?,
निषेधतोऽध्यक्षमसन्न जायते[२] ।। २२ ।।

विधीयतां सम्प्रति किं वदस्व तद्,
रहस्यभाण्डं स्फुटितं यतः स्वयम्[३]" ।
निशम्य तद्वाक्यमुवाच सा ततः,
'न मुञ्च धैर्यं[४] न शुचं वृथा कुरु' ।। २३ ।।

इतीरयित्वा [५]प्रतिघारुणानना,
प्रगृह्य तीक्ष्णं करवालमाचलत् ।
उपेत्य चन्द्रं न्यगदत् 'त्वया किमु,
वधूः समुक्ता वद तत्पुरो मम ।। २४ ।।

मदीयरन्ध्रं किमु मूढ ! लोकसे ?,
समीक्ष्य तत् स्यात् किमु रे नराधम ! ।
मुखेन तुच्छेन कुतस्त्वमीदृशं,
मदन्तराविद् वचनं प्रजल्पसि ।। २५ ।।

बिभेति देवोऽपि समस्त एव मद्,
बलं तवाऽऽस्ते वद कीदृशं महत् ।

---

१. 'विधेलिमा काऽपि न दर्शनोत्सुका' इति पाठा० ।। २. 'प्रमाणमन्यत् तदपेक्षते न हि' इति पाठा० ।। ३. 'रहस्यमेतद् विवृतं समस्तकम्' इति पाठा० ।। ४. 'कुरुस्व धैर्यं' इति पाठा० ।। ५. 'तरुणा-' इति पाठा० ।।

नृपासने त्वामभिषिच्य चात्मनो,
विषद्रुमोऽरोपि विनिश्चितं मया ।। २६ ।।

स्मराऽधुना यस्य बलेन तद्वच-
स्त्वया समुक्तं, न परित्यजाम्यहम् ।
नराधम ! त्वामि'ति तस्य वक्षसि,
समारुहद्धन्तुमथोद्यतायुधा[१] ।। २७ ।।

( उपजातिवृत्तम् ११+११ )

इत्थं स्वभर्तुर्विषमां दशां सा,
विलोक्य भीता न्यगदद् विनम्रा ।
'रोषं स्वकं संहर मातरस्मिन्,
भवेत् कुपुत्रो न पुनः कुमाता[२] ।। २८ ।।

नाऽनेन किञ्चित् कृतमप्रियं ते,
विधीयते प्रत्युत भक्तिरेव ।
निरागसे दण्डधराऽपि माता,
व्रजेर्ध्रुवं दण्डधरात् प्रकर्षम्[३] ।। २९ ।।

आजन्म सौभाग्यमखण्डितं मे,
यदीच्छसि त्वं जननि ! प्रकामम् ।
तदा विमुञ्चैनमहो तवाऽहं,
पदोः पतित्वाऽनुनयामि भूरि[४] ।। ३० ।।

मातर्न ते क्रोधहुताशनस्य,
ज्वालां विसोढुं कुशलो जनोऽयम् ।

---

१. 'समारुहत् खड्गकराऽरुणानना' इति पाठा० ।। २. 'मातर्न रोषं कुरु बालपुत्रे, महाजनस्त्वां प्रहसिष्यतीति' इति पाठा० ।। ३. 'न दोषलेशोऽपि किलाऽस्य मातर्निरागसं हंसि कुतो मदीयम् । पतिं, यशस्ते क्षयमेष्यतीति, वृथा न कोपं कुरुते विधिज्ञा ।।' इति पाठा० ।। ४. 'पादे पतित्वा विनयं करोमि' इति पाठा० ।।

प्रसीद मन्युं विजहीहि, तेऽथ-,
च्छिद्रं कदाचिन्न विलोकयेत ।। ३१ ।।

विद्योग्रशक्तिर्ननु चाऽसि मातः!,
देवैस्तथाऽन्यैश्च सदाऽप्यधृष्या ।
ततो न ते रोष इहाऽस्ति युक्तः,
शक्तिः सतां पीडितरक्षणाय[1] ।। ३२ ।।

अयं पतिर्मे प्रियपुत्रतां ते,
समञ्चति प्राणसमानतां च ।
तव प्रसादाद् बहुसौख्ययोग्यो,
न दण्डनीयोऽपि तु पालनीयः[2] ।। ३३ ।।

चेद् वाच्यमास्ते वद मां समस्त-,
माज्ञां करिष्ये सततं तवाऽहम् ।
न प्रार्थनां मोघयति क्व चाऽपि,
भवादृशी लोकविभूषणा या' ।। ३४ ।।

इत्थं स्ववध्वा वचनं निशम्य,
सा तां जगादाऽऽशु बिभीषणास्या ।
'दूरं व्रज त्वं नहि वेत्सि किञ्चित्,
त्यक्ष्यामि नैतं कुटिलं कदाऽपि ।। ३५ ।।

लक्षेण वा ते वचसो न चाहं[3],
मोक्ष्यामि, सत्यं प्रवदामि चैतत् ।

१. 'जहीहि कोपं द्विरदो न कीटे, रुषं कदाचिद् विदधाति नीचे । अतस्तृणेऽस्मिन् नहि शोभते ते, क्रोधः समाने खलु भाति सम्यक् ।।' इति पाठा० ।। २. 'तव प्रसादाद् विपुले च राज्ये, निःशङ्कितस्तिष्ठति मुञ्च तस्मात्' इति पाठा० ।। ३. '-वचनैरहं न' इति पाठा० ।।

भज्येत कर्णौ यदि तर्हि किं स्याद्,
हिरण्मयेनाऽपि विभूषणेन ? ।। ३६ ।।

अन्यत्र किं नास्य बभूव कर्णौ,
मच्चेष्टिते यन्न्यपतत् प्रगल्भम् ।
मदीयरन्ध्रस्य विशोधतोऽयम्,
भुनक्तु मिष्टं फलमद्य सद्यः[1]' ।। ३७ ।।

इतीरयित्वाऽस्य गलेऽथ खड्ग-
धारामसौ मुञ्चति यावदेव ।
अस्याः करं तावदजस्त्रमश्रु-
धारां त्यजन्ती निरुरोध राज्ञी ।। ३८ ।।

'जीवप्रदानं कुरु मे विधाय,
कृपां, त्यजैतं तनयं प्रमुग्धम् ।
विचार्य नाऽयं तव कोपहेतुं,
व्यधाद् विधाता न तथा पुरस्तात्[2] ।। ३९ ।।

क्षणं विचार्य प्रविलोकय त्व-
मेतं विना राज्यमिदं विशालम् ।
शास्ता भवेत् कः â पुरुषं विना नो,
विभाति सम्यक् खलु राज्यलक्ष्मीः' ।। ४० ।।

इत्थं वधूवाक्यत एव कण्ठा-
दुत्तार्य खड्गं सहसा विमाता ।
संमन्त्र्य रज्जुं प्रबबन्ध कण्ठे (पादे),
येनाऽभवद् द्राक् चरणायुधः सः ।। ४१ ।।

---

१. 'मन्मस्तके गौशकृतं दधाति, भुङ्क्तां स तस्मात् फलमस्य सद्यः' इति पाठा० ।।
२. 'व्यधान्न पश्चात् प्रकरिष्यतीति ।।' इति पाठा० ।।

गुणावली ताम्रशिखं विलोक्य,
पतिं रुदत्याशु पपात मातुः ।
पदोः[१] 'कथं मातरमुं विधत्से,
तिर्यञ्चमित्थं सहसे'त्यवोचत् ।। ४२ ।।

'पुरा त्वमस्मिन् मयि चाऽप्यगाधं,
प्रेमाणमादर्शयसि स्म या त्वम् ।
सैवाऽधुना क्रूरतरं स्वभावं,
कथं प्रपन्ना जननि ! प्रसीद[२] ।। ४३ ।।

मानुष्यमाप्याऽपि हिताहितं नो,
जानाति योऽसौ खग एव सत्यम् ।
अतो विशेषाद् विहगं विधाय,
नैवाऽस्ति किञ्चित् फलमत्र मातः[३] ! ।। ४४ ।।

अतः क्रुधं मुञ्च नरं विधत्स्व,
जाताऽस्य शिक्षा प्रबलाऽधुना हि ।
कुर्यात् पुनश्चेदयमित्थमेव[४],
यथेष्टमेनं खलु संविदध्याः' ।। ४५ ।।

श्रुत्वाऽवदद् वीरमती भृशं 'मा,
वदस्व नो चेद् भविता तवाऽपि ।
खगत्वमि'त्थं प्रणिगद्य तस्माद्,
देशाद् ययौ वीरमती स्वगेहम् ।। ४६ ।।

---

१. 'पादे' इति पाठा० ।। २. 'गृहाण मातर्विनयं मदीयं, विनश्वरं पश्य जगत् समस्तम् । न क्वाऽपि राजा त्रिजगत्सु पक्षी, विलोक्यते श्रूयत एव नो वा ।।' इति पाठा० ।। ३. इतोऽग्रे- 'मह्या विहीनोऽपि युतोऽपि राजा, महीपतिः कथ्यत एव लोकैः । शस्त्री न चेच्छूरजनश्च शस्त्री, दन्ती न चेदुच्यत एव दन्ती ।।' इति निष्कासितः श्लोको दृश्यते ।। ४. 'कुर्यात् पुनश्चेदथ तर्हि मातर् ! -' इति पाठा० ।।

गुणावली स्वं पतिमाप्तबुद्ध्या,
क्रोडे निधायाऽथ चिरं शुशोच ।
"यन्मस्तकं रत्नकिरीटयोग्यं,
उच्चैः स्थिता शोणशिखाऽद्य तत्र[१] ।। ४७ ।।

यः सूक्ष्मवस्त्राञ्चितचारुदेहो[२],
भाति स्म सोऽयं खलु नग्न एव ।
पतत्रसङ्घातवृतावराङ्गः,
हीनां दशां कामगमद् विधातः[३] !? ।। ४८ ।।

कृपाणबाणप्रमुखोग्रहेति-
र्दयापरोऽरावपि सापराधे ।
जातोऽनुकम्प्यः स्वयमेव तस्य,
स्वसत्त्वहीनश्चरणायुधो हा ![४] ।। ४९ ।।

प्रातर्मुहुर्यः स्तुतिगीतिधीर-
स्वरेण याति स्म विनिद्रभावम् ।
स्वयं स पौरस्य तदर्थमूषः-
कालेऽवशो दैव ! हहा ! विरूपात्[५] ।। ५० ।।

विधे ! व्यधाः किं क्षणतस्त्वमित्थम् ?
को नाम मन्तुः फलमेतदेवम् ।

---

१. 'यन्मस्तके रत्नकिरीटमाभात्, तस्यैव हा चर्मशिखा बभूव' इति पाठा० ।। २. '-देहरूपो' इति पाठा० ।। ३. 'पतत्रसङ्घातमसौ दधाति, पश्चात्प्रदेशेन हहा विधातः !' इति पाठा० ।। ४. 'कटिप्रदेशे निशितः कृपाणो, निबध्यते येन स एव राजा । बिभर्ति तीक्ष्णस्य नखस्य शोभां, पुनर्भवे हा बलवान् विधाता ।।' इति पाठा० ।। ५. 'सूर्योदये यो नियतं स्वतल्पा-दुत्तिष्ठति स्म क्षणदावसाने । ब्राह्मे समुत्थाय स पञ्जरस्थः, करोति हां कुक्किति तारशब्दम् ।।' इति पाठा० ।।

स्थाले क्व भोज्यं सुरसं नु हैमे,
व्यात्ताननं क्वाऽद्य धराविलेखः[१] ? ।। ५१ ।।

नखा नृपापीडमणिप्रभाभिः,
संभिन्नभासो व्यलसन्यदोर्ये ।
त एव तस्याऽऽयुधतामुपेताः
सीदन्त्ययोग्यस्थलमेत्य देव[२] !" ।। ५२ ।।

गुणावलीत्थं गिरिनिर्झरीव-
न्नेत्राम्बुधारां परिपातयन्ती ।
विलप्य मूर्च्छामगमत् क्व भर्त्तु-
वैंरूप्यतः स्वास्थ्यभृता प्रिया स्यात्[३] ।। ५३ ।।

ससम्भ्रमं काऽपि हिमोदकैस्तां,
सिषिञ्च काचित् पवनं चकार ।
संलब्धसंज्ञां व्यसनाब्धिमग्नां,
धैर्याय सख्यो जगदुः सखेदाः[४] ।। ५४ ।।

---

१. 'विचित्रसुस्वादुरसाद्यमुष्णं, भोज्यं स्म भुङ्क्ते हि सदैव योऽयम् । स उत्करे भस्मचिते विधात-र्विमार्गयत्यद्य कणं क्षुधार्तः ।।' इति पाठा० ।।, इतोऽग्रे- 'विचित्रसद्भावविभावितान्त-र्नवं नवं पद्यकदम्बकं यः । उवाच सोऽयं नियतं प्रभाते, प्रवक्ति कूकूक्किति शब्दमेव ।।' इति निष्कासितः श्लोको दृश्यते ।। २. 'सद्रत्नसङ्घातविभाभिरामं, सिंहासनं मण्डयति स्म योऽसौ । इतस्ततो भस्मचिते स तिष्ठ-त्यहो विधातः ! करुणा न तेऽस्ति।।' इति पाठा० ।।, इतोऽग्रे- 'अनेकरत्नाञ्चितहेमदोला-यां राजते रश्मिभिरन्यदा यः । आन्दोलितोऽभूत् स किलाद्य दैवाद्, दोधूयते पञ्जरमध्यवर्ती।।' इति निष्कासितः श्लोको दृश्यते ।। ३. 'विलप्य मूर्च्छामगमत् क्व भर्तु-र्वियोगतः स्त्री लभते हि शान्तिम् (धर्मम्-पाठ०)' इति पाठा० ।। ४. 'संलब्धसंज्ञां मधुरैर्वचोभि-र्गुणावलीं बोधयति स्म दासी ।।' इति पाठा०।।

''हे देवि ! कस्याऽप्यपराधलेशो,
नाऽस्त्यत्र दोषो निजकर्मणोऽस्ति ।
यद्भावि रोध्यं न च तत्प्रयत्नैः,
तदत्र शोकेन कृतं चिरेण[1] ।। ५५ ।।

यद्भावि तज्जातमिहाऽस्ति नैव,
शोकः प्रतीकारविधिर्विनीते ! ।
अथेममारक्ष सुसावधाना,
व्रजेदनर्थं न परं यथाऽयम्[2] ।। ५६ ।।

यावत् किलाऽयं कृकवाकुरस्ति,
सुखी स तावत् किल चन्द्रभूपः ।
जानीहि ते देवि ! सदैव श्वश्रूः,
क्षेमङ्करा वर्तत एव तावत् ।। ५७ ।।

शोकं कृथा मा धर[3] धैर्यमग्र्यं,
माता यथा ज्ञातवती नहि स्यात् ।
कुर्यात् पुनस्त्वामवलोक्य चेत्थ-
मत्यर्थमन्यत् किल चाऽन्यथा हि ।। ५८ ।।

तत्पञ्जरस्थं परिपालयैनं[4],
कस्याऽपि चाग्रे वद नो कदाऽपि ।
वार्तामिमां, या भवितव्यताऽऽसीत्,
साऽभून्न भूयः परिशोचनीयम् ।। ५९ ।।

---

१. 'अतो वृथा नार्पय दोषमन्य-स्मिन् दैवकृत्येऽत्र विशालबुद्धे ! ।।' इति पाठा० ।। २. 'विधिर्बलीयान्न च तत्र माता, भार्याऽपि वा तद्विपरीतकार्यम्। कर्तुं समर्थाऽस्ति, नहि प्रभोगाद्, विनाऽस्य शान्तिः परिदृश्यते हि ।।' इति पाठा० ।। ३. 'कुरु' इति पाठा० ।। ४. 'वदस्व किञ्चिन्नहि पालयैनं' इति पाठा० ।।

श्वश्रूपुरस्त्वं बहुसम्मताऽभू-
रिदं फलं तस्य समापपात ।
चन्द्रोऽधुना ताम्रशिखो बभूव,
न कोऽपि तन्मार्जयितुं क्षमोऽस्ति ।। ६० ।।

तस्मादिदं स्वे हृदये निधाय,
धैर्यं विधातव्यमयं सुमार्गः ।
चिराय संप्रार्थनया कदाचित्,
तुष्टा विमाता रचयेन्नरं तम्" ।। ६१ ।।

इत्थं वयस्या[1] परिबोध्य देवीं,
निनिन्द खिन्ना हि विमातरं ताम् ।
गुणावली तं कृकवाकुमारा-
न्निधाय नेत्राम्बु ससर्ज भूरि ।। ६२ ।।

क्षणे स्वहस्ते हृदये क्षणं सा,
क्रोडे निधायाऽथ च ताम्रचूडम् ।
शुनो विडालात् परिपालयन्ती,
रात्रिन्दिवं तं पुरतो न्यधात् सा ।। ६३ ।।

नवं फलं शीतजलं सदैव,
गुणावली यच्छति सोऽपि चञ्च्वा ।
आदाय चादाय समत्ति शोण[2]-
शिखी[3] पिबन् यापयति स्म कालम् ।। ६४ ।।

अथैकदा तं स्वकरे निधाय,
श्वश्रूपुरोऽगात् कृकवाकुमेषा ।

---

१. 'भुजिष्या' इति पाठा० ।। २. 'शीतं' इति पाठा० ।। ३. 'पयः' इति पाठा० ।।

विलोक्य तं वीरमती जगाद,
'त्वमाऽऽनयोऽमुं पुरतः कथं मे ? ।। ६५ ।।

दूरं विमुञ्चैनमये ! न रङ्गे,
भङ्गस्त्वया मे ननु संविधेयः ।
अद्याऽपि तेऽयं प्रिय एव चाऽऽस्ते,
येन त्वयेत्थं परिपाल्यतेऽसौ ।। ६६ ।।

न तेऽधुनाऽपि प्रियसङ्गमाशा,
नष्टा, न चेत् पक्षिजने त्वयेत्थम् ।
प्रीतिः प्रमुग्धे ! क्रियते, ममाऽपि,
पुरो न लज्जां कुरुषे, व्रजेतः ।। ६७ ।।

आज्ञां मदीयामनवाप्य नैष,
आनीयतां मे पुरतः कदाऽपि ।
गच्छाऽद्य शीघ्रं निबधान यत्नैः,
सत्पञ्जरे भोक्तुममुं स्वकर्म[1]' ।। ६८ ।।

गुणावली तद्वचनात् तदैव,
प्रियं तमादाय गृहं स्वकीयम् ।
उपेत्य च[2] स्वर्णमये निधाय,
सत्पञ्जरे पालयति स्म यत्नैः ।। ६९ ।।

सुवर्णपात्रे ददते[3] स्म तोयं,
सुपक्वसुस्वादुफलादि चापि[4] ।
क्षणे क्षणे कुङ्कुमतोयतोऽस्य,
प्राक्षालयत् पक्षमसौ च राज्ञी ।। ७० ।।

---

१. 'सत्पञ्जरेऽमुं ललनेऽतिमुग्धे !' इतिं पाठा० ।। २. 'तं' इति पाठा० ।। ३. 'पिबति' इति पाठा० ।। ४. 'भुङ्क्ते' इति पाठा० ।।

'नाथ ! त्वया खेदलवोऽपि नैव,
कार्यो, निजक्रोडतले सदैव ।
त्वां स्थापयामि प्रिय !, नैव दुःखे,
त्यक्ष्याम्यहं क्वाऽपि कदाऽपि सत्यम् ।। ७१ ।।

त्वमेव मे प्राणसमोऽसि हीनां,
दीनां दशां वल्लभ ! प्रापितोऽपि ।
विना त्वयाऽहं न मुहूर्त्तमात्रं,
जीवामि, सत्यं तदवेहि नाथ[1] ! ।। ७२ ।।

महत्तरस्यैव महाविपत्तिः,
क्षुद्रे कदाचिन्नहि जायते हि ।
न पुष्पवन्तौ परिहाय तारा-
गणं क्वचित् संग्रसतीह राहुः' ।। ७३ ।।

इत्थं प्रियं सा परिबोध्य, शोकं,
चकार चित्ते, कृकवाकुवर्यम् ।
विनाऽन्यतोऽसौ रमते क्व चाऽपि,
नाऽस्मिन् सदाऽऽसक्तमना बभूव ।। ७४ ।।

अथैकदा कोऽपि मुनिः प्रशान्तो[2],
भिक्षार्थमागाद् गृहमेतदीयम्[3] ।
स पञ्जरस्थं प्रविलोक्य ताम्र-
चूडं जगादाऽऽशु नृपालकान्ताम् ।। ७५ ।।

---

१. 'त्वमेव मे प्राणतरस्त्वमेव, प्रियो, न ते क्वाऽपि वियोगतोऽयम्। जीविष्यति प्राणजनोऽयमित्थं, जानीहि सत्यं प्रवदामि नाथ ! ।।' इति पाठा० ।। २. 'मुनिर्विशुद्धो' इति पाठा० ।। ३. 'भवने हि तस्याः ।' इति पाठा० ।।

'अनेन किं तेऽपकृतं कृशाङ्गि !,
यत्पञ्जरेऽमुं निरुणत्सि वत्से ! ।
यद्यप्यदः पञ्जरमस्ति हैमं,
तथाऽपि कारागृहमेव चाऽस्य ।। ७६ ।।

अतो विमुञ्चैनमसौ सदैव,
विहिंसकः पापमतिः शकुन्तः[१] ।
प्रभातकालेऽस्य मुखं कदाऽपि,
न पश्यति प्राज्ञतरो मनुष्यः' ।। ७७ ।।

गुणावली तद्वचनं निशम्य,
प्रोवाच 'नाऽयं कृकवाकुरस्ति ।
पतिर्ममाऽयं समभूद् विमातुः,
कोपेन पक्षी विधिवामतायाः[२] ।। ७८ ।।

अतोऽस्य यत्नात् परिरक्षणं हि,
करोमि, मोक्ष्ये न कदाऽपि चैनम् ।'
संश्रुत्य साधुः कथयाञ्चकारा-
'ऽज्ञानाद् मयाऽभाणि शुभे ! तवेत्थम् ।। ७९ ।।

युक्तं कृतं नैव नृपे [३]तयेत्थं,
शोकं वृथा मा कुरु राजपुत्रि ! ।
त्वच्छीलतोऽयं भविता मनुष्यः,
पुनः प्रजापालनलब्धकीर्तिः[४] ।। ८० ।।

राजा खगोऽभूत् पदमस्य चाऽन्यो,
भुनक्ति, हा कर्मफलं बलीयः ।

---

१. 'सदैव' इति पाठा० ।। २. 'क्रोधेन पक्षी मम भाग्यदोषात्' इति पाठा० ।।
३. 'वीरमत्या' इति टि० ।। ४. 'पुनर्महाराजपदप्रशास्ता' इति पाठा० ।।

रामं हरिं पाण्डवकूणिकादीन्[१],
यत्कर्तृ[२] कर्मैव विचित्ररूपान् ।। ८१ ।।

करोति यत् कर्म न कोऽपि तस्य,
निवारणे शक्ततरोऽस्ति लोकः ।
इत्थं मदीयां हृदये निधाय,
शिक्षामथैनं परिपालयस्व' ।। ८२ ।।

निगद्य साधुः प्रययौ यथेष्टं,
गुणावली तद्वचनात् तदैव ।
तनूचकाराऽऽधिमथ स्वभर्तुः,
वाक्कायहृद्भिः कुरुते स्म सेवाम्[३] ।। ८३ ।।

यदा प्रभाते किल तारतार-
स्वैर्जगौ ताम्रशिखस्तदाऽसौ ।
तल्पात् समुत्थाय भृशं रुरोद,
गुणावली तद्वचनं निशम्य ।। ८४ ।।

'क्षणे क्षणे त्वं न वदस्व ताम्र-
चूड ! प्रभाते न हि तेन तेऽस्ति ।
दुःखं, पुनर्मे तु तदेव वाक्यं,
मर्माविदत्यर्थमिदं न वेत्सि[४] ? ।। ८५ ।।

न कातरत्वं समवाप्य नाथ !,
कदाऽपि दीनं वचनं न्यगादीः ।

---

१. 'सूर्यं विधुं शङ्करमिन्द्रविष्णू' इति पाठा० ।। २. 'करोति' इति पाठा० ।। ३. 'सेवापराऽभूत् सकलं विहाय ।।' इति पाठा० ।। ४. 'वज्रायते नाथ Zसंहस्रशोऽपि ।।' इति पाठा० ।।

मनस्विनां यद्व्यसनेषु धैर्यं,
सहैव मौनेन समामनन्ति[१] ।। ८६ ।।

यदुग्रशब्दः किल कर्णगामी,
पुराऽप्रियोऽभूत् प्रिय ! ते शयालोः ।
तदीयरूपं प्रतिपद्य स त्वं,
कथं मुहू रौषि तदेव रागात्[२] ।। ८७ ।।

त्वदीयशब्दश्रवणं विमातुः,
सुखायते वामविचेष्टितायाः ।
श्रवःपथे मे शितकुन्तधारा,
शतायते हाऽत्र विधिर्बलीयान्' ।। ८८ ।।

रात्रिंदिवं प्रीतिपरीतचित्ता,
गुणावली शोकमवाप दीर्घम् ।
अबोधि राजा सकलं, परन्तु,
करोतु किं हा परवांस्तदाऽसौ ।। ८९ ।।

'संवीक्ष्यतां पूरि'ति साऽन्यदा तं,
गवाक्षजाले सुदती निधाय ।
तस्थौ जनालापमसौ निशम्य,
पक्षी प्रियां प्रेक्ष्य भृशं शुशोच ।। ९० ।।

---

१. 'कथं पुनस्त्वं हि तदेव वाक्यं, चोकूयसे प्राणपते ! ऽधुनाऽपि ।।' इति पाठा० ।। २. अस्य श्लोकस्थाने- 'प्राणेश ! यस्मिन् समये रसेन, शय्या-स्थितस्त्वं रमणं व्यकार्षीः ('व्यधत्थाः' इति पाठा०) । शब्दस्तदा ताम्रशिखस्य कर्णे ('यस्य' इति पाठा०), विषायते ते श्रवणे ('हृदये' इति पाठा०) शयालोः ।। विधेर्नियोगादधुना तदीयं, रूपं तवाऽभून्नहि कर्मरेखा । केनाऽपि संचालयितुं नु शक्या, बोभूयते क्वाऽपि कदाऽपि नाथ ! ।।'' इति निष्कासितौ द्वौ श्लोकौ दृश्येते ।।

चतुष्पथे सञ्चरिताश्च लोकाः,
परस्परं प्रोचुरिति प्रकाशम् ।
'आभा न साऽऽभानगरस्य भाति,
ग्रस्तेन्दुकान्तिप्रतिमेयमद्य ।। ९१ ।।

आभानरेशो न विलोक्यतेऽसौ,
चन्द्रोऽव्रजत् क्वेति विचारणीयम् ।
निशम्य तत्कोऽपि रहोऽस्य कर्णे,
जगाद तद्वीरमतीप्रभावम्' ।। ९२ ।।

आकर्ण्य ते, चन्द्रनृपं गवाक्षे,
विलोक्य नेमुः खलु पञ्जरस्थम् ।
निरीक्ष्य तानश्रुजलं मुमोच,
राजा विषीदद्धृदयोऽतिगाढम् ।। ९३ ।।

संश्रुत्य तद् वीरमती कुतोऽप्या-
जगाम यत्राऽस्ति गुणावली सा ।
'किं त्वं गवाक्षे कुरुषे ? कथं वा-
ऽमुं ताम्रचूडं न्यदधा अमुत्र ? ।। ९४ ।।

सञ्जीवनं चेदभिलष्यसि त्व-
ममुष्य तन्नो नगरे प्रकाशम् ।
कुरुष्व मूर्खे ! न शुभाय ते स्यात्
रहस्यभङ्गो मम विद्धि नूनम्[1] ।। ९५ ।।
वातायनादौ न पुनस्त्वयेत्थ-
मानीय लोकस्य निवेद्य एषः ।

---

१. 'कुरुष्व रे मुग्धतरे ! प्रकाशाद्, गुप्तस्य नैवाऽस्ति फलं कदाऽपि ।।' इति पाठा० ।।

औदार्यसुस्नेहभृताऽहमेत-
दपूर्वमागस्तव पालयामि[१] ।। ९६ ।।

चन्द्रोऽयमित्थं न वदस्व कस्या-
ऽप्यग्रे तथा ते भविताऽशु भद्रम् ।
प्रीतिर्भवेच्चेत् परिभूषयस्व,
लोकाक्षिमार्गात् परिपालयस्व[२]' ।। ९७ ।।

इतीरयित्वा निजमन्दिरं सा,
जगाम, राज्ञी पतिमादरेण
नीत्वा गृहेऽभूषयदिष्टभूषां
प्रीतिं न हन्यात् प्रियरूपभेदः[३] ।। ९८ ।।

कुमुद्वतीन्दौ नलिनी दिनेशे,
पद्मेऽलिनीवाऽसदृशीयमारात् ।
तस्मिन् खगे रागमगादपूर्व[४]-
मपेक्षते बाह्यमसौ न हेतुम्[५] ।। ९९ ।।

श्रीवीरमत्या वचनं कदाऽपि,
नो लोपयत्याहितभीतिरेषा ।
[६]तमाम्रवृक्षोपरि संनिवेश्य[७]
कामं समं क्रीडति तेन राज्ञी[८] ।। १०० ।।

---

१. 'अद्य प्रभृत्येनमये ! यदि त्वं, संस्थापयिष्यस्यबले ! गवाक्षे । फलं तदीयं परिभोक्ष्यसे त्वं, क्षमेऽपराधं प्रथमं तवाऽद्य ।।' इति पाठा० ।। २. 'नाऽन्यान् कदाचित् परिदर्शय त्वम् ।।' इति पाठा० ।। ३. 'नीत्वा निजावासगृहे विभूषां, बबन्ध तस्मिन् प्रियताम्रचूडे ।। ' इति पाठा० ।। ४. 'यथा द्विरेफः कमले सदैव, प्रीतिं विधत्ते हि तथैव देवी । तस्मिन् खगे साऽनुबबन्ध राग-' इति पाठा० ।। ५. इतोऽग्रे- 'आशाप्रधानं जगदेतदस्ति, यया जलं चातक एति वर्षात् । तयाऽनलाऽण्डं परिपाति नूनं तस्मात् प्रधाना खलु सैव लोके ।।' इति निष्कासितः श्लोको दृश्यते, तत्र 'अनला पक्षिणीविशेषः' इति टि०।। ६. 'तदाम्र-' इति पाठा० ।। ७. '-विश्य' इति पाठा० ।। ८. 'कामं तया सार्धमसावरंस्त ।।' इति पाठा० ।।

वैदेशिकं कौतुकमीक्षमाणा,
श्वश्रूपराधीनतया च राज्ञी ।
क्षणं न तं पक्षिणमीक्षणाभ्यां,
नाऽऽलोकयन्ती क्वचनाऽपि तस्थौ ।। १०१ ।।

तौ दम्पती इत्थमहः कथञ्चिद्,
व्यतीयतुर्दुःखनिवारणाय ।
निधाय भक्तिं गुरुदेवतासु[1],
प्रचेरतुर्निर्मलसद्व्रतानि[2] ।। १०२ ।।

इतो यदा चन्द्रनृपो विवाह्य,
श्रीप्रेमलां तां परवान् विमुच्य[3] ।
समाजगामाऽथ तदैव साऽपि,
निवार्यमाणा सचिवैर्गृहेऽस्थात् ।। १०३ ।।

प्रतीक्षमाणाऽऽगमनं प्रियस्य,
चिरान्निवृत्तं न विलोकमाना[4] ।
दीनाननाऽचिन्तय'दैत्स दूरं[5],
नूनं पतिर्मे छलनां विधाय ।। १०४ ।।

कलाकलापैर्विमलानगर्या-
मागत्य योऽसावुदियाय चन्द्रः ।
मन्ये निजावासमसौ जगाम,
कस्याऽपि नाऽग्रेऽकथयत् स्ववृत्तम्' ।। १०५ ।।

---

१. '-तायां' इति पाठः ।। २. '-सद्व्रतं हि' इति पाठ० ।। ३. '-परिमुच्य तस्मात्' इति पाठ० ।। ४. 'यदा न तत्सन्निधिमाप भूपः' इति पाठ० ।। ५. 'तदा तयाऽचिन्ति ययौ सुदूरं' इति पाठ० ।।

सा प्रेमलैवं परिचिन्तयन्ती,
यदाऽस्ति, तस्मिन् समये कुमारः ।
अमात्यवर्यानुमतः स[1] तत्र,
समाययौ श्रीकनकध्वजाख्यः ।। १०६ ।।

समाव्रजन्तं प्रविलोक्य दूरात्[2],
प्रत्युज्जगाम स्वपतिं भ्रमाद् द्राक्[3] ।
किन्त्वाननालोकनजान्यताधीः,
सती पतिं नैव बुबोध तं सा[4] ।। १०७ ।।

उवाच 'कस्त्वं ? गृहविभ्रमस्ते,
जातोऽस्ति, येनाऽत्र समागतोऽसि' ।
इत्थं ब्रुवाणां [5]निजगाद कुष्ठी,
'शक्नोति नाऽऽगन्तुमिहाऽन्यलोकः ।। १०८ ।।

समीरणोऽप्यत्र सशङ्क एव,
वाति प्रिये !, मां क्षणतः कथं त्वम् ।
जानासि नाऽद्यैव, कथं त्वयेयं,
प्रीतिर्मदीया ननु रक्षितव्या ? ।। १०९ ।।

लावण्यवत्याकृतिरस्ति, नो ते,
बुद्धिर्यतो मां न हि वेत्सि मुग्धे ![6] ।
का नाम बाला परिणीय रात्रौ,
समागतं वेत्ति पतिं न धीरा' ।। ११० ।।

---

१. '-तो हि' इति पाठा० ।। २. 'सा तं' इति पाठा० ।। ३. '-पतिं विचिन्त्य' इति पाठा० ।। ४. 'तदाननं सा निपुणं निरीक्ष्य, पतिं न मेने निजमिद्ध-बुद्ध्या ।।' इति पाठा० ।। ५. 'प्रज-' इति पाठा० ।। ६. 'बाले !' इति पाठा० ।।

इतीरयित्वा कनकध्वजोऽस्याः,
शय्यां समाशेत जुगुप्स्यगात्रः ।
दूरं ततो मङ्क्षु गलत्प्रतीक-
शुनोऽतिहिंस्राद् जनतेव साऽपैत्[1] ।। १११ ।।

सद्गन्धिपुष्पस्य जिनस्य मूर्ध्नि,
स्थितिर्न चेद् भूमिविशीर्णता स्यात् ।
द्वयी गतिस्तद्वदपांसुलानां,
स्त्रीणां पतिश्लेषणमग्निवेशः[2] ।। ११२ ।।

'जुगुप्सयाऽतोऽर्हसि नाऽवमन्तुं,
मया रसादेहि रमस्व बाले ![3] ।
चिराय यत्नाद् विधिना कृतोऽयं,
सम्बन्ध' एवं स जगाद कुष्ठी ।। ११३ ।।

'नदीतरङ्गप्रतिमं च लोलं,
वर्वर्ति बाले ! ननु यौवनं यत्[4] ।
रमस्व, मानः प्रथमप्रसङ्गे,
पत्यौ विधेयो न कदापि नार्या ।। ११४ ।।

सौराष्ट्रदेशाधिपतेः कुमारी,
त्वं, सिंहलस्याऽधिपतेः कुमारः ।
अस्मि, प्रिये ! ऽनुग्रहतो विधातु-
र्योगो मनोज्ञोऽयमभूदिदानीम्' ।। ११५ ।।

---

१. '-शय्यां समारुक्षदसत्यमायी । तदैव सोत्थाय महोक्षभीता, दूरेऽभवद् गौरिव सा नवोढा ।।' इति पाठा० ।। २. 'द्वयी गति विद्यत- ('विंष्टप' इति पाठा०) एवमस्ति, सत्याः पति श्लेषणमग्निवेशः ।।' इति पाठा० ।। ३. 'अये ! किमर्थं परिवृत्य तिष्ठ-स्याऽऽगच्छ संक्रीड हस प्रिये ! त्वम् ।' इति पाठा० ।। ४. 'हि' इति पाठा० ।।

इत्थं निगद्याऽऽशु करं यदाऽस्या-
श्चकर्ष भूपालकुमार एषः ।
तदैव तिर्यक् परिवृत्त्य तस्मै,
चुकोप सौराष्ट्रपतेः कुमारी ।। ११६ ।।

'पापिष्ठ ! दूरे मम तिष्ठ भग्न -
ढक्कानिभो भासि[1] ममाऽग्रतस्त्वम् ।
कथं विरूपं विवरे पिता त्वां,
संस्थापयामास लघिष्ठ ! कुष्ठिन् ! ।। ११७ ।।

प्रासोष्ट या त्वां जननी कथं सा,
ऽह्लैषीन्न, का त्वां वृणुते कुमारी ।
उत्तिष्ठ रे मूढ ! सुरेन्द्रयोग्यं,
कथं कु-बेरस्त्रपसे न काङ्क्षन्[2] ।। ११८ ।।

नृपात्मजत्वं नहि कुष्ठिनस्ते,
मादृग्जनाराध्यपदप्रदं स्यात्' ।
क्षीरोदजातं गरलं परे क्व,
कु-बेरमित्रादुपयुज्यतां रे ![3] ।। ११९ ।।

आशां विधत्से मम सङ्गमस्य,
विलोकय स्वं प्रथमं वपुस्त्वम् ।
काकः कदाचित्किमु[4] पद्मिनीं वा[5],
मरालभोग्यां लभते लघिष्ठ !' ।। १२० ।।

---

१. 'ढक्केव संभासि' इति पाठा० ।। २. 'उत्तिष्ठ रे मूढ ! न मौक्तिकस्य, माला कुरूपस्य गले विभाति ।।' इति पाठा० ।। ३. 'शय्यां समारुह्य विलोकयंस्त्वं, मां किं वधूमिच्छसि संविधातुम् ? । सुवर्णकुम्भे किमु संस्थितोऽपि, लभेत काको गरुडस्य शोभाम् ।।' इति पाठा० ।। ४. '-चिन्नहि' इति पाठा० ।। ५. 'हि' इति पाठा० ।।

तयोरथेत्थं ब्रुवतोः समागात्,
कुमारधात्री कपिलाभिधाना ।
'वधु ! त्वमित्थं परिवर्त्य वक्त्रं,
स्थिताऽसि किं हा ! प्रथमे प्रसङ्गे ।। १२१ ।।

यथा वदत्येष तथा विधत्स्व,
लज्जां परित्यज्य विरूढरागा[१] ।
कथं वरोऽन्यो भविताऽयमेवो-
पायंस्त सौराष्ट्रनृपानुरोधात्' ।। १२२ ।।

निशम्य तद्वाक्यमुवाच बाला,
रोषान्विता[२] 'रे स्थविरे ! कथं त्वम् ।
ब्रवीषि मिथ्या चरमेऽपि जाते,
वयस्यभूद् वाग् विमला न किं ते ? ।। १२३ ।।

सद्वंशजा शीलवती सती किं[३],
मिथ्यावचोभिश्छलिकर्मताऽर्हा[४] ?।
सन्तिष्ठतां दूरतरे तवाऽयं,
वरो मदीयो न हि कान्त एषः' ।। १२४ ।।

अथ प्रभाते कपिला समुच्चै-
स्तरं विलापं परिकुर्वतीत्थम् ।
जगाद 'हा हा[५] कनकध्वजस्य,
कायोऽभवत् कुष्ठरुजाऽभिभूतः[६]' ।। १२५ ।।

---

१. 'नवीनकाले ।' इति पाठा० ।। २. 'श्रीप्रेमला' इति पाठा० ।। ३. 'नो' इति पाठा० ।। ४. '-च्छलितुं न शक्या' इति पाठा० ।। ५. 'मे' इति पाठा० ।। ६. '-ऽभ्युपेतः' इति पाठा० ।।

श्रुत्वैव मन्त्री सहसाऽऽजगाम,
स्खलंस्त्वरावान् कृतकाकृतिः सन्[१] ।
श्रीसिंहलेशोऽथ कुमारमाता,
दुद्राव संश्रुत्य वचस्तदीयम् ।। १२६ ।।

दृष्ट्वा कुमारस्य वपूरुरोद,
कश्चिद्धरण्यां निपपात कश्चित् ।
शिरः क्षितौ द्राक् प्रबभञ्ज, मुष्टया,
सन्ताडयामासुरुरोऽपि केचित् ।। १२७ ।।

कुमारमाता रुदती जगाद,
'कुतस्त्वया हा विषकन्यकेयम् ।
विवाहिता, या प्रथमे प्रसङ्गे,
त्वां कुष्ठरोगेण युतं चकार ।। १२८ ।।

हा वत्स ! त्वद्रूपमनन्यतुल्यं,
द्रष्टुं यदाऽऽगुः क्षितिपा विदेशात् ।
क्व तेऽद्य यातं विषकन्यकेयं,
जानामि ते प्राक्तनजन्मशत्रुः ।। १२९ ।।

हा यस्य रूपं प्रसमीक्ष्य चन्द्रो,
जडत्वमासाद्य बभूव पाण्डुः ।
तावाश्विनेयौ परिखिन्नवक्त्रौ,
गतौ दिवं जातु न चाऽऽगतौ तौ[२] ।। १३० ।।
तत्र स्थिता सा कपटं समग्रं,
विलोकमाना ननु राजपुत्री ।

---

१. 'स्खलंस्त्वरासम्भ्रमतोऽप्यजस्रम् ।' इति पाठा० ।। २. 'लोकान्तरं जग्मतुरञ्जसा हि' इति पाठा० ।।

संक्षोभमाप्ताऽथ महाधिमग्ना,
लग्ना विचारे मुनितां नु याता[1] ।। १३१ ।।
सौराष्ट्रदेशाधिपतिर्निशम्य,
वार्तां, समागाच्चकितान्तरात्मा ।
जामातरं वीक्ष्य जगा'वयं किं[2],
जातो विरूपो विधिदुर्विलासात् ? ।। १३२ ।।
लावण्यराशिः परिदृश्यते स्म,
योऽयं कथं कुष्ठरुजाऽभिभूतः ? ।'
पृच्छन्तमेवं पृथिवीपतिं तं,
विषण्णचित्तो निजगाद मन्त्री ।। १३३ ।।
'वक्तव्यतामञ्चति नो प्रवृत्ति-
रियं तथाप्युक्तिमयै, क्षमस्व[3] ।
दृष्टस्त्वया कामसमानकान्तः,
कुमारकल्पो यदसौ कुमारः ।। १३४ ।।
तवाऽऽत्मजासङ्गतिमेत्य राजन् !,
अजायता[4]ऽसौ किल कुष्ठरोगी ।
नूनं त्वया साऽतिकुलक्षणा मे,
सुताय दत्ताऽस्ति कुलक्षयाय[5] ।। १३५ ।।
यां शुक्तिकामौक्तिकमेव जानन्,
न स्थापयः स्वालयके महीप ! ।
तत्स्पर्शमात्रेण बभूव चित्रं,
कुष्ठी सुरूपः स कुमाररत्नम्[6] ।। १३६ ।।

---

१. 'मुनिभावमाप ।।' इति पाठा० ।। २. 'कथं क्षणेन' इति पाठा० ।। ३. '-रियं तथापीति वदामि राजन् ! ।' इति पाठा० ।। ४. 'तवाऽऽत्मजापाणितलस्य सङ्गा-दजायता-' इति पाठा० ।। ५. 'सा सुन्दरी ते विषकन्यकाऽस्ति, शुभङ्करा नैव कदाऽपि राजन् ! ।।' इति पाठा० ।। ६. 'यां शुक्तिकामौक्तिकमेव जानन्, संस्थापयस्यालयके महीप ! । तत्स्पर्शमात्रेण बभूव चित्रं, महासुरूपः स कुमाररत्नम्।।' इति पाठा० ।।

मेनेऽथ तथ्यं मकरध्वजोऽपि,
कन्यां तथैवाऽहितकारिणीं ताम् ।
क्रोधाच्च तस्या[1] हननोद्यतः स,
[2]तदाऽवनीशोऽजनि रुट्परीतः[3] ।। १३७ ।।

कृताञ्जलिः श्रीकनकध्वजोऽथ,
विज्ञापयामास महीशमेवम् ।
'तवाऽऽत्मजाया न च तत्र दोषः,
प्राक्कर्मणो मे परिणाम एषः ।। १३८ ।।

अतो वृथा त्वं विजहीहि रोषं,
जानीहि कन्यावधपातकं च ।
न स्त्रीवधात् पापमुदाहरन्ति,
परं किमप्यार्यजनाः महीश ![4]' ।। १३९ ।।

निशम्य वाचं विरतस्ततः सो[5],
जगाद तं 'वत्स ! तवैव वाक्यात् ।
सुतां हनिष्यामि न, किन्तु तावद्
विचारणीयं खलु वर्तते मे' ।। १४० ।।

तदैव गत्वा स्वगृहं सुबुद्धि-
ममात्यवर्यं प्रजुहाव राजा ।
जगाद तस्मै 'विषकन्यकेयं,
प्रतीहि कन्येति ममाऽऽप्तमन्त्रिन् ! ।। १४१ ।।

---

१. 'क्रोधात् स्वपुत्र्या' इति पाठा० ।। २. 'यदाऽ-' इति पाठा० ।। ३. 'भूरिवेगात्' इति पाठा० ।। ४. 'समस्ताः' इति पाठा० ।। ५. 'प्रजहर्ष राजा' इति पाठा० ।।

किं पारिजातादुदपादि मन्त्रिन् !,
मत्तः सुतेयं विषपुष्पकल्पा[१] ।
यत्स्पर्शमात्रेण[२] बभूव कुष्ठी,
जामातृकायो विधिना हतोऽहम्' ।। १४२ ।।

कृताञ्जलिस्तं निजगाद मन्त्री,
'राजन् ! स कुष्ठी खलु पूर्वकालात् ।
न रात्रिमात्रेण कदापि कुष्ठात्,
दुर्गन्धिपूयैर्भ्रियते शरीरम्[३] ।। १४३ ।।

न तेऽङ्गजाया अपि लेशमात्रो,
दोषोऽत्र जानीहि विमुञ्च रोषम्[४] ।
न च[५] त्वया खेदयितव्य आत्मा,
स्वो हिंसकाऽऽविष्कृतकैतवोऽयम्[६]'।। १४४ ।।

इत्थं भृशं मन्त्रिवरेण राजा,
सम्बोधितोऽप्याप न शान्तिलेशम् ।
तदा 'यथेच्छं कुरु भूपते ! त्व-
मि'त्थं निगद्यैष बभूव तूष्णीम् ।। १४५ ।।

श्रीप्रेमला शोकपरीतचित्ता,
मातुः समीपे समुपाजगाम ।
विलोकयित्वैव जुगुप्सया सा,
मुखं परावृत्त्य तदैव तस्थौ[७] ।। १४६ ।।

---

१. 'दुर्गन्ध एवं मम कन्यकाऽभूत्' इति पाठा० ।। २. 'यत्स्पर्शतो मे हि' इति पाठा० ।। ३. 'न यामिनीमात्रत एतदीयं, दुर्गन्धिपूयाकलितं शरीरम् ।।' इति पाठा० ।। ४. 'दोषोऽस्ति, सर्वः कपटोऽयमस्ति ।' इति पाठा० ।। ५. 'नैवं' इति पाठा० ।। ६. '-वेऽत्र' इति पाठा० ।। ७. 'माताऽपि सत्यं विषकन्यकेय-मिति प्रतीत्या न जगाद किञ्चित् ।।' इति पाठा० ।।

पृष्टाऽपि किञ्चिन्नहि रोषपूर्णा,
माताऽपि दौर्हृद्यमिता निमेषात् ।
प्रत्युत्ततार प्रसभं लुनीते,
सौहार्दमारादविवेकशस्त्री[1] ।। १४७ ।।

क्रोधारुणाक्षो निजरक्षकान् सो,
भूपः समाहूय समादिदेश ।
'चाण्डालहस्ते विषकन्यकेयं,
समर्प्यतामाशुतरं वधाय[2]' ।। १४८ ।।

तदैव ते राजसुतां गृहीत्वा,
चेलुर्न राज्ञो हृदये दयाऽभूत् ।
आस्तामपत्यं, किमु तेन, तस्य
दोषाद् विरक्तं यदि तत्र चित्तम्[3] ।। १४९ ।।

चतुष्पथे तां प्रसमीक्ष्य केचि-
च्चाण्डालहस्ते पतितां महेभ्याः[4] ।
आदाय तां राजसभां समागु[5]-
र्विज्ञापयामासुरथो नृपालम् ।। १५० ।।

'राजन्न दण्ड्येयमनाविलस्व-
भावाऽत्यनागाः पुरवासिदृष्ट्या ।

---

१. 'पृष्टाऽपि किञ्चिन्नहि साऽप्युवाच, यद् दैवदग्धस्य जनस्य सर्वः । करोत्युपेक्षां, जनयित्र्यपि प्राग्, न तामवोचत् किमुताऽन्यलोकः ?' इति पाठा० ।। २. 'बिम्बारुणाक्षो नृपतिः कुटुम्ब-वर्गं समाहूय जगाद चेत्थम् । चाण्डालहस्ते विषकन्यकेयं, समर्प्यतामाशु विनाशनाय ।।, इतोऽग्रे "-सोऽपि ('चाण्डालो-ऽपि' इति टि०) द्रुतं तीक्ष्णकृपाणपाणि-र्वध्यावनीमर्चतु सावधानः । तदीय-रक्तैर्गलितैः कबन्धान्ममाऽऽज्ञया साम्प्रतमेव तावत् ।।' इति निष्कासितः श्लोको दृश्यते ।। ३. 'न कोऽपि तस्या वचनं शृणोति, स्म प्राणहानौ न सहायको हि ।।' इति पाठा० ।। ४. '-हि पौराः' इति पाठा० ।। ५. 'समागाद्' इति पाठा० ।।

स्वपापकुष्ठी किल सोऽद्य सद्य,
गिरिच्युतो गेहशिलां निहन्ति[1] ।। १५१ ।।

कृतापराधाऽपि न सन्ततिर्वा,
पित्रोर्वधाज्ञाविषयः कदापि ।
सन्देहपात्रं परवाग्गृहीता,
करोत्यनर्थं नृप ! तत्प्रसीद[2]' ।। १५२ ।।

राजा न तेषां वचनं शृणोति,
स्म क्रोधसंरक्तमुखाम्बुजश्रीः ।
कठोरचित्तो यदि भूपतिः स्यात्,
कुर्वन्तु किं तत्र परे मनुष्याः ।। १५३ ।।

जग्मुर्गृहं ते विफलप्रयत्ना,
नृपप्रवृत्तिं हृदि दूषयन्तः[3] ।
राजा पुनस्तं निजगाद 'कस्मा-
न्नाज्ञा मदीया परिपाल्यतेऽत्र ।। १५४ ।।

स्वं जीवितं चेदभिकाङ्क्षसि त्वं,
तदाऽऽशु कार्यं प्रविधत्स्व चैतत् ।
नो चेदमुष्याः सह जीवितेन,
जीवस्त्वदीयोऽपि गमिष्यती'ति ।। १५५ ।।

राजाज्ञया ते परिगृह्य बालां,
[4]जनङ्गमाश्चेलुरितस्तदैव ।

---

१. 'राजन्नमुष्याः परिरक्षणं हि, कार्यं त्वया, तस्य न कुष्ठरोगे । असौ कुमारी तव हेतुभूता, नातोऽविचार्यं विदधाति साधुः ।।' इति पाठा० ।। २. 'जातेऽपराधेऽपि न सन्ततौ द्रा-गेवं प्रकुर्वन्ति विपश्चितो हि । न दुर्जनानां वचनैः प्रकोपं, कुरुष्व वाक्यं शृणु चैकमस्याः ।।' इति पाठा० ।। ३. 'दुराग्रहो राजनि शोभते न ।' इति पाठा० ।। ४. 'चाण्डालाः' इति टि० ।।

सम्प्राप्य ते वध्यभुवं कुमारीं,
संस्थाप्य तत्राऽसिमथाऽग्रहीषुः ॥ १५६ ॥

ऊचुः कुमारीं 'स्मर देवमिष्टं,
राजाज्ञया ते वधमद्य कुर्मः ।
वयं स्वकुक्षेर्भरणाय राज्ञः,
सेवां विदध्मोऽस्ववशोऽतिगर्ह्याम्[1] ॥ १५७ ॥

त्वमुत्तमा राजसुता, तवाऽयं,
वधो न योग्योऽस्ति ममाऽधमस्य ।
नियोग एवंविध एव पूर्व-
कर्मानुरोधेन किमत्र कुर्मः ॥ १५८ ॥

स्त्रीरत्नभूताऽसि, वधेन तेऽद्य,
का स्याद् गतिर्मे विधिना हतस्य ।
सहस्रशो धिग् वधजीविकां मे,
जातिं जघन्या न यतोऽपराऽस्ति[2] ॥ १५९ ॥

आज्ञां नरेन्द्रस्य जनः समर्थः,
कः स्यात् परावर्तयितुं कुमारि !? ।
दोषो मदीयोऽत्र न तत्क्षमस्व[3],
जनोऽवशः सर्वजनानुकम्प्यः[4] ॥ १६० ॥

इतीरयित्वा निचकर्ष कोशात्,
खड्गं कृतान्ताकृतिकं तदैव ।
विलोक्य तं राजसुता समुच्चै-
र्जहास निर्भीकतयाऽतिधीरा[5] ॥ १६१ ॥

---

१. 'नृपराजपुत्रि ! ॥' इति पाठा० ॥ २. 'सहस्रशो धिग् भवतान्ममाऽस्या, जातेर्वधेनैव विजीविकायाः ॥' इति पाठा० ॥ ३. 'शासनेन' इति पाठा० ॥ ४. 'राज्ञः प्रकुर्मोऽतिनृशंसकर्म' इति पाठा० ॥ ५. 'प्रगल्भा ॥' इति, 'सधैर्या' ॥ इति च पाठा० ॥

कृपाणमालोक्य भयं न लेभे,
नैवाऽत्र दोषं पितुरत्र मेने ।
न चैव चाण्डालगणस्य किञ्चित्,
सा कर्मदोषं गणयाम्बभूव ।। १६२ ।।

इत्थं समीक्ष्य श्वपचो जगाद,
'दुःखेऽपि किं त्वं विदधासि हर्षम् ? ।
कुमारि ! मृत्यौ समुपस्थिते नो,
हसन्ति धीरा अपि विज्ञचित्ताः'[१] ।। १६३ ।।

सा प्रेमलोवाच 'वदामि किं ते ?,
योग्यं न तेऽदो गदितुं सुबन्धो ! ।
आकर्णयेच्चेन्नृपतिस्तदाऽहं,
वक्ष्यामि नो चेत् कथने फलं किम् ? ।। १६४ ।।

पिता मदीयं न वचः शृणोति,
तदेव मे दुःखतरं समस्ति ।
दैवं हि दुष्टं स्वविधौ नयज्ञं,
विमोहयत्येव बलादपि द्राक्'[२] ।। १६५ ।।

जनङ्गमस्तां परिमुच्य तत्र,
समागमन्मन्त्रिवरस्य पार्श्वम् ।
निवेदयामास कृताञ्जलिः स,
'प्रधान ! मद्वाक्यमिदं शृणु त्वम् ।। १६६ ।।

---

१. 'मातर्भयेऽस्मिन् समुपस्थिते नो, हसन्ति केचित् सुदृढा नरा हि ।।' इति पाठा० ।। २. 'केनाऽपि दुष्टेन स वञ्चितः सन्, विवेद दोषं नृपतिर्मदीयम् ।।' इति पाठा० ।।

सा प्रेमला भूमिपतिं विवक्षुः,
निर्दोषतां स्वां न परं कदाचित् ।
सम्बोध्य तद् भूपमुदग्रयुक्ते-
राहूय तस्या वचनं निशम्यम्[१] ।। १६७ ।।

विश्वास्यमन्यस्य वचो भवेच्चेत्
कुतो न तोकस्य निजस्य मन्त्रिन् ! ।
कृत्वाऽनु तापाद् वरमादितो वा
विचार्य कार्यं यदभीप्सितं स्यात्[२] ।। १६८ ।।

तदुक्तमाकर्ण्य सुधीः स मन्त्री[३],
कृताञ्जलिर्भूपतिमाचचक्षे ।
'कन्या न ते सा विषकन्यकाऽस्ति,
परीक्षिता नाथ ! मया भृशं हि ।। १६९ ।।

सद्यो वधो युक्ततरो न तस्या
विचार्य कार्यं भवताऽपि सम्यक् ।
मुग्धाऽपि सा ते तनया यतस्ता-
मानाय्य तस्या वचनं शृणु त्वम् ।। १७० ।।

मनोगतं तद्वचनं निशम्य,
पश्चाद् यथेष्टं कुरु हे नृपाल ! ।
तां चेत् तथाऽभोत्स्यत शीघ्रमेव,
प्रावासयिष्यत् स्वगृहात् तदैव' ।। १७१ ।।

---

१. 'सा प्रेमला भूमिपतिं विवक्षुः, परीक्षिता स विषकन्यका न । संबोध्य भूपं नृपकन्यकां ता-माहूय तस्या वचनं निशम्यम् ।।' इति पाठा० ।। २. 'विदेशिनोऽदो वचनं निशम्य, कर्तुं न चेत्थं ननु जाघटीति । पश्चादवश्यं परिशोचनीयं, तत् किं हि कृत्यं ? परिशोच्यते यत् ।।' इति पाठा० ।। ३. 'चाण्डालवाक्यं प्रनिशम्य मन्त्री' इति पाठा० ।।

निशम्य तद्वाक्यमुवाच राजा,
'साऽऽनीयतां, किन्तु विदूर एव ।
संस्थाप्यतां मे नयनाग्रतो नो,
संस्थापनीयाऽतिकुलक्षणत्वात्[१]' ।। १७२ ।।

स प्रेमलामाशु ततः प्रधान,
आनाय्य संस्थाप्य विदूरतो हि ।
उवाच राजानमियं समागा-
च्छृणु प्रभो ! तद्वचनं विनीतम्' ।। १७३ ।।

आदेशतः सा न्यगदत्, ''पितर्मे
संश्रूयतां वाक्यमिदं यथार्थम् ।
कदाप्यसत्यं तव सन्निधौ न,
वदामि, यूयं प्रभवो यतो मे ।। १७४ ।।

असम्भवं मे वचनं तथा च,
लज्जे प्रवक्तुं च गुरोः समीपे[२] ।
तथाऽपि तेऽग्रे कथयामि नूनं,
ह्रिया विनाशं लभने हि कार्यम् ।। १७५ ।।

येन त्वया मे रचितो विवाहः,
स प्राणनाथो मम नाऽयमस्ति ।
जानामि राजन्ननुमानतोऽहं,
प्रभोऽत्र संदेहलवोऽपि नाऽस्ति ।। १७६ ।।

यो मामुपायंस्त स पूर्वदेश,
आभानगर्यामवतिष्ठते हि ।

---

१. 'बोभूयतां सम्प्रति मन्त्रिराज ! ।।' इति पाठा० ।। २. 'लज्जे प्रवक्तुं तव सन्निधौ हि ।' इति पाठा० ।।

श्रीवीरसेनस्य नृपस्य पुत्रः,
श्रीचन्द्रनामा नृपतिः सुरूपः ।। १७७ ।।

वदामि सत्यं, यदि तत् कदाचिद्,
मिथ्या भवेत् तस्करवन्ममाऽपि ।
दण्डो विधेयो भवता, मयैतद्,
लज्जां परित्यज्य समुच्यतेऽदः" ।। १७८ ।।

उवाच मन्त्री 'वद राजपुत्रि !,
कथं विजानासि स चन्द्रभूपः ।
पतिर्ममाऽयं नहि तत्समग्रं,
पितुः समीपे परिमुच्य लज्जाम्' ।। १७९ ।।

"विवाह्य मां चन्द्रनृपोऽथ रेमे,
द्यूते मया साकमसौ तदैव ।
आश्चर्यभूतं स जगाद तत्र,
यत्तत् पितस्त्वं शृणु राजमौले ! ।। १८० ।।

'आभानगर्या नृपतेर्गृहे यः,
पाशोऽस्ति साक्षाद् रसभारभुग्नः ।
स चेत् तदा क्रीडितुमद्य रागो,
भृशं भवेदि'त्यगदत् तदा सः ।। १८१ ।।

संश्रुत्य तद्वाक्यमिदं तदैव,
व्यचिन्तयं 'प्राग्दिशि सा पुरी क्व[१] ।
अयं प्रतीच्यां दिशि वर्तते मे,
प्रियः[२] कथं वेत्ति तदीयवार्ताम् ।। १८२ ।।

---

१. 'व्यचिन्तयं क्वाऽस्ति महेन्द्रदिक् सा ।' इति पाठा० ।। २. 'प्रभुः' इति पाठा० ।।

आहोस्विदेतत्पुरतः कदापि,
केनाऽपि चोक्तं तदयं ब्रवीति ।
किं वाऽस्य मातामहसंनिवासात्[1],
भवेदिदं ज्ञातमि'ति व्यचेतम्[2] ॥ १८३ ॥

मूढा न [3]चाऽहं वचसो रहस्य-
मवेदिषं तत्समये कथञ्चित् ।
अनन्तरं मोदकमस्य मन्त्रिन् !,
भोक्तुं वितीर्णं सरसं मया हि ॥ १८४ ॥

आस्वादयंस्तन्निजगाद 'गङ्गा-
जलं यदि स्याद्धि तदा स्वदेत' ।
साऽऽश्चर्यमेतद्वचनं निशम्य,
विचारितं किं भणति प्रियो मे[4] ? ॥ १८५ ॥

'गङ्गानदी प्राग्दिशि वर्ततेऽयं,
प्रत्यग्दिशाधीशनृपालपुत्रः[5] ।
कथं विजानाति पुनः स चाऽऽभा-
पुरप्रशंसामकरोद् समोदम्[6]' ॥ १८६ ॥

इतोऽस्य मन्त्री खलु हिंसकाख्यः,
सङ्केततस्तं प्रजुहाव दुष्टः ।
स मां परित्यज्य जगाम, मन्त्री,
ह्यभर्त्सयन्मामनुधावमानाम् ॥ १८७ ॥

---

१. '-सतो' इति पाठा० ॥ २. 'व्यतर्कयम् ॥' इति पाठा० ॥ ३. 'चाऽहं वचसो' इत्यस्य स्थाने 'तद्भावमहं' इति पाठा० ॥ ४. 'प्रभुर्मे' इति पाठा० ॥ ५. 'प्रत्यग्दिशायां वरिवर्ति तस्मात् ॥' इति पाठा० ॥ ६. 'भृशं हि' इति पाठा० ॥

पुनः स नाऽऽगादयमेव चाऽऽगात्,
कुष्ठी मदीये शयने निविश्य ।
मां प्रेमवाचा न्यगदद् विधातुं,
प्रीतिं जघन्यां छलनापटिष्ठः ॥ १८८ ॥

नाऽऽकर्णयं तद्वचनं यदाऽहं,
तदा समागात् कपिलाऽस्य धात्री ।
प्रत्यङ्मुखीं मां परिबोधयन्ती,
जगाद 'तेऽयं न पतिर्द्वितीयः' ॥ १८९ ॥

सूर्योदयो यावदभून्न तावत्,
तत्रैव तस्थौ परिबोधयन्ती ।
अगृह्णतीं तद्वचनं भृशं मां,
निर्भर्त्स्य शीघ्रं बहिराजगाम ॥ १९० ॥

रुदत्यसौ तत्र जगाद तार-
'मागम्यतां भो ! विषकन्यकेयम् ।
यत्सङ्गतः कुष्ठरुजाऽभिभूतो-
ऽभवत् कुमारः कनकध्वजोऽसौ' ॥ १९१ ॥

निशम्य तस्या वचनं तदैव,
समागमत् तस्य पिता विषण्णः ।
परिच्छदैः सार्धमयं समुच्चै-
रुरोद संछन्नकलाविधिज्ञः ॥ १९२ ॥

स सिंहलेशो मयि यद्विधेयं,
व्यधात् समग्रं, न हि चाऽस्ति शेषः ।
इदं मया ते पुरतः समस्तं,
न्यगादि यत्तेऽभिमतं कुरुष्व ॥ १९३ ॥

संप्रत्ययस्ते यदि सिंहलेशे,
विधीयतामाशु ततोऽनुरूपम् ।
अन्यत् तवाऽग्रे निगदामि किं ते,
वशंवदाऽहं परिपालनीया ।। १९४ ।।

पिता स्वपुत्र्यां विदधीत कोपं,
तदा चलेन्नैव बलं परस्य ।
विधीयमानेऽथ विचार्य पूर्वम्[1]
कार्ये यशस्ते भविता महीश ! ।। १९५ ।।

भाग्यं पितुः पाणितलेऽस्ति पुत्र्या,
स पालयेद्वा निधनं दिशेद्वा[2] ।
पुत्रस्य भाग्यं भवति स्वतन्त्र-
मित्येव भेदोऽस्ति तयोरिहाऽर्थे'' ।। १९६ ।।

श्रीप्रेमलाया वचनं निशम्य,
नृपं समूचे विनयेन मन्त्री ।
'प्रभो ! न चाऽस्या वचनं मृषाऽस्ति,
कुष्ठी न चाऽस्याः पतिरस्ति मन्ये ।। १९७ ।।

आभानगर्या नृपतिः स चन्द्रो[3],
न वेति यावत् परिशोधयामि ।
तावद् गृहे तिष्ठतु राजकन्या,
सर्वं शुभं स्यान्ननु धर्मतोऽस्याः ।। १९८ ।।

नेयं वधार्हा तव कन्यकाऽस्ति,
सत्यं मृषा वेति वचोऽस्ति चाऽस्याः ।

---

१. 'परन्तु सम्यक् प्रविचारिते हि' इति पाठा० ।। २. 'विनाशने वा परिपालने वा ।' इति पाठा० ।। ३. 'आभानगर्यां वरिवर्ति चन्द्रो' इति पाठा० ।।

परीक्ष्य पश्चात् क्रियतां यथेष्टं,
संतिष्ठते राजसुताऽपि तावत्' ।। १९९ ।।

इत्थं प्रधानस्य वचो निशम्य,
विचारयामास महीपतिः सः ।
विचारयोग्यं वचनं कुमार्याः,
स मार्गणीयः खलु चन्द्रभूपः ।। २०० ।।

'त्वमेव मन्त्रिन् ! सदने स्वकीये,
संस्थापयैनां, यदि सत्यवाक् स्यात् ।
इयं, तदाऽवश्यमवाप्स्यते शं,
नो चेद् वधोऽस्या नरिनर्ति शीर्षे' ।। २०१ ।।

आयुःस्थितौ किञ्चिदपि प्रकर्तुं,
प्रभुर्महीपोऽपि न जायते यत्[1] ।
श्रीप्रेमला खड्गतलेऽपि[2] गत्वा
जिजीव भाग्यात् शुभकर्मजन्यात्[3] ।। २०२ ।।

मन्त्री तदा तां परिगृह्य गेहं,
समागमत् स्वीकृतसत्कृतिं ताम् ।
स्नानादिकृत्यं प्रविधाप्य सम्य-
गाश्वासयामास रहः पितेव ।। २०३ ।।

'शोकं वृथा मा कुरु राजपुत्रि !,
क्षिप्रं विधास्यामि तथा यथा सः ।
पाणिग्रहीता तव सन्निधौ द्राक्,
समागमिष्यत्यवशोऽपि दूरात्।। २०४ ।।

---

१. 'हि' इति पाठा० ।। २. 'वध्यपथेऽपि' इति पाठा० ।। ३. 'पुनः शुभं द्रक्ष्यति जीविता सा' इति पाठा० ।।

पितुः सकोपस्य मनागपि त्वं,
चिन्तां विदध्या न, स कल्य एव ।
त्वयि प्रसद्याऽऽशु पुरेव राजा,
प्रेमाञ्चितः स्थास्यति पुत्रि ! सत्यम्' ।। २०५ ।।

इत्थं प्रधानस्य वचो निशम्य,
सा प्रेमला स्वस्थमना बभूव ।
सदाश्रयं प्राप्य मुमूर्षुलोको,
न मोदते किं खलु पामरोऽपि[1] ? ।। २०६ ।।

इतो विवस्वानपरार्णवे किं,
स्नात्वा सुरक्तं वसनं वसानः ।
सद्यः प्रतीचीवदनारविन्दं,
संचुम्बितुं सक्त इवाऽऽबभासे ।। २०७ ।।

तथाऽत्र सन्ध्यारुणरागरक्ता,
द्यौराबभासे सह कामिलोकैः ।
कुमुद्वती मोदमवाप चञ्च-
त्सुधांशुबिम्बं प्रविलोक्य सद्यः ।। २०८ ।।

तस्मिन् क्षणे नम्रशिराः प्रधानः,
सभां समासाद्य नृपं ननाम ।
उवाच 'राजन् ! कुरु राज्यकार्यं,
चिन्तां परित्यज्य विशालबुद्धे ! ।। २०९ ।।

ये मन्त्रिणः सिंहलभूपपार्श्वे,
गतास्तदानीं वरदर्शनाय ।

---

१. 'प्राकृतोऽपि' इति पाठा० ।।

आहूय तान् पृच्छ महीश्वर ! त्वं,
ते राजपुत्रं ददृशुर्न वेति ।। २१० ।।

यदि स्वरूपं कनकध्वजस्य,
दृष्टं वदिष्यन्ति तदा त एव ।
चेत्कङ्कणं हस्ततले तदा नो,
प्रयोजनं स्यान्मुकुरस्य राजन् !' ।। २११ ।।

इति प्रधानस्य वचो निशम्य,
प्रहृष्य तानाह्वयति स्म भूपः ।
तानागतान् प्रेक्ष्य जगाद 'यूयं,
ब्रूताऽत्र सत्यं नृपतेः सभायाम् ।। २१२ ।।

श्रीप्रेमलायाः कनकध्वजेन,
सार्द्धं विवाहाय गता हि यूयम् ।
तत्र स्वनेत्रैर्नृपनन्दनस्यै-
क्षिध्वं न वा किं वदत स्वरूपम् ।। २१३ ।।

अप्यल्पमात्रं न मृषाऽभिधत्त,
यथार्थवाचं कथयध्वमाशु ।
पापं न कस्याऽपि कदापि लोके,
प्रच्छादितं तिष्ठति मन्त्रिमुख्याः !' ।। २१४ ।।

इत्थं महीपस्य वचो निशम्य
जगाद कोऽप्यन्यतमश्छलेन ।
'त्वत्तो न किञ्चिद्वचनं सुगुप्तं,
संतिष्ठते क्वाऽपि महेन्द्रकल्प ! ।। २१५ ।।

तवाऽस्मि भृत्यः परिपोषितश्च,
वदामि सत्यं शृणु नाथ ! वाक्यम् ।

यदा वयं सिंहलभूमिनाथ-
स्याऽग्रे विवाहस्य कथामकार्षम् ।। २१६ ।।

तदोर्मिकां पाणितले न दृष्ट्वा,
तां मार्गितुं यावदगां, तदाऽमी ।
[1]प्रचक्रिरे निश्चयमागतं मां,
तथैव सर्वं कथयाम्बभूवुः[2] ।। २१७ ।।

अतः कुमारस्य मया न दृष्टं,
रूपं कथं नाथ ! निवेद्यतां तत् ।
यत् तत्र जातं तदहं तवाऽग्रे,
न्यवेदयं भूमिप ! सत्यमेव' ।। २१८ ।।

राजा तदीयं वचनं निशम्य,
छलं विदित्वा न जगाद किञ्चित् ।
प्रभोः पुरः किं लभते मृषाऽपि,
स्थानं कदापि प्रविवेकिनो हि ।। २१९ ।।

इत्थं द्वितीयोऽपि जगाद भूपं,
'व्याजं समास्थाय शृणु प्रभो ! मे ।
नाऽहं तवाऽग्रे निगदामि मिथ्या,
सत्यं यथावत् कथयामि नाथ ! ।। २२० ।।

भुजङ्गमो यद्यपि वक्रगामी,
तथाऽपि नासौ स्वविले भुजङ्गः ।
मिथ्या तवाऽग्रे न कदापि सत्यं,
बोभूयते भूमिपुरन्दरस्य ।। २२१ ।।

---

१. 'प्रचक्रतुर्नि-' इति, 'चक्रुर्यथा' इति पाठा० ।। २. '-भूव' इति पाठा० ।।

भुक्तस्य मे पूर्वदिने बभूवा-
ऽजीर्णं ततो द्राक्छमलाये राजन् !
अमी मयीते[1] व्यदधुः समस्तां,
वधूवरोद्वाहनिमित्तवार्ताम्[2] ।। २२२ ।।

असौ कुमारः सुभगो न वेति,
मया न दृष्टो नयनेन नाथ !' ।
इति द्वितीयस्य वचो निशम्य,
राजा मृषावादिनमेव मेने ।। २२३ ।।

ऊचे तृतीयोऽपि, 'यदा विवाह-
वार्ता बभूवाऽथ तदा नृपस्य[3] ।
क्रोधादगच्छत् किल भागिनेयो,
मां प्रैषयद् बोधयितुं नृपस्तम् ।। २२४ ।।

यदाऽगमं तं परिबोध्य तावत्,
कृतं समस्तं खलु तैर्यथावत् ।
किं कुब्जको वाऽथ स काण एव,
राजन् ! कुमारो न मया व्यलोकि' ।। २२५ ।।

राजा तदीयं वचनं निशम्य,
सविस्मयस्तत्परिबुद्ध्य बुद्ध्या ।
मिथ्यावचश्चाऽथ तुरीयमित्र-
मालोकयामास स भावपूर्णः ।। २२६ ।।

उवाच 'मन्त्रिन् ! वद सत्यवाक्यं,
मिथ्यावचोभिर्न मदीयमन्युम् ।

---

१. 'मयि गते सति' इति टि० ।। २. 'गतस्य मेऽमी व्यदधुः समस्तं, समागमं नैव किलाऽवजग्मुः ।।' इति, 'वधूवरोद्वाहनिमित्तचेष्टितम्' इति च पाठा० ।।
३. 'नृपस्य तस्य' इति पाठा० ।।

संदीपय, क्रोधपरीतचित्तः,
कस्याऽपि नाऽहं प्रियकारकोऽस्मि ।। २२७ ।।

मन्त्री चतुर्थः समयं निरीक्ष्य,
जगाद सत्यं "शृणु भूमिनाथ ! ।
वक्तव्यमेतन्नहि वाक्यमस्ति,
तथाऽपि तेऽग्रे कथयामि नाथ ! ।। २२८ ।।

श्रीसिंहलेशस्य पुरः समेत्य,
सर्वे वयं साञ्जलयस्तमाशु ।
उद्वाहसम्बन्धकृतेऽत्यजस्रं,
सम्प्रार्थयामः परमाग्रहेण ।। २२९ ।।

अनेकसम्प्रार्थनतोऽनुमेने,
तदा वयं तं न्यगदाम शीघ्रम् ।
कुमारमादर्शय माररूपं,
लप्स्यामहे नेत्रफलं विलोक्य ।। २३० ।।

उवाच राजा तनयो मदीयो,
विद्यालयेऽभ्यस्यति साम्प्रतं यत्[1] ।
विद्यामतो द्रक्ष्यथ नैव यूयं,
रूपं तदीयं ननु दर्शनीयम् ।। २३१ ।।

निर्बन्धमत्यन्तमकार्ष्म राजन् !,
यदा तदाऽस्मान् परिबोध्य मन्त्री ।
दीनारकोटीरददच्चतुर्भ्यो-
ऽस्मभ्यं प्रतार्यच्छलनापरः सः ।। २३२ ।।

---
१. 'हि ।' इति पाठा० ।।

अस्थाम ते मन्त्रिपदे नियुक्ता,
वयं तथाऽप्यस्य वशेऽभवाम ।
लोभाद् विवाहस्य विनिश्चयं चा-
ऽकार्षीत् तदा सिंहलभूपतिः सः ।। २३३ ।।

असौ कुमारः कमनीयकान्ति-
र्न वेत्यदर्शाम न तं वयं हि ।
श्रीहिंसकोऽस्मासु महच्छलं यद्,
व्यधात् तदद्यैव वयं च विद्मः ।। २३४ ।।

सत्यं तवाऽग्रे कथितं नृपाल !,
नाऽसत्यमण्वप्यवतिष्ठतेऽत्र ।
कौटिल्यबुद्ध्या रचितं तदत्र,
दोषं महान्तं गणयस्व नाथ ! ।। २३५ ।।

विधीयतां योग्यमिह प्रभो ! नः[१],
संक्षम्यतां दूषणमप्यदो न[२]" ।
इत्थं तदीयं वचनं निशम्य,
सत्योक्तितोऽस्मिन् प्रतुतोष भूपः ।। २३६ ।।

विहस्य राजा निजगाद सत्यं,
वचस्त्वदीयं ननु कश्मलं न ।
यथार्थवाक्यान्नहि कस्य चेतः,
प्रसीदति प्राणिवरस्य[३] लोके ।। २३७ ।।

---

१. 'प्रभुर्नो' इति पाठा० ।। २. 'क्षमा न दोषस्य विधीयतां च' इति पाठा० ।।
३. 'प्राणिजनस्य' इति पाठा० ।।

(मालिनीवृत्तम्)

अथ निजतनयाया दोषलेशोऽपि राज्ञा,
निजहृदि बुबुधे नो सत्यवृत्तान्तवेदाः[1] ( ? ) ।
भवति सुकृतमेव प्राणिनां सर्वदैव,
जगति सकलदुःखत्राणदक्षं सपक्षम्[2] ।। २३८ ।।

इति श्रीकस्तूरसूरिविरचिते श्रीचन्द्रचरित्रे
तृतीयः सर्गः
समाप्तः

१. 'वेदा ।' इति पाठा० ।। २. 'विचित्रम्' इति पाठा० ।।

शासनसम्राट्पूज्याचार्यश्रीविजयनेमिसूरीश्वरपट्टधर-
पूज्याचार्य श्रीविजयविज्ञानसूरीश्वरपट्टधरप्राकृतविशारद
पूज्याचार्य श्रीविजयश्रीकस्तूरसूरिप्रणीतं

# चन्द्रचरित्रे चतुर्थः सर्गः

(वसन्ततिलकावृत्तम्)

तन्मन्त्रिराजवचनं प्रणिशम्य राजा,
तेभ्यो ददावभयदानमवाप्तहर्षः ।
किं सत्यवाक्यकथनान्न नरा लभन्ते,
राजादितोषजनितं फलमत्र[1] लोके ।। १ ।।

सद्बुद्धिनामसचिवं निजगाद[2] राजा,
'सत्यं त्वयोक्तमखिलं मतिमांश्छलोऽयम् ।
श्रीसिंहलस्य, न हि दोषलवोऽपि[3] मन्त्रिन् !,
सम्भाव्यते स्वदुहितुर्निपुणं विचार्य[4] ।। २ ।।

कोऽप्यन्य एव तनयामुदवोढ सत्यं,
व्याजादमुष्य नृपतेरधमस्य मन्त्रिन् ! ।
व्यर्थं सुतां मम विडम्बयतेऽपि[5] कुष्ठी,
नाऽयं कदापि दुहितुः पतिरस्ति जाल्मः ।। ३ ।।

यावन्न चन्द्रनृपतेः परिशुद्धिलाभः[6],
कारागतं कुरु खलं प्रहरीक्ष्यचेष्टम्[7] ।

---

१. 'मुदमत्र' इति पाठा० ।। २. 'प्रजगाद' इति पाठा० ।। ३. '-लवोऽस्ति' इति पाठा० ।। ४. 'सम्भाव्यते हि दुहितुर्निपुणेन दृष्ट्वा ।।' इति पाठा० ।। ५. '-ते हि' इति पाठा० ।। ६. 'परिशोधनं मे' इति पाठा० ।। ७. 'यायाद्वशे परिविधत्स्व निजेऽविचारम् ।' इति पाठा० ।।

तावत् कुटुम्बसहितं खलु सिंहलेश-
मि'त्यादिशन्नरपतिः सचिवाय तस्मै ।। ४ ।।

श्रीसिंहलं सदयितं कनकध्वजं चा-
थो हिंसकाख्यसचिवं कपिलां च धात्रीम् ।
पञ्चेन्द्रियं यतिरिवाऽऽशु चकार राजा,
संरुद्धचेष्टमवशं स्ववशं प्रसह्य[१] ।। ५ ।।

अन्यांस्तदैव मुमुचेऽस्य परिच्छदान् स,
राजा व्यधात् सपदि चन्द्रनृपस्य शोधम् ।
श्रीप्रेमलां निजगृहे प्रणिनाय सद्यो,
दानाय तामिति जगाद विचारचुञ्चुः ।। ६ ।।

'दानं ददस्व तनये ! परिपृच्छ चास्मा-
आभापुरेश्वरमये ! किल चन्द्रभूपम् ।
कैश्चिद् भवद्भिरवलोकितमित्थमेव,
नित्यं व्रतं समनुतिष्ठ शुभाशये ! त्वम्' ।। ७ ।।

श्रीप्रेमला निजपितुर्वचनं निशम्य,
दानं ददावनुपकारकयाचकेभ्यः ।
पप्रच्छ चन्द्रनृपतिं, न हि कोऽपि तस्य,
वार्तामपि प्रणिजगाद नृपाङ्गजायै ।। ८ ।।

श्रीप्रेमला गुणनिधिः प्रददौ यथेच्छं,
दानं निराकुलतया बहुमानपूर्वम् ।
तद्वंशजा(:) प्रकृतितः खलु दानशौण्डा,
आज्ञापितास्तु गुरुभिः किमु वर्णनीयम्[२] ? ।। ९ ।।

---

१. 'पञ्चेन्द्रियं निजवशे कुरुते यथैव, योगी तथैव विदधौ स्ववशे महीपः।।' इति पाठा० ।। २. 'जाजायते किमु गुरोरनुरोधतो हि ।।' इति पाठा०

'आभापुरी सुरपुरीव चकास्ति पूर्व-
देशेऽधिपः सुरपतिप्रतिमोऽस्ति चन्द्रः[1] ।
जानासि तं पथिक ! कश्चिदहो ब्रवीतु,
वैदेशिकोऽसि तत एव च पृच्छ्यतेऽदः' ।। १० ।।

'नाऽहं प्रवेद्मि भगिनि ! प्रबलप्रतापं,
चन्द्रं, स चाऽस्ति विषयात् परतो मदीयात्' ।
इत्थं निशम्य पथिकस्य वचो नितान्तं,
चिन्ताकुलाऽजनि नृपालसुता विलक्षा ।। ११ ।।

रात्रिन्दिवं गिरिणदीव न नेत्रयुग्मं,
धारां विना नृपतनूजनुषोऽवतस्थे ।
शोकेन शुष्कवदनाऽपि पुरो न कस्या-
ऽप्याचष्ट राजतनया स्वमनीषितं सा ।। १२ ।।

सा प्रेमला धवलचन्द्रकलेव लेभे,
बाला नितान्ततनुतां विरहाग्निखिन्ना ।
प्रायः स्वभर्तृविरहे प्रमदाजनानां,
क्लेशोऽनिवार्यतर एव हि बोभवीति ।। १३ ।।

आगादितो हृदयवर्तितमोवितान-
प्रध्वंसवासरमणिः किल चारणर्षिः ।
श्रुत्वा परिच्छदयुतो नृपतिः प्रणन्तुं,
श्रीप्रेमलां निजसुतां परिगृह्य चाऽगात् ।। १४ ।।

गत्वा प्रणम्य समुपाविशदेष भूपः,
साधुः सुधारससमानवचोभिरेतान् ।

---

१. 'आभापुरी सुरपुरीव हि पूर्वदेशे, वर्वर्ति तत्र सुरराज इवाऽस्ति चन्द्रः ।' इति पाठा० ।।

सद्देशनाभिरमलान् प्रविधाय भक्ति-
प्रह्वांश्चकार परमेश्वरपादकञ्जे ।। १५ ।।

श्रीप्रेमलामपि सुभक्तिदृढां विधाय,
दत्त्वा प्रहृष्टहृदयो नवकारमन्त्रम् ।
योगीश्वरोऽथ निरगात् स यथेष्टदेशं,
सा तं जजाप सततं परिशुद्धभक्त्या ।। १६ ।।

तीर्थङ्करार्चननुतिप्रमुखैकदृष्टिः,
सा प्रेमला निरवधि प्रजजाप मन्त्रम् ।
तामेकदाऽथ समुपेत्य जगाद देवी,
'पुत्रि ! त्वमाचर जपं तव षोडशेऽब्दे[1] ।। १७ ।।

स्वामी मिलिष्यति जहीहि शुचं शुभाङ्गि !,
सद्भावतोऽत्र जिनधर्मवरं भजस्व ।'
उक्त्वेति शासनसुरी निरगात् ततः सा,
तीर्थेशभक्तजनदुःखविनाशदक्षा ।। १८ ।।

इत्थं निशम्य वचनं घनमाप हर्षं,
सा प्रेमला द्विगुणतः प्रचचार धर्मम् ।
आगादितो निजकरैः परिवादयन्ती,
वीणां, तदीयसदने व्रतिनी कदापि ।। १९ ।।

सत्कृत्य तां नृपसुता बहुमानतोऽस्याः,
शुश्राव गीतिसहितां परिवादिनीं सा ।
'देशात् कुतोऽत्र समगा' इति पृच्छति स्म,
तां चन्द्रभूपपरिशोधनलोलुपत्वात् ।। २० ।।

---

१. 'षोडशाब्दे ।।' इति पाठा० ।।

'प्राग्देशवासनिरतामवगच्छ बाले !,
मां, ते प्रयोजनमिहाऽस्ति किमु प्रमुग्धे !' ।
वैराग्यरागरसरञ्जितभावपूर्णा,
श्रीचन्द्रभूपतिगुणान् निजगाद साध्वी ।। २१ ।।

'देशेऽस्ति कोऽपि जनदुःखविनाशकारी,
तस्मिन् वदाऽऽशु नृपतिर्द्विजराजकान्तः ?' ।
योगिन्युवाच 'शृणु केशरकान्तदेह-
श्चन्द्राभिधो नृपवरोऽरिमहीध्रवज्रः ।। २२ ।।

तस्याऽधिपस्य सुयशः[१] परितो भ्रमन्ती,
गायामि, तस्य निकटे न्यवसं शुभाङ्गि ! ।
प्राणाधिकं च परिवेद्मि तदीयमन्त्रं,
खादामि, राजतनये ! स मदीयभूपः ।। २३ ।।

किन्त्वेनमाशु चरणायुधतामनैषीत्,
क्रोधाकुला कुधिषणा किल तद्विमाता ।
तेनैव तं परिविमुच्य समागताऽस्मि,
तीर्थाटनाय, नहि दुःखममुष्य सह्यम्' ।। २४ ।।

अस्या वचः परिणिशम्य बहुप्रहर्ष-
सन्दोहसङ्कलितचित्ततया तदैव ।
आदाय तां स्वजनकस्य पुरो जगाम,
राजाऽपि तद्वचनतः समवाप मोदम् ।। २५ ।।

ऊचे, 'त्वदीयवचनं सकलं यथार्थं,
वत्से !, तवैव सुकृतस्य फलात् समग्रम् ।
सम्पत्स्यते कपटतस्तव पाणिहर्ता,
दूरेऽस्ति चारुतरकौशलशोभमानः ।। २६ ।।

---

१. 'वर्वर्ति तस्य सुयशः' इति पाठा० ।।

किन्त्वस्य सङ्गमचिरान्न सुते ! लभेथा,
धैर्यं विधाय परिपालय धर्ममग्र्यम्' ।
इत्थं पितुर्वचनतः समवाप्य हर्षं,
दध्यौ सदैव हृदये पतिमिद्धभक्तिः ।। २७ ।।

एवं[१] विलोक्य नहि दुःखसुखं कदापि,
कार्यं बुधैरितरवत् खलु मोहमाप्य[२] ।
प्राग्जन्मकर्मपरिणामफलं न कोऽपि,
रोद्धुं प्रभुर्भवति कौशलकोटितोऽपि ।। २८ ।।

चन्द्रो बभूव कृकवाकुरथाऽस्य मासो,
जातः, प्रकाशमकरोन्न गुणावली तम् ।
श्वश्रूभयेन, विविधैरुपचारजातैः,
शुश्रूषते स्म विहगं पतिमाप्तबुद्ध्या ।। २९ ।।

आभापुरीगतजना न विलोक्य चन्द्रं,
सन्तापयुक्तहृदया न्यगदन्नमात्यम् ।
'संदर्शय स्वनृपतिं, न हि चेद् ददस्वा-
ऽऽज्ञां नो, वयं विषयमन्यमितो व्रजामः ।। ३० ।।

धर्मो विभाति दयया न विना यथैव,
नो चाऽन्ववायमपहाय मनुष्यजन्म[३] ।
दन्तं विना नहि गजो, नगरी तथैव,
भूपं विनाऽपि रचनारुचिरा श्रियाऽऽढ्या[४] ।। ३१ ।।

---

१. 'भूमौ' इति पाठा० ।। २. '-जालम् ।' इति पाठा० ।। ३. 'सद्वंशतो नहि मनुष्यभवः कदाऽपि ।' इति पाठा० ।। ४. 'भूपं [चन्द्रं] विना नहि विराजति सम्प्रतीह ।।' इति पाठा० ।।

राज्यासनं समधितिष्ठति यत्र भूप-
स्तत्रैव सौख्यमधिगच्छति सत्प्रजालिः ।
तस्माद् भवेद् यदि नृपो नहि नः समक्षं,
सर्वे वयं गहनमेव समाश्रयामः' ।। ३२ ।।

मन्त्री जगाद 'न च मे चिरतोऽप्यभीष्टं,
जातं धराधिपतिदर्शनमद्य यावत्[1] ।
तस्मान्ममाऽपि हृदयं भवदीयहृद्व-
दौत्सुक्यमञ्चति[2] नरेन्द्रविलोकनाय ।। ३३ ।।

धैर्यं समाश्रयत खेदमपाकुरुध्वम्,
सौख्येन तिष्ठत पुरेव विधद्ध्वमिष्टम् ।
युष्माकमाशु सविधे विनिवेदयिष्ये,
शुद्धिं नृपस्य सकलां च यथास्थितां द्राक्[3]' ।। ३४ ।।

इत्थं प्रजाः स सचिवः परिबोध्य सम्य-
गन्तःपुरं नरपतेः प्रविवेश धीरः ।
गत्वा प्रणम्य नृपमातरमाजगाद,
मन्त्री कृताञ्जलिपुटो ननु नागरोक्तम् ।। ३५ ।।

''मातः ! कथं नरपतिः परिगुप्त एव,
स्थास्यत्यसौ तव प्रजाः सकलाः समानाः[4] ।

---

१. 'मन्त्री जगाद नहि मे बहुकालतोऽपि, जातं सुदर्शनमहो नृपतेः सुलोकाः ! ।।' इति पाठा० ।। २. '-दुद्वेगमञ्चति' इति पाठा० ।। ३. 'अन्विष्य सर्वविषयं परिबुध्य सर्वं, युष्माकमाशु सविधे विनिवेदयिष्ये । पूर्वं सुखेन परितिष्ठत मा स्म खेदं, कार्ष्टः क्षितीशपरिशोधनमाशु कुर्वे ।।' इति पाठा० ।। ४. स्थास्यत्यतः सकलमेव प्रजासमानम् ।' इति पाठा० ।।

तासामनेन हृदयं[1] नियतं विरक्तं,
स्यादत्र देवि ! परिचिन्तय तत्प्रकारम् ।। ३६ ।।

आगत्य ताः प्रकृतयः प्रवदन्ति मां यत्[2],
संदर्शयस्व नृपतिं किमु वा निदेशम् ।
गन्तुं वनाय वितर, प्रभुमन्तरेण,
नैवाऽस्ति नः सुखकरं नगरं कदापि ।। ३७ ।।

त्वं भूपतिं निजवशे प्रविधाय गुप्तं,
संस्थापयस्यखिलनागरलोक एतत् ।
नो मृष्यते, यदि रुषस्तव देहि मह्यं,
दण्डं, कुरुष्व विपरीतमतिं[3] न तावत् ।। ३८ ।।

पृच्छन्ति नागरजनाः सततं किमेभ्यो,
दास्यामि वाचिकमहं वद राजमातः ! ।
मासं प्रतार्य सकलान् प्रतिबोध्य सम्य-
गस्थां, वदामि वद किं ननु साम्प्रतं ताम्[4] ।। ३९ ।।

मन्यस्व वा नहि तथाऽपि वदन्ति लोका,
मात्रैव चन्द्रनृपतिः प्रतिगोपितोऽभूत् ।
इत्थं त्वमिच्छसि नृपासन आसितुं यत्,
तन्न क्षमं शिशुविचेष्टितवत् सुमातः[5] !" ।। ४० ।।

श्रुत्वा तदीयवचनं परिरुष्टचेता[6],
ऊचे प्रधानमथ वीरमती प्रगल्भा ।

---

१. 'उद्वेगमाप्तहृदयं' इति पाठा० ।। २. 'हि' इति पाठा० ।। ३. 'वनितेव मतिं' इति पाठा० ।। ४. 'हि ।।' इति पाठा० ।। ५. 'प्रमुग्धे' इति पाठा०।। ६. 'परिक्रुद्धचेता' इति पाठा० ।।

'नाऽहं नृपस्य किमपीह विदाङ्करोमि
सर्वं तवैव चरितं किल तत्र मन्ये ।। ४१ ।।

संकीर्तयस्यवगुणं मम यत्र तत्र,
किन्तु त्वमेव मम चन्द्रसुतं व्यहिंसीः ।
त्वत्तो जगत्यपि कृतघ्नतरो न लोको,
ब्रूषे पुरो मम कथं ननु निस्त्रपस्त्वम्[1]' ।। ४२ ।।

इत्थं निशम्य वचनं निजगाद[2] मन्त्री,
'मातः कथं नु वदसीत्थमतथ्यमेव[3] ।
वृद्धाऽसि चेतय[4] मतिं, वद कोऽपि साक्षी,
यच्चन्द्रराजहननं वदसे निकृष्टम् ।। ४३ ।।

एवं कथं वदसि, नैव विचार्य मिथ्या,
दोषार्पणं भवति साधु न साधुलोके ।
नो ते भयं भवति किं परमेश्वराद् वा[5] ?
यो वेत्ति दुष्कृतमथो सुकृतिं जनानाम्[6] ।। ४४ ।।

शिक्षानिमित्तमवदं तव सन्निधौ तत्,
किन्तु प्रकोपजनकं समभूत् तवाऽदः ।
मूर्खस्य सत्यमुपदेशवचो न शान्त्यै,
क्षीरं तनोति भुजगस्य विषं यथैव[7] ।। ४५ ।।

---

१. इतोऽग्रे-'त्वां वेद्मि दुष्ट ! बहुकालत एव किं ते, हि स्यात् प्रकाशमत एव करोमि नैव । मुग्धाऽस्मि यद्यपि भवानपि नैव विद्वान्, कोऽपि च्छली भवति कोऽपि कृतघ्न एव ।।' इति निष्कासितः श्लोको दृश्यते ।। २. 'प्रजगाद' इति पाठा० ।। ३. 'हे राजमातरिति किं वदसि त्वमेव? ।' इति पाठा० ।। ४. 'चिन्तय' इति पाठा० ।। ५. '-राद्धि' इति पाठा० ।। ६. 'जनस्य' इति पाठा० ।। ७. 'त्वां यत्प्रसादयितुमब्रवमत्र वाचो, जातं तदेव विपरीतफलाय मेऽद्य ।।' इति पाठा० ।।

हे राजमातरिति वाचमहो ! कथं त्वं,
ब्रूषेऽवधीन्नरपतिं सचिवो, जनः किम् ? ।
प्रत्येष्यतीत्थमनुचिन्तय चेतसि स्वे[१],
वाच्यं विचार्य विदुषा ननु सर्वतोऽतः[२] ।। ४६ ।।

विद्युल्लतेव चपला वनिताजनानां,
वामा च[३] बुद्धिरिति शास्त्रविदो वदन्ति ।
तत् त्वं यथार्थमकरोरमुनाऽप्रियेण[४],
वाक्येन, नो प्रकृतिरञ्चति भिन्नभावम्' ।। ४७ ।।

आकर्ण्य वाचमवदद् विजने प्रधानं,
'किं लप्स्यसे नृपतिशोधनतो ?, यदेवम् ।
उद्घाटनं प्रकुरुषे मम, तेन तेऽतः[५],
क्षेमं भवेन्नहि कदाऽपि विचारचुञ्चो ! ।। ४८ ।।

विद्यां प्रसाधयितुमैन्नृपतिस्त्वदीयो,
विद्याधरस्य किल ते कथितं रहस्यम् ।
नामाऽपि तस्य नृपतेर्ग्रहणेन नैव,
कार्यं भवेदिति विचिन्तय मार्गमन्यम्[६] ।। ४९ ।।

त्वं मे सखा तव नृपोऽस्म्यहमित्थमेव,
संघोषयस्व सकले मम मण्डले त्वम् ।
नो चेत् तवाऽपि परिणामविधावनर्थं,
स्यादित्यवेहि मम मन्युवशेन मन्त्रिन् !' ।। ५० ।।

---

१. 'प्रत्येति नैव, परिहासकथेयमस्ति' इति पाठा० ।। २. 'सर्वतो हि' इति पाठा० ।। ३. 'बोभोति' इति पाठा० ।। ४. 'प्रमुग्धे' इति पाठा० ।। ५. 'तेऽपि' इति, 'तेऽस्मि' इति वा पाठा० ।। ६. 'कार्यं विचिन्तय नवं किमपि प्रधान!।।' इति पाठा० ।।

इत्थं निशम्य सचिवः प्रजगाद 'मात-
रङ्गीकरोमि वचनं तव सर्वमेव' ।
श्रुत्वा प्रधानवचनं प्रजहर्ष, साऽपि,
प्रोचे 'नृपोऽत्र वद वीरमती बभूव ॥ ५१ ॥

तस्या निदेशमिह यो न करिष्यते स,
वध्यो भवेन्नृपतिशासनलङ्घनेन ।
आभापुरी नहि शुभाऽन्तकराजधानी,
स्यादस्य चेतसि जनः स करोत्ववज्ञाम्[1]' ॥ ५२ ॥

इत्थं निदेशमधिगम्य समस्तपुर्यां,
तं डिण्डिमेन सचिवोऽप्युदजूघुषत् सः ।
संश्रुत्य नागरजना अतिविस्मयेन,
प्रोचुः परस्पर'महो किमिदं नवीनम् ? ॥ ५३ ॥

स्त्री स्वामिनी नहि कदाप्यवकर्णिताऽपि,
साऽऽभापुरे समभवन्ननु विस्मयोऽसौ ।
किञ्चाऽत्र नाशमगमत् पुरुषो हि येन,
स्त्री स्यान्नृपः किल' मुहुर्जगदुः पुरस्थाः[2] ॥ ५४ ॥

तस्या भयेन सचिवस्य निदेशमेते,
पौराः स्व्यकार्षुरनुरागवशान्न लोकाः ।
स्वाधीनराज्यमधिगम्य बुभोज राज्ञी,
नाऽस्या निदेशमिह कोऽपि लुलोप भीतेः[3] ॥ ५५ ॥

नामाऽपि चन्द्रनृपतेर्यदि कोऽप्यगृह्णात्,
तस्मै कृतान्त इव दण्डमसावयच्छत् ।

---

१. 'रम्या च यस्य हृदये, स करोत्ववज्ञाम् ।।' इति पाठा० ।। २. 'स्त्री स्यान्नृ-पेति किल नागरिका अवोचत् ।।' इति पाठा० ।। ३. 'लोकः' इति पाठा० ।।'

आज्ञां सदैव शिरसा कलयन्नमात्य-
स्तस्याः प्रधानसचिवः प्रबभूव सद्यः ।। ५६ ।।

सद्बुद्धिरेष सचिवोऽथ कदापि तस्या,
अग्रे छलेन समवोचत सामपूर्वम् ।
"देवि ! त्वया विहितशासनमेत्य लोक-
श्चन्द्रं कदापि नहि संस्मरतीह राज्ये ।। ५७ ।।

मार्गे विलुप्तमपि वस्तु न कोऽपि कस्या-
प्यालाति, संरचयते न निदेशभङ्गम् ।
भूपा बभूवुरपरे न हि ते समानं,
कस्याऽपि शासनमभूदिह राजमातः ! ।। ५८ ।।

एवं तवाऽस्ति ननु शासनमत्र येन,
हिंस्रैः समं पिबति गौः सलिलान्यभीरुः ।
चेच्चार्मणं पणमपि व्यवहर्तुमिच्छे[१]-
ल्लातुं न तत्पुरजनो[२] विदधीत शङ्काम् ।। ५९ ।।

दृष्टा अनेकनृपराजवरा मया ते,
त्वत्सन्निधौ खलु भवन्ति निषादकल्पाः ।
स्त्रीत्वात् कुरुष्व नहि खेदमये ! नृपत्वे,
पृथ्वीवशीकरणपाटवमादधासि[३] ।। ६० ।।

वृद्धस्य मस्तकनतिर्भवतीह लोके,
प्रख्यातमेतदिति यत्तदहो, त्वमद्य ।
लोकान् स्वपादकमले विनमय्य, तेभ्यो
ऽदाः स्वीयमस्तकनतिं ननु वार्द्धकेऽपि" ।। ६१ ।।

---

१. 'चर्माऽपि ते यदि भवेदभिकाङ्क्षितं तद्' इति पाठा० ।। २. 'नागरजनो' इति पाठा० ।। ३. 'पृथ्वी वशा भवति स्त्रीत्वमथाऽस्ति तत्ते' इति पाठा०।।

इत्थं प्रधानवचनं प्रणिशम्य राज्ञी,
हर्षेण तं प्रणिजगाद विशालबुद्धिम्।
'त्वं सेवकोऽसि मम सर्वत एव मान्यो,
नो ते कदापि वचनं परिलोपयिष्ये' ।। ६२ ।।

तस्याः प्रसादमधिगम्य विचिन्त्यते स्म,
'व्याघ्री मया निजवशेऽक्रियताऽधुना हि' ।
तावत् सुपञ्जरगतं चरणायुधं तं,
दृष्ट्वा जगाद किल वीरमतीं स मन्त्री ।। ६३ ।।

'देवि ! त्वमेनमिह पञ्जरमध्यसंस्थं,
कृत्वा सदाऽवसि खगं ? किमु देवतां वा[१] ! ।
कृत्वा वशे समधिरक्षसि, तद्वदस्व',
श्रुत्वेति साऽपि कपटं प्रविधाय चोचे ।। ६४ ।।

'वध्वाः प्रमोदनकृते कृकवाकुमेतं,
क्रीत्वा धरामि ननु काञ्चनपञ्जरेऽस्मिन् ।
भोज्यं जलं यदवधि प्रददामि मन्त्रिन् !,
स्थास्यत्यसौ तदवधि प्रबलानुरागात् ।। ६५ ।।

प्रातः प्रति प्रतिदिनं परमेश्वरस्य,
ध्यानाय बोधयति मां कृकवाकुरेषः' ।
श्रुत्वा जगाद सचिवो 'वद राजमात-
स्त्वं स्वं यथेच्छमिति विश्वसिमीह नाऽहम् ।। ६६ ।।

क्रीतस्त्वया नहि, न तेऽविदितो ममाऽस्ति,
कोशश्छलं तव समग्रमहं प्रवेद्मि ।

---

१. '-पञ्जरतः किमर्थं, संस्थाप्य रक्षसि खगं ? किमु देवताऽम्बा ।' इति पाठा० ।।

त्वत्सेवकोऽस्मि नृपमातरतो न मत्त-
स्ते गोप्यमस्ति किमपि क्वचनाऽपि वस्तु ?' ।। ६७ ।।

श्रुत्वा वचस्तदनु वीरमती जगाद,
'कोशं प्रवेत्सि नहि भूषणमस्मदीयम् ।
दत्त्वा तदेव कृकवाकुमिमं गृहीतं,
वध्वाः कृते हि मयका सचिवाग्रगण्य ![1] ।। ६८ ।।

नाऽतः परं वद तदीयवचः पुरो मे[2],
सम्बोधयामि विजने सुहितं पुनस्त्वाम् ।
नो चेद् वदिष्यसि पुनः कृकवाकुतुल्यं,
त्वामप्यहं सचिव ! सम्प्रति संविधास्ये' ।। ६९ ।।

इत्थं तदीयवचनं स निशम्य मन्त्री,
व्यामोहतोऽतिभयमाप्य बभूव तूष्णीम् ।
तावत् पुरोऽतिरुदतीं प्रददर्श राज-
कान्तां गुणाञ्चितमतिं च गुणावलीं ताम् ।। ७० ।।

सङ्केततः सचिवमित्थमबोधयत् सा-
'ऽसौ मे पतिस्तव नृपः कृकवाकुरूपः' ।
आश्चर्यमाप परिबुध्य न किञ्चिदेवा-
ऽगादीद् भयेन सचिवः खलु वीरमत्याः ।। ७१ ।।

'चन्द्रं व्यधान्नृपवरं कृकवाकुमि'त्थं,
प्रख्यातिमापदयशः किल वीरमत्याः ।
राज्यस्य लोभवशतो, भुवने समग्रे,
तस्या भयेन नहि कोऽपि जगाद किञ्चित् ।। ७२ ।।

---

१. 'सचिवेति विद्धि' इति पाठा० ।। २. 'प्रधान !' इति पाठा० ।।

निष्कण्टकं समधिगम्य विशालराज्यं,
निःसाध्वसा तदनु वीरमती बुभोज ।
तस्या बलेन बलवानपि राजवर्ग,
आगत्य पादकमले प्रणनाम भीत्या ।। ७३ ।।

एवं हिमालयपतिर्ननु वीरमत्याः,
शुश्राव कीर्तिमथ हेमरथाभिधानः ।
योऽनेकधा परिभवं समवाप चन्द्रात्,
सैवाऽधुनाऽधिकतरोद्धतभावमाप ।। ७४ ।।

पत्रं विलिख्य सहसा नियुयोज[1] दूतं,
तस्याः सकाश इति हेमरथो महीपः ।
'रण्डे ! तवास्मि मदमर्दयिता, न चेत् त्वं,
सन्त्यज्य राज्यमखिलं गहनं प्रयासि' ।। ७५ ।।

आभापुरीं कतिपयैर्दिवसैः स दूतः,
सम्प्राप्य पत्रमददात् खलु वीरमत्याः ।
पत्रं प्रपठ्य सहसाऽतिरुषाऽभिभूत-
सर्वाङ्गयष्टिरवदन्नृपराजमाता ।। ७६ ।।

"रे दूत ! ते किमु वदामि त्वयि प्रकोपो,
नो युज्यते मम परार्थकथाप्रसक्ते ।
गत्वा द्रुतं स्वनृपतिं वद यद्यसौ स्यात्,
सत्क्षत्रियस्तदिह शीघ्रमुपैतु जाल्मः ।। ७७ ।।

स्यात् क्षत्रियस्य तनयो यदि ते नृपालो,
यद्वा स्वमातुरपिबत् स्तनजं पयोऽयम् ।

---

१. 'त्यजति स्म' इति पाठा० ।।

पश्याम्यसौ कतिपयैर्दिवसैरिहैति,
सङ्ग्रामरागरसिकस्तव हेमभूपः ।। ७८ ।।

पूर्वं ह्यसौ मम भटैर्विमुखीकृतोऽभूत्,
तद्विस्मृतं खलु मुमूर्षुरसौ विलज्जः ।
यावद्ददर्श नहि वीरमतीबलं[१] स,
तावद् रणाय यतते प्रबलोद्धतः सन् ।। ७९ ।।

आभापुरं यदि जिघृक्षति ते महीपः
सत्यां न सम्भवि मयीति विदाङ्करोतु[२] ।
किन्त्वस्य गच्छति हिमालय एव पूर्वं,
तद् रक्षतु स्वभुजदर्पसमाश्रयेण[३] ।। ८० ।।

कीटस्य पक्षजनिरस्त्यवसानहेतु-
र्नो मङ्गलाय, तव भूमिपतेस्तथैव ।
बुद्धिर्विनाशसमये विपरीतभावं,
संसेवते मम विरोधत एव शीघ्रम्'' ।। ८१ ।।

इत्थं मदोद्धतमसौ वचनं निशम्य,
तस्यास्तदैव स ययौ स्वपुरं स दूतः ।
व्यज्ञापयन्नरपतिं न तया विरोधः
क्षेमाय संभवति[४] भूमिपते ! ऽधुना ते[५] ।। ८२ ।।

दूतस्य वाक्यमवमत्य नृपस्तदैव,
सज्जीचकार निजसैन्यमसौ बलीयान् ।

---

१. '-मुखं ' इति पाठा० ।। २. '-तन्मयि राजदूत ! ।' इति पाठा० ।। ३. 'तद् रक्षतान्निजबलैरधुना स भूपः ।।' इति पाठा० ।। ४. 'ते भवति' इति पाठा० ।। ५. 'हि' इति पाठा० ।।

अग्रे चकार मदमत्तमहेन्द्रनाग-
प्रख्यातवंशजगजान्[१] गिरिराजकल्पान्[२] ।। ८३ ।।

हेषारवं व्यदधुरश्ववराः समन्तात्,
क्रोशद्वयं बधिरयन्त उदञ्चिनस्ते[३] ।
इत्थं विशालबलसङ्घयुतश्चचाल,
युद्धाय हेमरथभूमिपतिर्मदान्धः ।। ८४ ।।

भेर्यादिवाद्यनिवहो व्यनदत्, पताका-
श्चित्राश्चतुर्दिशि मरुत्तरला विचेलुः ।
खड्गस्य भाभिरभवच्छतचन्द्रकल्पा[४],
द्यौस्तद्बलस्य करपङ्कजवर्तिनो द्राक्[५] ।। ८५ ।।

ऊचे स्वसैन्यमथ हेमरथस्तदानीं,
'पश्याऽद्य वाजिगत एव मुहूर्तमध्ये ।
आभापुरीं स्ववशगां विदधामि, यस्मात्[६]
अग्रे ममाऽस्ति तृणवद्बलमेति कस्याः[७] ।। ८६ ।।

मत्सन्निधौ बलवतोऽपि[८] तृणायतेऽरं[८],
सैन्यं नृपस्य समरेऽचिरतः समन्तात् ।
तत्किं पुरो मम भवेदबलाजनस्य,
तुच्छं बलं समधियोद्धुमये नृवीराः !' ।। ८७ ।।

---

१. '-वंशजमिभं' इति पाठा० ।। २. '-कल्पम्' इति पाठा० ।। ३. 'उत्प्लवमानाः' इति टी० ।। ४. '-सूर्यकल्पा' इति पाठा० ।। ५. 'हि' इति पाठा० ।। ६. 'किं मे' इति पाठा० ।। ७. 'शक्तो भवेत् पुरत एष कियद्बलो हि ?' इति पाठा० ।। ८. 'हि' इति पाठा० ।।

'युद्धाय हेमरथभूपतिरागतोऽस्ती'-
त्याश्रुत्य नैव चकितेव बभूव राज्ञी ।
प्रादर्शयत् किल यथा न हि चाऽऽगतोऽभूत्,
किं दुष्करं भवति सत्त्ववतो जनस्य ।। ८८ ।।

सद्बुद्धिनामसचिवं रहसीत्थमेषा[१],
ब्रूते स्म 'तेन समितिर्नहि शोभते मे ।
तुच्छेन युद्धमिह मन्त्रिवर ! त्रपायै,
प्रीतिं समेन कथयन्ति विरोधिताञ्च[२] ।। ८९ ।।

पृष्ठं प्रताड्य कथयामि लघु त्वमेव,
तं जेष्यसि प्रबलसैन्यसमाजजुष्टः ।
गत्वा तथा च परिवेष्टय तस्य सैन्यं,
नाऽसौ पलाय्य समराद्धि यथा प्रणश्येत् ।। ९० ।।

आराधयामि निजदेवमहं, प्रसादाद्,
यस्य स्थिरो नहि भविष्यति हेमभूपः ।
निःसंशयं व्रज निनादय युद्धवाद्यं,
सज्जीकुरुष्व सकलं स्वबलं प्रधान !' ।। ९१ ।।

इत्थं निदेशमधिगम्य बहिः समागा-
दाहूय सैन्यगणपान् युधि लब्धकीर्तीन्[३] ।
ब्रूते स्म ''हेमरथभूपतिरागतोऽस्ति,
सैन्यै रणाय बहुभिर्नगरेऽस्मदीये ।। ९२ ।।

१. '-सचिवात् प्रणिशम्य तस्मै' इति पाठा० ।। २. 'योग्येन भाति महतां किल सम्पराय: ।।' इति पाठा० ।। ३. '-दाहूय राजसचिवप्रभृतीन् समन्तात् ।' इति पाठा० ।।

चन्द्रो न चास्ति यदि जेष्यति नः पुरं स,
वक्त्रं कथं नु भविता जनतासमक्षम्[१] ।
लोको वदिष्यति न कोऽपि समस्ति वीर,
आभापुरीं रिपुगणादिह रक्षिता यः ।। ९३ ।।

वीरे भवत्यपि भवत्ययमल्पवीर्य,
आभापुरीं यदि बलेन वशे विदध्यात् ।
कीर्तिर्व्रजिष्यति रसातलमुज्ज्वला द्रा-
गद्यावधि स्वभुजविक्रमसङ्गृहीता[२] ।। ९४ ।।

नैवाऽधुनाऽस्ति ननु वीरमती क्रियाया,
आलोचनस्य समयो, निजवंशकीर्तिम् ।
आलोक्य शत्रुविजये प्रतिबद्धकक्षा,
यूयं किलाऽद्य भवत प्रविहाय तन्द्राम् ।। ९५ ।।

चन्द्रोऽपि तेऽमुमुपकारमवश्यमेव,
स्वान्ते विधास्यति कृतज्ञशिरोमणिः सः ।
नो कुक्कुटाऽऽकृतिमतोऽपि हतं सुतेज-
स्तस्याऽस्ति, केवलमसौ न मनुष्यरूपः" ।। ९६ ।।

इत्थं प्रधानवचनं प्रणिशम्य तेऽपि,
प्रोचुः कृताञ्जलिपुटा विनयादमात्यम् ।
'चन्द्रप्रतापमिहिरः सहसैव खण्डं,
खण्डं विधास्यति हि हेमरथं हिमं नु ।। ९७ ।।

---

१. 'भ्रष्टा भविष्यति तदा भवदीयकीर्तिः ।' इति पाठा० ।। २. '-आभापुरीं यदि च जेष्यति तर्हि मन्ये । शेते करी मशकपादविपादिकाया-माजन्म तेऽपयश एतदहो नु तिष्ठेत् ।।' इति पाठा० ।।

ये चन्द्रभूपपरिपोषितवीरसङ्घा-
स्ते स्युः प्रधानसमये किमहो कृतघ्नाः ?।
स्मृत्वा तदीयचरणं सहसैव सर्वा-
ञ्छत्रून् विहिंस्य भवतां मुदमाशु कुर्मः' ॥ ९८ ॥

(द्रुतविलम्बितवृत्तम्)

इति निशम्य वचः सचिवस्तदा,
प्रघनवाद्यमताडयदञ्जसा ।
सकलसैन्यसमुद्धतविक्रमः,
प्रतिययौ स रणाय विशालधीः ॥ ९९ ॥

इति श्रीकस्तूरसूरिविरचिते श्रीचन्द्रचरित्रे
चतुर्थः सर्गः
समाप्तः

शासनसम्राट्पूज्याचार्यश्रीविजयनेमिसूरीश्वरपट्टधर
पूज्याचार्यश्रीविजयविज्ञानसूरीश्वरपट्टधरप्राकृतविशारद
पूज्याचार्यश्री विजयश्रीकस्तूरसूरिप्रणीतं

# चन्द्रचरित्रे पञ्चमः सर्गः

(पुष्पिताग्रावृत्तम्)

तत उभयदलस्य सैन्यसङ्घाः,
परिहृतजीवनदेहगेहमोहाः[1] ।
युयुधिर इह दर्पमत्तसिंह-
प्रतिमपराक्रमशालिनो नृवीराः ॥ १ ॥

प्रबलभटबुभुक्षिता[2]क्षराजा,
अरिकरिणः शितखड्गतीक्ष्णदंष्ट्राः ।
कवलमरचयन् कृतान्तकल्पाः,
प्रतिभटबाणपराहताश्च केचित् ॥ २ ॥

समरपटहनादनादितान्ताः,
[3]श्रुतपटुचारणकीर्त्त्यमानकाव्याः ।
द्विगुणितबलमाप्नुवन्त एते
प्रधनमकार्षुरनन्यकल्पमाशु ॥ ३ ॥

वरयितुमिह कीर्तिरूपलक्ष्मी-
मतिशयितैक्यजुषः परस्परं ते ।
अगणिततनुतापमात्तशस्त्रा,
उभयभटाः प्रतियोद्धुमारभन्त ॥ ४ ॥

---

१. '-मोहदर्पलेशाः' इति पाठा० ॥ २. 'सिंह०' इति टि० ॥ ३. 'निशमित-चारण-' इति पाठा० ॥

प्रजविहयमताडयंश्च केचिद्,
जगद्रिहाऽद्य परस्परस्य चाऽस्ति ।
प्रबलबलपरीक्षणस्य कालः,
स्वबलमये ! परिदर्शयस्व युद्धे ।। ५ ।।

अवसरमवलोकय स्वतेजः-
प्रतिभटरन्ध्रमवाप्य नैव सीद ।
भवति बलवतामिहाच्छखेला,
शितकरवालशरादिलक्ष्यदानात् ।। ६ ।।

रणशिरसि भवेद्धि तीर्थयात्रा,
बलतनुरक्तवहासु निम्नगासु ।
अनवसरनिमज्जनं चमूनां,
भवति फलाय पराय सर्वतो हि' ।। ७ ।।

तुरगखुरसमुद्धतो हि रेणु-
र्गगनतले प्रससार वायुनुन्नः ।
अशुभदिह रणस्थलोपरिष्टात्
सितशरदन्दघटाच्छटां दधानः[१] ।। ८ ।।

कतिचिदथ भटास्तथा विलग्ना,
भवति हि येन तुरङ्गमस्य चोच्चैः ।
उभयभटगतस्य चोर्ध्वसंस्था
स्थितिरवकाशमहो[२] विनैव तत्र ।। ९ ।।

प्रबलबलतनुत्रके तदानीं,
शितकरवालहतिर्विराजते स्म ।

---

१. 'अभवदिह रणस्य मध्यदेशे, भटपरिरोपित-स्तम्भकल्प एषः ।।' इति पाठा० ।।
२. 'अव्यहितम्' इति टि० ।।

द्विजगलगतयज्ञसूत्रलक्ष्मी-
रिव बलवक्षसि वक्रसम्प्रहारात् ।। १० ।।

चलति शरशते भुषुण्डिपाते,
जलधरवृष्टिरिवाऽत्र प्रावृषेण्या ।
चणचणदिति शब्दतो बभूव,
स्फुटकवचस्य विभेदनान्नराणाम् ।। ११ ।।

भवति रणवरेऽतिभीरवो ये,
परबलशस्त्रसमाहता विनेशुः ।
'अयि तव न हि जीवितस्य रक्षा,
क्वचन भवेदि'ति गद्यते स्म वीरैः ।। १२ ।।

'भवति यदि तवेप्सिता प्रियाया,
अभिनवसङ्गतिराशु शस्त्रजालम् ।
त्यज, निजभवनं व्रजाऽन्यथा नो
भवति पलायनतोऽपि जीवरक्षा' ।। १३ ।।

कतिचिदथ परस्परं विजघ्नुः[1],
क्षितितलमापुरनेकशो नृवीराः ।
तुरगगजपदाहताश्च केचिद्,
रणरजसा रमणं वितेनुरत्र ।। १४ ।।

युयुधिर इह नर्तिताः कबन्धा,
रणशिरसि क्षतविक्षताः कृपाणैः ।
निजतुरगमनेकपस्य दत्सु[2],
प्रतिविनिवेश्य निजघ्नुराशु शत्रुम् ।। १५ ।।

---

१. 'विहन्युः' इति पाठा० ।। २. 'दन्तेषु' इत्यर्थः ।।

शरशतहतिविक्षताश्च केचित्,
प्रबलभटाः समराङ्गणे विपन्नाः ।
उपरिकृतकलापका नटन्तः,
शिखिन इवाऽत्र विरेजुरप्रमत्ताः ।। १६ ।।

'अभवदिह नवावतारमस्मा-
कमि'ति हृदि प्रविचारयन्ति सैन्याः[१] ।
अतिनिशितमहासिधेनुकेयं,
वरयति नीचकुटुम्बिनीव वीरान् ।। १७ ।।

रणशिरसि हताश्च केऽपि वीरा,
भुवि पतिताः प्रतिभान्ति रक्तवक्त्राः ।
अनुभवमिव कुर्वते तदानी-
मतिरसवीररसस्य मत्तचित्ताः ।। १८ ।।

वहति रुधिर निम्नगा समन्ता-
दभरत तासु च योगिनीसमूहः ।
निजनिजमथ पात्रमात्तहर्षः,
पिशितमहो परिभक्षयत्यजस्त्रम् ।। १९ ।।

अगमदिह गणः पिशाचकानां[२],
परिबुभुजे पललं हसन् भटानाम् ।
बहुरपि पिशिताशनः पतत्री,
गगनतलं परिवृत्य तिष्ठति स्म ।। २० ।।

अगमदथ मृगेन्द्रपृष्ठसंस्था,
समरभुवि प्रथितप्रभावदेवी[३] ।

---

१. 'वीराः' इति पाठा० ।। २. 'खेचरीणां' इति, 'पक्षिणीनां' इति च पाठा० ।।
३. 'वीरमत्याराधिता देवी' इति टि० ।।

अनुनयमधिगृह्य वीरमत्या-
स्तदरिबलप्रशमाय सद्य एव ।। २१ ।।

सुमतिसचिवपालितो बलौघो,
रिपुबलमाशु विनाश्य हेमभूपम् ।
वशगमधिचकार यत्नतोऽमुं,
दृढपरिबद्धमथाऽचरत् प्रधानः ।। २२ ।।

जयमथ सचिवो रणेऽधिगम्य,
बहुतरवाद्यमवादयत् तदानीम् ।
अतिमृदुवचनैर्वरूथिनीनां,
रभसयुधं[1] प्रशशंस सोऽथ धीरः ।। २३ ।।

सुमतिरतिमुदाऽऽशु हेमभूपं,
कतिपयसैन्यसहाय आनिनाय ।
सविधमरिजनं स वीरमत्या,
दृढपरिबन्धनबद्धमाप्तलज्जम् ।। २४ ।।

अवददथ विलोक्य तं तदा सा,
'किमु परिजेतुमगा मदीयदेशम् ?।
कतिपयबलसाधनो, न लज्जा-
ऽभवदिह बालविचेष्टितस्य ते किम् ? ।। २५ ।।

सह कथमभवो मया नियोद्धुं,
मम पदसेवकतुल्य एव नित्यम् ।

---

१. '०मतिरभसान्' इति पाठा० ।।

सुमतिसचिव एव ते मदानां
करिण इवाऽस्ति हृतौ मृगाधिराजः[१]' ।। २६ ।।

इति बहुतरभर्त्स्यमानमेनं,
मृदुवचनैः सचिवोऽनुनीय राज्ञीम् ।
कृतबहुविधसत्कृतिं तदैव,
क्षितिपमहो परिमोचयाञ्चकार ।। २७ ।।

सुरभिकुसुमवासितेन वारा-
ऽस्नपयदनु प्रशुचिप्रदाय वासः ।
परिमलपरिलुब्धमत्तभृङ्ग-
मलयजचन्दनमर्पयाञ्चकार ।। २८ ।।

बहुविधरसभावितं सुभोज्यं,
नृपतिममुं परिभोज्य वीरमत्याः ।
सविधमधिजगाम तेन सार्द्धं,
क्षितिपतिमेनमुवाच साऽपि राज्ञी ।। २९ ।।

'अयि नृप ! मम शासनं त्वयाऽद्य-
प्रभृति समन्तत एव पालनीयम्' ।
इति वचनमसौ निशम्य राज्ञीं,
कृतकरसम्पुट आजगाद भूपः ।। ३० ।।

'जननि ! तव न चैव[२] लोपयिष्ये
[३]कमपि निदेशनमाशरीरपातात्' ।

---

१. 'मृगेन्द्रकल्पः' इति पाठा० ।।, इतोऽग्रे- 'न हि किमु तव दर्शनस्य पूर्वं, सृतिमगमन्नगरं मदीयमेतत् । वद नृप ! किमु ते न चाऽत्र लज्जा-भवदयि निस्त्रप मेऽनुधावने वा ('हि' इति पाठा०) ।।' इति निष्कासितः श्लोको दृश्यते ।। २. 'कदापि' इति पाठा० ।। ३. 'न हि तव शासन-' इति पाठा० ।।

इति सविनयमेष तामुदित्वा,
परिषदमाप्य समास्थित क्षितीशः ।। ३१ ।।

शरशतमितनर्तकैः समेतः,
शिवकुमराभिधनर्तकस्तदानीम्[१] ।
नृपपरिषदमेत्य वीरमत्याः,
सविनयवन्दनमाततान विज्ञः ।। ३२ ।।

'कुत इह समुपागमो नटेश !,
त्वमथ समानवयोभिरेभिरेवम् ।
कुटिलकचकलापमादधानः,
सुरुचिरवेषधरोऽक्षितोषदक्षः[२]' ।। ३३ ।।

इति वचनमसौ निशम्य राज्ञ्याः,
प्रणिगदति स्म नमस्कृतिं विधाय ।
'नृपतिवरनमस्कृते समागां,
धनददिशं प्रतिलोकयन् समन्तात् ।। ३४ ।।

नृपतिगणमरञ्जयं कलाभिः,
कतिपयलक्षधनं च तौषिकेऽलाम्[३] ।
तव नगरविलोकनाय चाऽगां,
प्रबलपराक्रमशातितारिवर्गे ! ।। ३५ ।।

तव नगरयशो यथैव राज्ञि !,
श्रुतमभितः खलु वर्तते तथैव ।
चिरतरमभिरक्ष निःसपत्ना-
मवनिमये ! परिभुङ्क्ष्व राजभोगम् ।। ३६ ।।

---

१. '-नर्तकाधिराजः' इति पाठा० ।। २. '-ऽक्षिलोभकारी' इति पाठा० ।। ३. 'समाददानः' इति पाठा० ।।

भवति यदि निदेश आशु तेऽहं,
निजपुरुषैः सममारभेऽत्र नाट्यम् ।
तव निरुपममेत्य संप्रसादं,
सपदि ददामि जलाञ्जलीनलक्ष्म्यै' ।। ३७ ।।

इति वचनमसौ निशम्य राज्ञी,
सपदि ददौ नटपुङ्गवाय चाऽऽज्ञाम् ।
अथ नटपुरुषाः समाससञ्जु-
र्निजनिजकौशलमाशु बुद्धिमन्तः ।। ३८ ।।

निजमुखकमलं विधुप्रभं ते,
सपदि विधाय विभूषणाञ्चिताङ्गाः[१] ।
ढिगढिगदिति शब्दमारभन्त[२],
स्फुरदुरुताडित[३]ढक्कया तदानीम् ।। ३९ ।।

अतिशयमृदुलैः स्वरैः सुगीतिं,
लयमधुरां प्रजगुर्नटाश्च केचित्[४] ।
मृदुमृदुमुरजैर्विपञ्चिकाभिः,
कलमिह संसदि लोककर्णहारि[५] ।। ४० ।।

सरिगमपधनीति सप्तभिस्ते,
नटतिलकाः प्रजगुः स्वरैः सुगानम् ।
विततमिह ययुश्च षट् सुरागा-
स्त्रिदशमिता खलु रागिणी च गाने ।। ४१ ।।

---

१. '-ञ्चितः सन्' इति पाठा० ।। २. 'शब्दमाततान' इति पाठा० ।। ३. '-ताडन-' इति पाठा० ।। ४. '-प्रजगौ नटश्च कश्चित्' इति पाठा० ।। ५. '-गायति स्म रागात् ।।' इति पाठा० ।।

अधिसभमभवत् तदा जनौघो[१],
हरिण इवाऽऽशु तदेकतानचित्तः[२] ।
शिवकुमरनटेश्वरस्तदाऽथो[३],
बहुविधनर्तनमाततान विज्ञः ।। ४२ ।।

मृगपति-करिणोः करालरूपं
व्यरचयदेष तथा च वाजिनोऽपि ।
नवनवबहुकौतुकं तदेत्थं[४],
नटमुकुटः परिदर्शयाञ्चकार ।। ४३ ।।

अवसरमधिगम्य ताम्रचूडं,
कनकमये दृढपञ्जरे[५] निषण्णम् ।
स्वपतिरिति विचिन्त्य तं प्रगृह्य,
नृपदयिता समुपाययौ गवाक्षे ।। ४४ ।।

अधिसभमुदरोपयत्[६] तदानीं,
नटवर एष सुदीर्घवेणुदण्डम्[७] ।
परित इह विधाय शङ्कुमस्यो-
परि दृढरज्जुभिराबबन्ध तज्ज्ञः[८] ।। ४५ ।।

तदुपरि समरोपयद् गुवाकुं[९],
स्थिर परिबन्धनतो [१०]नटाधिराजः ।
अदिशदथ पटुः स मङ्क्षु पुत्रीं[११],
रतिसदृशीं शिवमालिकाऽभिधानाम् ।। ४६ ।।

---

१. '-तदाऽतिरागाद्' इति पाठा० ।। २. 'गृहमिव तस्य मनोरमं यथार्थम्' इति पाठा० ।। ३. '-तदादौ' इति पाठा० ।। ४. 'तदानीं' इति पाठा० ।। ५. 'किल पञ्जरे' इति पाठा० ।। ६. 'अधिसभमध्यरोपयत्' इति पाठा० ।। ७. '-च वेणुदण्डमेकम्' इति पाठा० ।। ८. 'विद्वान्' इति पाठा० ।। ९. 'पुगीफलम्-सोपारी' इति टि० ।। १०. 'नरा-' इति पाठा० ।। ११. 'नटवरतनया कलाविधिज्ञा' इति पाठा० ।।

प्रथममथ नतिं विधाय राज्या[१]-
स्तदनु यशः परिगीय चन्द्रकस्य
निजकनिपुणतां प्रदर्शयन्ती,
त्वरितमरोहदसौ शिरोऽस्य वेणोः[२] ।। ४७ ।।

शिवकुमरनटो जगाद पुत्रीं,
'स्थिरहृदयोपरि[३] सावधाननेत्रा ।
सपदि[४] दुहितराऽऽतनुं स्वशिल्पं,
नटकुलजाऽसि कलासु पण्डिताऽसि ।। ४८ ।।

इह हि यदि न ते भवेत् कलायाः,
परिचय एव स नाऽन्यतोऽपि भावी ।
भवति नटजनस्य भाग्ययोगाद्,
बुधजनमण्डितसत्सभा कदाचित्' ।। ४९ ।।

इति जनकवचो निशम्य बाला,
क्रमुकतटे विनिधाय नाभिदेशम् ।
गगनतलगता ननर्त वेणो-
रुपरि जवेन[५] कुलालचक्रवत् सा ।। ५० ।।

तदनु नटजनैः[६] प्रताड्यमाने,
मुरजवरे शिर आनिधाय पूगे ।
मुनिमतिरिव निश्चला स्वतत्त्वे,
चिरतरमास्थित सा मृदुस्वभावा ।। ५१ ।।

---

१. 'प्रथममथ ननाम सा च राज्ञीं' इति पाठा० ।। २. 'निजकजनकतः प्रलभ्य चाज्ञा-मुपरि समारुरुहे तयाऽस्य वेणोः ।।' इति पाठा० ।। ३. 'स्थिरमनसाऽथ च-' इति पाठा० ।। ४. 'उपरि' इति पाठा० ।। ५. 'सभासु' इति पाठा० ।। ६. 'नटगणैः' इति पाठा० ।।

पुनरपि परिवृत्य सा गुवाके[1],
स्थिरमनसा गरुडासनं ततान ।
अथ खपुरतले निधाय वाम-
क्रममनु नृत्यमधाद् धरा स्थितेव[2] ।। ५२ ।।

शिवकुमरनटो जगाद 'नीचै-
रवतर, दृष्टमहो सुकौशलं ते ।
अवगतमभवत् पुरा न चेत्थं[3],
क्वचिदपि संसदि विस्मयावहं यत्[4]' ।। ५३ ।।

पितृवचनमथो[5] निशम्य साऽऽगाद्,
गगनतलात् सुरनिम्नगेव भूमौ ।
तदनु नटजनाः कुमारिकां तां,
मुदितहृदो लघु गाढमालिलिङ्गुः ।। ५४ ।।

नटवर उदगादपूर्वतालै-
र्धवलयशः किल चन्द्रभूमिपस्य ।
सविनयमवखिद्य वाञ्छति[6] स्म,
प्रशममसौ निजनर्तनस्य राज्ञ्याः ।। ५५ ।।

निजतनययशो निशम्य राज्ञी,
हृदि परितापवती जगाद नैव ।
क्वचिदपि सहते द्विषः यशो नो[7],
कुटिलजनः परिवर्णितं परेण ।। ५६ ।।

---

१. 'पूगीफलोपरि' इति टि० ।। २. 'क्रममियमास्थित चक्रवद् भ्रमन्ती ।।' इति पाठा० ।। ३. 'तवेत्थं' इति पाठा० ।। ४. 'सकलकलासु परं न कौशलं हि ।।' इति पाठा० ।। ५. '-मसौ' इति पाठा० ।। ६. 'मृग्यते' इति पाठा० ।। ७. 'नहि खलु सहते द्विषः समृद्धिं' इति पाठा० ।।

इति न वितरति स्म दानमस्मा,
अतिशयरोषवती हृदि स्वकीये[१] ।
अनुनयवचनान्यपीह तस्याः,
हृदयतलं विविशुर्नटेश्वरस्य[२] ।। ५७ ।।

परिषदपि न तां विना पुरस्ता-
ददत दानमहो नटाय किञ्चित् ।
वितरति सलिलं यदैव मेघः,
सरिदपि कूलमुदञ्चतीह वेगात्[३] ।। ५८ ।।

शिवकुमरनटो जगौ तथैव,
प्रबलयशो ननु चन्द्रभूधवस्य ।
नहि खलु बुबुधे विरागहेतुं,
कथमपि विज्ञतमोऽपि वीरमत्याः ।। ५९ ।।

अथ मनसि विचारयाञ्चकार,
'क्षितिपतिराशु सुवर्णपञ्जरस्थः ।
मम विमलयशःप्रगाणतोऽस्मै,
नियतमियं वितरेन्न तुष्टिदानम्[४] ।। ६० ।।

यदि विकलमनोरथः सभायाः[५],
नटवृषभः प्रतियास्यति प्ररुष्टः ।
पुनरपि नहि मे यशःप्रगाणं,
क्वचिदपि राजसभासु संविधाता[६] ।। ६१ ।।

---

१. 'स्वपाणिपद्मेन' इति पाठा० ।। २. 'कतिचिदनुजगाद वक्रवाक्या-न्यपि न हि रागलवोऽप्यजायताऽस्मिन् ।।' इति पाठा० ।। ३. 'भवति न हि विना सुवृष्टियोगात्, क्वचिदपि वेगवती नदी कथञ्चित् ।।' इति पाठा० ।। ४. 'नियमियं नहि दास्यते हि [-ऽपि] दानम् [किञ्चित्] ।।' इति पाठा० ।। ५. '-रथोऽयमस्माद्' इति पाठा० ।। ६. '-सभास्वयं विधाता ।।' इति पाठा० ।।

इति मनसि विचिन्त्य वक्त्रचन्द्रं,
प्रथममसौ प्रविलोक्य नैजवध्वाः ।
तदनु निजयशःप्रगाणहर्षात्,
सरसमतिः कृकवाकुरप्यदित्सत् ।। ६२ ।।

[१]सुरुचिरनिजपञ्जरस्य यत्नैः,
समकृषदाशु स चञ्चुतः शलाकाम्[२] ।
बहुतरमणिमण्डितं ततोऽथ-
श्चषकमपातयदस्य तोषकृत्यै ।। ६३ ।।

शिवकुमरनटः सविस्मयं तत्[३],
प्रकटतया कृकवाकुतोषलब्धम् ।
चषकमनुपमं समीक्षतां द्राक्[४],
निजशयतो जगृहे तथा प्रहृष्टः ।। ६४ ।।

चषकमथ करे निधाय चन्द्र-
क्षितिपतिकीर्तिमसौ जगौ वरेण्याम् ।
तदनु परिषदाशु वस्त्रभूषा-
दिकमतिमूल्यमदाच्च दानमस्मै ।। ६५ ।।

मणिखचितविभूषणेन सज्जं,
शिवकुमरं प्रसमीक्ष्य तत्सुताऽपि[५] ।
नहि निजपितरं खलु व्यजानाद्,
भवति हि वेषविभेदतो विमोहः[६] ।। ६६ ।।

---

१. 'लघुलघु' इति पाठा० ।। २. 'समवकृषत् स च चञ्चुतः शलाकाम् ।' इति पाठा० ।। ३. 'शिवकुमरनटो तथा सभाऽसौ' इति पाठा० ।। ४. 'तं' इति पाठा० ।। ५. 'तत्प्रियाऽपि' इति पाठा० ।। ६. 'मम पतिरिति नो व्यजानाद्, दमरसमाकृतितां गतो यतोऽसौ ।।' इति पाठा० ।।

बहुतरधनलाभतुष्टमेनं,
नटमवलोक्य बभूव वीरमत्याः ।
हृदि दहनशिखाप्रदाहखेदो
ह्यनभिमतं प्रमदाय किं कुतोऽपि[१] ? ।। ६७ ।।

बहुविधमणिलाभतो नटोऽसौ,
प्रमुदितचित्ततया स्ववासमाप ।
व्रजति हि सकलो निजानुरूपा-
ऽऽदरमधिगत्य चिरं कृतार्थभावम्[२] ।। ६८ ।।

'क इह धनवतां वरो मदग्रे,
प्रथमत एव नटाय सम्प्रदाता[३] ।
किमु मम स न वेत्ति मन्युवह्निं ?
यदिह हठाच्छलभायते समिद्धे' ।। ६९ ।।

इति बहुविधमन्युमादधानां,
सुमतिरसान्त्वयदाशु राजसूं ताम्[४] ।
भवति हि नृपतेः क्रुदग्निशान्तौ[५],
झटिति सुहृत्सचिवः सुमेघकल्पः[६] ।। ७० ।।

'जननि ! नहि वृथाऽऽचरेः प्रकोपं,
तव विमलं यश एव वर्द्धतेऽतः ।
भवति य इह सत्प्रतापशूरः,
प्रसरति[७] जन्यविधौ पुरः स एव ।। ७१ ।।

---

१. 'दृढतरमन्युमवाप तत्र राज्ञी ।।' इति पाठा० ।। २. 'भवति गुणिजनो गुणानुरूपा-ऽधिकफलमेत्य यदाशु हृष्टचित्ताः (-चेताः) ।।' इति पाठा० ।। ३. 'यो ददौ सः' इति पाठा० ।। ४. 'सुमतिरवोचत राजमातरं ताम् ।' इति पाठा० ।। ५. 'क्रुदग्निदाहे' इति पाठा० ।। ६. 'झटिति शमाय सुहृच्छशाङ्क-कल्पः ।।' इति पाठा० ।। ७. 'सत्प्रतापशूरो-ऽवतरति' इति पाठा० ।।

निजनिरुपमसद्यशो निशम्य,
प्रबलमतिः खलु निह्नुतः कथं स्यात् ? ।
इति भवति तव प्रसादपात्रं,
कथमिह मन्युमुपैषि हर्षहेतौ ।। ७२ ।।

तव शिशव इह विभान्ति पौराः,
क्रुदुपशमस्तत एव तेषु योग्यः' ।
इति बहुविधबोधनं च राज्ञ्याः,
क्रुदुदयमेव चकार पूर्वतोऽपि[१] ।। ७३ ।।

अतिरुषमवलोक्य वीरमत्या,
गुरुतरभीतिमुपेत्य भास्करः किम् ? ।
निजवपुरवगोपयन्ति वाऽब्धौ,
सपदि निपातमधादिवाऽपराद्रेः[२] ।। ७४ ।।

नहि सुखमियमाप मञ्चकेऽपि,
प्रबलशुचा ननु जाग्रती निशायाम् ।
अपकृतिपरिचिन्तया परस्य,
स्वहृदयतोऽपि रुषेव याति शान्तिः[३] ।। ७५ ।।

उषसि परिसमाप्य सा स्वकृत्यं,
सद उपगम्य च पौरलोकजुष्टाम्[४] ।

---

१. 'नहि कुरु कोपमतः स्वपोतवृन्दे । इति बहु परिबोधिताऽपि राज्ञी, नहि बुबुधे निजमानहानितोऽसौ ।।' इति पाठा० ।। २. 'द्रुतमतिभीततया दिवाकरोऽपि । निजवपुरवगोपयन् महाब्धौ, तमसि महीयसि निलीयते स्मेव ।।' इति पाठा० ।। ३. 'भवति न हि सुखाय शोकहेतौ, किमपि सतां हृदये प्रवर्धमाने ।।' इति पाठा० ।। ४. '-लोकमाहूय ।' इति पाठा० ।।

शिवकुमरनटं समादिशत् तथैव,
'प्रकुरु कलाकुशल ! स्वनाट्यमाशु' ।। ७६ ।।

अथ नटवर आततान नाट्यं,
पुनरपि वंशमरोपयत् सभायाम् ।
सकलजननमस्कृतिं च कृत्वा[१],
तदुपरि सा शिवमालिकाऽऽरुरोह ।। ७७ ।।

निजपतिमवगृह्य पञ्जरस्थं,
तदनु गवाक्षमगाद् गुणावली सा ।
नरपतिरपि सावधानचित्तो-
ऽजनि नटराजकलेक्षणे तदानीम् ।। ७८ ।।

निरुपममवदर्शयन् स नाट्यं,
निजतनयासहितो नटाधिराजः ।
अवसरमधिगम्य दानलब्धे-
रथ बहु कीर्तयति स्म चन्द्रभूपम् ।। ७९ ।।

'त्रिभुवनतिलकः स चन्द्रभूपो,
भवति, यदीयगुणप्रकीर्त्तनेन ।
त्रिभुवनमहितोऽपि देवराजो-
ऽमरपरिषत्सु हि लोमहर्षयुक्तः' ।। ८० ।।

इति निजतनयस्य कीर्त्तिगानं,
श्रवणपुटातिथितां गतं न सेहे ।
अजनि मुखविधू रुडब्दमन्दो
हृदयगतं हि लघु व्यनक्ति मन्दः[२] ।। ८१ ।।

---

१. 'विधाय' इति पाठा० ।। २. '-श्रवणपुटेन निपीय राजमाता । अजनि गृहतेर्विलोकनेन, चकितमना हि मलिम्लुचालिवत् सा ।।' इति पाठा०।।

इति वितरति नैव दानमेषा,
परिषदपि प्रथमं न दातुमीशा ।
स्थितिमपनयते न यत् समाजो,
भवतु यथा न महीयसो लघुत्वम्[१] ।। ८२ ।।

'भवति न लवणं विना सुभोज्य-
मवनिरुहं न विना यथा लता हि ।
[२]मदजलगजमन्तरा न सेना,
लसति तथा परिसन्न चन्द्रशून्या[३]' ।। ८३ ।।

इति शिवकुमरेण कुक्कुटोऽसौ,
[४]विशदयशः परिकीर्तितं निशम्य ।
हृदि निजजननीभयं न कृत्वा,
नटवृषभाय बभूव दित्सुराशु[५] ।। ८४ ।।

सपदि बहुसुरत्नराशिजुष्टं[६],
चषकमसावददादनर्घ्यमेकम् ।
झटिति नटवरः प्रगृह्य चैनद्[७],
बहुसुयशः प्रजगौ तदीयमेषः ।। ८५ ।।

वितरति हि यथाऽम्बु वारिवाहः,
परिषदपि प्रददौ तथैव हेम ।
अवसरमधिगम्य दानशौण्डः,
क्वचिदपि नैव निलीयते कदापि ।। ८६ ।।

---

१. 'इयमिति विदधाति किं प्रदाने, नगरजनाः जगदुः परस्परं हि ।।' इति पाठा० ।।
२. 'मदकलगज-' इति पाठा० ।। ३. 'चन्द्रभूपम्' इति पाठा० ।। ४. 'निजसुयशः-' इति पाठा० ।। ५. 'दित्सुरेषः' इति पाठा० ।। ६. '-पुष्टं' इति पाठा० ।। ७. 'चैनं' इति पाठा० ।।

चरितमिति विलोक्य कुक्कुटस्य,
भृशतरमन्युवशेन राजमाता ।
सपदि करतले निधाय खड्ग-
मतिरभसेन गवाक्षमाजगाम ।। ८७ ।।

अतिशयितरुषा च[१] पञ्जरं तं,
निजकरतः परिगृह्य संजगाद ।
'अयि ! खग ! नहि तेऽधुनाऽपि संज्ञा-
ऽधमकुलपांसन ! निस्त्रपोऽसि नूनम्[२] ।। ८८ ।।

अयि मम पुरतो गतेऽह्नि चाऽद्य,
त्वमददथाः किमु दानमप्रदेयम् ? ।
शिवकुमरनटाय, न त्वमद्य,
प्रभवसि जीवितुमस्मदीयकोपात्' ।। ८९ ।।

इति निपुणममुं प्रभर्त्स्य कोशा-
च्छितकरवालमसौ बहिश्चकार ।
तदनु सपदि हस्तामारुरोध,
प्रसभमुपेतभया गुणावली द्राक्[३] ।। ९० ।।

'जननि ! खगजनो विवेकशून्यो,
भवति, न ते परिशोभतेऽत्र कोपः ।
पिबति सति जलं स्वचञ्चुतोऽस्मिं-
श्चषक अपेत्य पपात[४] भूमिदेशे ।। ९१ ।।

भवति नहि खगस्य जातु कस्मै-
चिदपि हि किञ्चिदपि प्रदातुमीहा ।

---

१. 'हि' इति पाठा० ।। २. 'अयि खग ! न हि तेऽत्रपा विनष्टाऽधमकुलपांसन ! निस्त्रपोऽधुनाऽपि ।।' इति पाठा० ।। ३. 'प्रसभमसौ हि गुणावली तदीयम् ।।' इति पाठा० ।। ४. '-श्चषक इति प्रपात' इति पाठा० ।।

किमपि किमपि पञ्जरस्थ एष,
स्वहृदयमोदकरं करोत्यजस्रम्' ।। ९२ ।।

इति वचनमथो निशम्य संसत्[१],
त्वरिततरं प्रययौ तयोः समीपम् ।
बहुविधविनयं विधाय राज्याः,
खगवरमाशु विमोचयाञ्चकार ।। ९३ ।।

तदनु परिषदं समाजगामा-
[२]ऽनुपमनृपासनमाश्वलञ्चकार ।
शिवकुमरनटो विलोक्य राज्ञीं,
भृशतरमोदमवाप शान्तचित्ताम् ।। ९४ ।।

अवसरमधिगम्य वीरमत्या,
मृदुवचनैरवशान्तयन् प्रकोपम् ।
गुणशतमभिनन्द्य सुप्रसन्नां,
व्यरचयदेव नटस्तदा स तज्ज्ञः[३] ।। ९५ ।।

पुनरपि निजनाट्यमाततान,
प्रथम इवाऽधिरुरोह वंशकोटौ ।
शिवकुमरनटस्य पुत्रिका सा,
पुनरपि कुक्कुटसम्मुखं[४] ननर्त ।। ९६ ।।

अवसरमथ कुक्कुटः स लब्ध्वा,
मृदुवचनैः शिवमलिकां जगाद ।
'अपि नटदुहितः ! प्रशस्यबोधे !,
खगवचनं परिवेत्सि तत्प्रजाने ! ।। ९७ ।।

---

१. 'सभा' इति टि० ।। २. 'प्रबलनृपासन-' इति पाठा० ।। ३. 'च राज्ञीम्' इति पाठा० ।। ४. '-सम्मुखी' इति पाठा० ।।

अत इह[१] हृदयस्य गूढभावं,
तव पुरतः प्रकटीकरोमि बाले ! ।
सदयहृदयता त्वया विधेया,
मयि मतिशालिनि ! दुर्दशामुपेते[२] ।। ९८ ।।

यदि नवकलया प्रसूः प्रसन्ना,
किमपि च दित्सुरसौ भवेत् तवेष्टम् ।
उपकृतिनिपुणे ! विहाय वित्तं,
त्वमथ निजां मयि लालसां प्रकुर्याः[३] ।। ९९ ।।

इयमुपकृतिरास्वदेहपातात्,
तव न मदीयहृदो निरेष्यतीह ।
परकृतनिजकार्यसिद्धिरद्धा,
कृततदपह्नुतिरेव सज्जनः कः[४] ? ।। १०० ।।

भवति यदि तवेप्सितं धनं तद्,
सहकारमवाप्य भावि पूर्णम्[५] ।
अवसरमधिगत्य वेदयिष्ये[६],
सकलमिदं सुभगे ! स्वकीयवृत्तम्' ।। १०१ ।।

---

१. 'इति निज-' इति पाठा० ।। २. 'त्वयि यदि जननी भवेत् प्रसन्ना, वृणु निजवाञ्छितममित्यसौ वदेच्चेत् ।।' इति पाठा० ।। ३. 'यवफलशिखराद् यदाऽवतीर्णा, भवसि तदा स्वकलां प्रदर्श्य विज्ञे ! । तव पदकमलं पतामि तर्हि (बाले !-पाठा०) धनमवलोक्य न मोहमाविदध्याः॥' इति पाठा० ।। ४. 'वदति यदि किमीप्सितं तवेति, त्वमथ विमार्गय मां हि ताम्रशीर्षम् (-चूडम्) । इयमुपकृतिरास्वदहेपातात्, तव न मदीयहृदो निरेष्यतीह ।।' इति पाठा० ।। तत्र 'निरेष्यति' इत्यत्र 'निर्गमिष्यति' इति टि० ।। ५. 'मम मिलनेन न दुर्लभं तवाऽस्ति।' इति पाठा० ।। ६. 'अयि तव पुरतो निवेदयिष्ये' इति पाठा० ।।

इति वचनमसौ निशम्य बाला,
यवफलतः समवातरच्च नीचैः ।
पितरमथ रहः प्रणीय तस्मा-
अवददसौ कृकवाकुजल्पितं तत् ।। १०२ ।।
निजदुहितुरिदं वचो निशम्य,
प्रबलमुदं समवाप्य तां प्रशंसन् ।
शिवकुमरनटो यशोऽप्यगायन्
मधुरवचोभिरपूर्वमेष राज्याः[१] ।। १०३ ।।
अथ नटगुणदर्शनात् प्रहृष्टा,
प्रियतरवाचमुवाच राजमाता[२] ।
'नटवर ! परिमार्गय स्वमिष्टं,
गुणिजनमुख्यतमाय तेऽस्मि दित्सुः[३]' ।। १०४ ।।
इति वचनमसौ निशम्य राज्याः,
कृतकरसम्पुट आजगाद तस्यै ।
'मयि यदि तव राज्ञि ! संप्रसादो,
वितर तदा कृकवाकुमेतमेकम्[४] ।। १०५ ।।
अयि मम तनया पटुत्वलब्ध्यै,
श्रयति सदा[५] कृकवाकुपद्धतिं यत्[६] ।
नहि मम सविधेऽस्त्यसावमूदृक्[७],
तव पुरतः परियाच्यते मयाऽतः[८]' ।। १०६ ।।

---

१. 'मधुरवचोभिरसौ हि वीरमत्याः ।।' इति पाठा० ।। २. 'नटवृषभं पुरतः स्वमानिनाय ।' इति पाठा० ।। ३. 'तव हृदयङ्गममद्य सम्प्रदास्ये' इति पाठा० ।। ४. '-माशु' इति पाठा० ।। ५. 'मुदा' इति पाठा० ।। ६. 'सा' इति पाठा० ।। ७. '-ऽस्ति कुक्कुटोऽन्यः' इति पाठा० ।। ८. 'मयेति' इति पाठा० ।।, इतोऽग्रे- 'भवति यदि तवाऽपि तत्र मोहः, परमथ पालय कुक्कुटं प्रकामम् । मम न हि धनधान्यसंजिघृक्षा, भवति परं चरणायुधस्य वाञ्छा ।।' इति पाठा० ।।

न्यगददिति निशम्य 'किं त्वयाऽयं,
मम पुरतः परियाच्यते खगोऽल्पः ।
किमु वितरणतोऽस्य सम्भवेद् वा[१],
सुयश ! इति प्रविचारय स्वचित्ते[२] ।। १०७ ।।

वितरति सुजनो यतः[३] सुवर्णं,
मणिमथ हस्तिनमश्वमच्छभूषाम् ।
श्रुतमपि न हि, कोऽपि तुष्टचेताः,
खगमददान्नटराज ! ताम्रचूडम्[४] ।। १०८ ।।

मम तनयवधूः सदैव चाऽमुं,
स्पृहयति कुक्कुटमिद्धभावपूर्णा ।
तव यदि वितरामि साऽतिशोका-
ऽऽकुलहृदयाऽत्र[५] भविष्यति प्रमुग्धा ।। १०९ ।।

अथ च वितरणे त्रपा ममाऽपि,
भवति हि सम्प्रति नर्तकाधिराज !' ।
शिवकुमरनटो जगाद 'तेऽत्र[६],
भवति किमित्थमहो वितर्क एषः ।। ११० ।।

भवति तव बहुप्रियोऽयमस्मा-
न्नहि मम दातुमना असि प्रकामम् ।
अहमिति परिवेद्मि, किं वृथा त्वं,
कथयसि 'मार्गयते ददामि सर्वम्' ?' ।। १११ ।।

---

१. 'मम च खगविहापितेन किं स्यात्' इति पाठा० ।। अत्र 'खगविहापितेन' इत्यत्र 'खगदानेन' इति टि० ।। २. 'प्रविज्ञ !' इति पाठा० ।। ३. 'परितोषतः' इति पाठा० ।। ४. 'भूमिपृष्ठे' इति पाठा० ।। ५. 'हि' इति पाठा० ।। ६. 'किं ते' इति पाठा० ।।

इति नटवचनं निशम्य राज्ञी,
खगवरदानमुरीचकार तस्मै ।
सचिवमथ गुणावलीप्रबोधा-
र्थमपि तदा व्यसृजद् द्रुतं सभास्थम्[१] ।। ११२ ।।
सुमतिसचिव एत्य तां जगाद,
प्रथममसौ वचनं स[२] वीरमत्याः ।
तदनु निजमतं विबोधहेतो[३]-
र्नृपदयितां कथयाञ्चकार विज्ञः ।। ११३ ।।
'अयि विशदमते ! नितान्तकष्टं,
तव सविधे भविताऽस्य कुक्कुटस्य ।
यदि नटवृषभाय दास्यसीमं,
निरवधि मङ्गलमस्य निश्चितं स्यात् ।। ११४ ।।
अतिसरलमतिर्नटस्य पुत्री,
निजतनुतोऽपि विशेषतः प्रमोदात्[४] ।
खगवरपरिपालनं विधाता,
वितर ततः कृकवाकुमाप्तबुद्ध्या' ।। ११५ ।।
इति सचिववचो निशम्य मूर्च्छा-
मगमदलं हृदि शल्यवेधितेव[५] ।
पुनरपि परिलभ्य चेतनां सा,
मनसि विचारयति स्म शोकखिन्ना ।। ११६ ।।
'अयि कथमपराधमन्तरेण
प्रियकृकवाकुमहो[६] ददाति तस्मै ।

---

१. 'सचिवमथ गुणावलीं प्रबोद्धुं, सपदि तदा परिमोचयाञ्चकार ।।' इति पाठा० ।। २. 'हि' इति पाठा० ।। ३. 'प्रकाशयन् स' इति पाठा० ।। ४. 'प्रियनिजजीवनतो ऽपि संविशेषात् ।' इति पाठा० ।। ५. '-मगमदसौ हि गुणावली तदानीम् ।' इति पाठा० ।। ६. '-मसौ' इति पाठा० ।।

नियतमियमनेकभेददुःखं
वितरितुमेव प्रपञ्चमादधाति[१]' ।। ११७ ।।

'सचिववर ! विलोकयाऽधुनाऽस्या
मतिपरिवर्तनमस्ति किं जरत्याः ।
मम पतिमकरोत् खगं, पुनस्तं,
नटवृषभाय ददाति यत् कठोरा ।। ११८ ।।

भवति हृदि जनस्य[२] यस्य हार्दं[३],
भवति हि दुःखममुष्य, नेतरस्य ।
अपि पतिमवलोक्य सन्निधिस्थं,
कथमपि जीवनधारणं करोमि' ।। ११९ ।।

अथ सचिवगिरा गुणावली सा,
बहुविधकौशलसंयुजाऽनुकूला[४] ।
विहगवरसमर्पणे नटाया-
ऽलमनुमतिं व्यदधाद् विचारदक्षा ।। १२० ।।

प्रियवरमवगृह्य साऽतिशोका-
दविरलनेत्रजलैः सिषेच कायम् ।
अपि मम हृदयेश ! मां सशोकां[५],
कथमवमुच्य दिगन्तमाशु यासि ? ।। १२१ ।।

'मम हृदयतले सदा निषण्णः,
सकलमहो प्रणयं प्रवेत्सि मे त्वम् ।

---

१. 'दलयितुमेव विमुञ्चतेऽस्य राज्ञीं ।।' इति पाठा० ।। २. 'भवति च हृदये हि यस्य हार्दं' इति पाठा० ।। ३. 'स्नेहः' इति टि० ।। ४. 'अथ सचिववरो गुणावलीं तां, बहुविधकोमलवाक्यतः प्रसाद्य ।' इति पाठा० ।। ५. 'विपन्नां' इति पाठा० ।।

इह बहुविधदुःखसंतप्तचित्तां,
प्रिय ! नहि मां स्मरणाध्वतो विजह्याः[1] ।। १२२ ।।

प्रिय ! विहितमनेकशोऽपराधं,
क्षमय यतोऽहमलं विबोधशून्या[2] ।
भवति नहि महानुभावचित्तः,
क्वचिदपि निर्दय इत्यतोऽर्थये त्वाम्[3] ।। १२३ ।।

कुरु मम पुरतः स्वनेत्रयुग्मं,
चिरमिह दुर्लभदर्शनो भवेर्यत् ।
व्रजसि नगरतोऽप्यतोऽतिदूरं,
मम हृदयान्न कदाऽपि नाथ ! सत्यम्[4]' ।। १२४ ।।

इति बहुविधमाप्तशोकवेगा,
भृशमरुदत् शिशुवच्च[5] चन्द्रजाया ।
स्वनखशिखरतो विलिख्य तस्यै,
न्यगददसौ कृकवाकुराशु विज्ञः ।। १२५ ।।

'अयि मृगशिशुलोचने ! वियोगे,
नहि कुरु दुःखमहं तवाऽस्मि बाले ! ।
सविधममलभावपूर्णचित्ते !,
पुनरपि लब्धनृकाय आगतः स्याम् ।। १२६ ।।

---

१. 'इति ('इह' इति पाठा०) बहुविधदुःखसंप्रमग्नां, प्रिय ! नहि मां स्मरणेन संत्यज त्वम् ।।' इति पाठा० ।। २. 'प्रिय ! मम सहतां सहस्रशोऽमुं, कृतमपराधमहो मयाऽतिबाढम् ।' इति पाठा० ।। ३. 'इत्यहं प्रवेद्मि' इति पाठा० ।। ४. 'पुनरपि दुर्लभदर्शनं भवेत् ते । भवसि पथिक एव नाथ! दूरं, जिगमिषुरस्ति भवान् ब्रुवे किमत्र ।।' इति पाठा० ।। ५. 'किल हाऽत्र' इति पाठा० ।।

अयि नहि परदेशसंश्रितस्य,
स्मरणपथात् परियास्यसि प्रमुग्धे ! ।
अचिरतरत एव सङ्गतः स्यां,
मम वचनं परिमन्यतां प्रिये!ऽदः' ।। १२७ ।।

अथ सचिववराय पञ्जरं त-
दददसौ नृपवल्लभा तदानीम् ।
सुमतिरपि ददौ च वीरमत्यै,
नटवृषभाय समार्पयच्च राज्ञी ।। १२८ ।।

निजशिरसि निधाय पञ्जरं त-,
न्मुदितमनाः प्रययौ नटः स्ववासम् ।
कृतकरयुगसम्पुटाऽतिनम्रा,
तमथ खगं शिवमालिका जगाद ।। १२९ ।।

'अयि नृपतिलक ! प्रभुं विनेयं[१],
नटसमितिः प्रबभूव पूर्वकाले ।
अथ च विमलभाग्ययोगतस्त्वां,
नृपमधिगम्य सभर्तृकाऽद्य जाता ।। १३० ।।

प्रथममथ तव प्रभो ! सुकीर्तिं,
सरसतया परिकीर्त्त्य सर्वकाले ।
नृपतिमथ ततः स्वजीविकायै,
नृपवर ! कीर्तयिताऽस्मि नाऽन्यथैतत्[२] ।। १३१ ।।

न हि किमपि कुरुष्व शोकमत्र,
प्रभुवर ! तेऽस्मि सदैव दासिकाऽहम् ।'

---

१. 'राजानं विना इयं नटसमितिः' इति बोद्धव्यम् ।। २. '-नान्यथा हि ।।' इति पाठा० ।।

इति सचिववचो निशम्य धैर्यं,
मनसि[1] विधाय सुवर्णपात्रमेकम् ।
निजपतिपरिभोजनाय देवी,
बहुविधभोज्ययुतं ददौ च[2] शीघ्रम् ।। १३८ ।।

सुमतिसचिव आजगाम सर्वं,
निजनृपताम्रशिखस्य वृत्तमस्यै ।
विजनमधिविधाय संजगाद,
प्रथितमतिर्नटराजपुत्रिकायै ।। १३९ ।।

तदनु नृपतिमेव संप्रणम्य,
प्रति निजधाम जगाम मन्त्रिमौलिः[3] ।
शिवकुमरनटः प्रयाणवाद्यं,
सपदि समाहतवांश्च धीरघोषम्[4] ।। १४० ।।

नटवरगमनस्य वाद्यघोषं,
सपदि निशम्य गुणावली स्वहर्म्यम् ।
अथ च समधिरुह्य नाट्यकर्त्र्याः,
शिरसि निषण्णपतिं समालुलोके ।। १४१ ।।

गतवति निजलोचनात् सुदूरे,
निजपतिपञ्जरमीक्षितुं न सेहे ।
करुणतररवैरथो[5] रुदित्वा,
त्वरितमसौ गतचेतना बभूव ।। १४२ ।।

मृदु पवनमथो विधाय शीतं,
जलमुपचर्य निनाय चेतनां ताम् ।

---

१. 'समधि-' इति पाठा० ।। २. 'मुमोच' इति पाठा० ।। ३. 'मन्त्री' इति पाठा० ।। ४. 'तदनु समाहतवांञ्जगाम तस्मात् ।।' इति पाठा० ।। ५. '-रियं' इति पाठा० ।।

इति सचिववचो निशम्य धैर्यं,
मनसि[1] विधाय सुवर्णपात्रमेकम् ।
निजपतिपरिभोजनाय देवी,
बहुविधभोज्ययुतं ददौ च[2] शीघ्रम् ।। १३८ ।।

सुमतिसचिव आजगाम सर्वं,
निजनृपताम्रशिखस्य वृत्तमस्यै ।
विजनमधिविधाय संजगाद,
प्रथितमतिर्नटराजपुत्रिकायै ।। १३९ ।।

तदनु नृपतिमेव संप्रणम्य,
प्रति निजधाम जगाम मन्त्रिमौलिः[3] ।
शिवकुमरनटः प्रयाणवाद्यं,
सपदि समाहतवांश्च धीरघोषम्[4] ।। १४० ।।

नटवरगमनस्य वाद्यघोषं,
सपदि निशम्य गुणावली स्वहर्म्यम् ।
अथ च समधिरुह्य नाट्यकर्त्र्याः,
शिरसि निषण्णपतिं समालुलोके ।। १४१ ।।

गतवति निजलोचनात् सुदूरे,
निजपतिपञ्जरमीक्षितुं न सेहे ।
करुणतररवैरथो[5] रुदित्वा,
त्वरितमसौ गतचेतना बभूव ।। १४२ ।।

मृदु पवनमथो विधाय शीतं,
जलमुपचर्य निनाय चेतनां ताम् ।

---

१. 'समधि-' इति पाठा० ।। २. 'मुमोच' इति पाठा० ।। ३. 'मन्त्री' इति पाठा० ।। ४. 'तदनु समाहतवाञ्जगाम तस्मात् ।।' इति पाठा० ।। ५. '-रियं' इति पाठा० ।।

तदनु सचिव एत्य धैर्यमस्या,
व्यदधदसौ[१] बहुयुक्तियुक्तवाक्यैः ।। १४३ ।।

कथमपि परिबोध्य मन्दिरे तां,
सचिववरः समुपानयत् तदैव ।
'अयि तव भवनं खगेन शून्यं,
न खलु विराजति प्राग्वदि'त्युवाच[२] ।। १४४ ।।

सपदि तदनुमोदनं चकाराऽ-
तिशयविषण्णमुखी गुणावली सा ।
विरहविहितसंज्वरा तदानीं,
बहु विललाप सबाष्पनेत्रपद्मा[३] ।। १४५ ।।

'प्रिय ! मम हृदयं कुतो न भिन्नं,
गतवति जीवनदायिनि त्वयीदम्[४] ।
हतविधिरहमस्मि निश्चितं यद्,
विहगवरोऽपि विहाय मां गतोऽभूत् ।। १४६ ।।

क्व मम निरुपमं सुखं क्व राज्यं ?,
क्व च नु मम प्रियकस्य कुक्कुटत्वम् ? ।
क्व च पुनरपि तद्वियोगदुःखं ?,
सममिति प्राक्तनकर्मणः फलं मे ।। १४७ ।।

---

१. 'अचरदसौ' इति पाठा० ।। २. 'प्राग्वदद्य नूनम् ।।' इति पाठा० ।।
३. 'अवसरमधिगम्य साऽपि दुःखाद्, बहु रुदती समुवाच हा तथैव । इति सचिववरं निगद्य देवी, बहु विललाप वियोगपीडिता सा ।।' इति पाठा० ।।
४. 'अयि मम हृदयं प्रियेऽस्थिरं हि, कथमथ जीवनमद्य धारितं स्यात् ?।' इति पाठा० ।।

मम दयितवरः परेऽपि देशे,
कुशलमुपैतु निजेष्टदेवतुष्टेः[१]' ।
इति बहुविधशोकपीडिता सा,
हृदि विदधौ निजभर्तुरेव चिन्ताम् ।। १४८ ।।

अनिशमियमथो चचार धर्मं,
सुखपरिणामसमागमाय देवी ।
विपुलबलमितो दिदेश राज्ञा,
सह गमनाय तदङ्गरक्षणे द्राक्[२] ।। १४९ ।।

बलमथ समुपेत्य तन्निदेशं,
द्रुततरमैत्य जगौ खगं महीपम्[३] ।
'नृपवर ! तव सन्निधौ सदैवा-
ऽहमपि वसामि सुखेन विद्धि सत्यम्[४]' ।। १५० ।।

इति बलवचनं निशम्य राजा,
किमपि जगाद विहङ्गजातियोग्यम् ।
अनुमतिमिव संप्रलभ्य सैन्यं[५],
तमनुससार मुदा नटेन सार्धम्[६] ।। १५१ ।।

प्रतिदिनमुपलभ्य चाऽन्यतस्तद्[७],
धनमखिलं नृपतेः पुरो डुढौके ।

---

१. 'मम पतिरपरेऽपि देशमध्ये, हिमशिखरीव चिरं च जीवताद्धि ।' इति पाठा० ।। २. 'सकलबलमथाह्वयय्य सख्या, सह गमनं समुपादिदेश ('तमुपादिदेश' इति पाठा०) तर्हि (चेत्थम्-पाठा०)' इति पाठा० ।। ३. 'सकलमथ निशम्य तद्वचो हि, द्रुततरमाव्रजदस्य सन्निधिं च ।' इति पाठा० ।। ४. 'तेंऽह्रिमूले ।।' इति पाठा० ।। ५. 'तेऽपि' इति पाठा० ।। ६. 'शरणमगान्नृपतेर्नटेन सार्धम् ।।' इति पाठा० ।१। ७. '-भ्यतेऽन्यभूपाद्' इति पाठा० ।।

अनवरतमनन्यचित्ततोऽमुं,
परिचरति स्म च सन्नटेशपुत्री[1] ।। १५२ ।।

नरपतिरपि चन्द्रराजवृत्तं,
सकलविदेशभवो[2] निशम्य शीघ्रम् ।
बहुविधमुपहारमस्य चाऽग्रे,
प्रणतिपुरस्सरमादधात् सुभक्त्या ।। १५३ ।।

शिवकुमरनटोऽथ सिंहलस्य,
धरणिपतेः समितिं प्रसन्नचित्तः ।
कतिपयदिवसैः समेत्य नृत्यं,
बहुविधमाचरति स्म जीविकायै ।। १५४ ।।

शिवकुमरनटस्य कुक्कुटं तं,
समधिविलोक्य नृपं जगाद देवी ।
'बहुविधधनमादरेण दत्त्वा,
नृवर ! गृहाण खगं सकाशतोऽस्य ।। १५५ ।।

भवति जलमृते यथैव मीनो,
मम हृदयं च तथैव तं विना यत्[3] ।
क्षणमपि लभते सुखं न तावत्,
प्रतिलभतां कृकवाकुमेतमस्मात्' ।। १५६ ।।

इति वचनमसौ निशम्य तस्या,
नृपतिरुवाच निजां प्रियां सतोषम् ।
'अयि कथमयमर्पयेद् विहङ्गं,
किमु च खगे तव सौहृदं कृशाङ्गि ! ।। १५७ ।।

---

१. 'नट्यधिराजपुत्री' इति पाठा० ।। २. '-भवं' इति पाठा० ।। ३. 'हि' इति पाठा० ।।

भवति च सुभगे ! नटस्य वृत्ति-
रिह विहगे, स कथं प्रदास्यतीत्थम्[१] ।
नहि तव पुरतो मदीययाच्ञा,
सफला कस्यचिदेव वा न युक्ता[२]' ।। १५८ ।।

इति बहुविधबोधिताऽपि राज्ञी,
नहि बुबुधे कृकवाकुलुब्धचित्ता ।
सचिवमथ मुमोच तन्निमित्तं[३],
स नटवरं समुपेत्य संययाचे ।। १५९ ।।

'अयि ! मम कृकवाकुरेष वृत्ते-
रसदृशहेतुरलौकिकप्रभावः ।
अपि मम तनया स्वजीवतोऽपि
प्रियतरमेनमवैति मन्त्रिवर्य[४] ! ।। १६० ।।

यदि नृपतिरिदं ददीत राज्यं,
तदपि न कुक्कुटमाप्नुयात् कदापि ।
व्रज वद भुवनाधिपाय सर्वं,
मृगयतु कञ्चिदसौ परं यदिष्टम्[५]' ।। १६१ ।।

इति वचनमसौ निशम्य राज्ञे-
ऽकथयत सर्वमुदन्तमेत्य मन्त्री ।
तदनु नरपतेः समं प्रकोपैः,
सकलबलं समुपाजगाम शीघ्रम् ।। १६२ ।।

---

१. '-तीति' इति पाठा० ।। २. 'सुफलवती प्रभवेद्धि कस्यचिद्धि ? ।।' इति पाठा० ।। ३. 'तत्प्रलब्ध्यै' इति पाठा० ।। ४. 'अयि मम कृकवाकुरेष जीवः, कथमथ जीवनमर्पयामि राज्ञे । हृदयदयितिका यथैव पत्नी, भवति तथैव ममाऽपि कुक्कुटोऽयम् ।।' इति पाठा० ।। ५. 'न खलु कथञ्चिदहं खगं प्रदास्ये' इति पाठा० ।।

अवददथ रणस्य वाद्यमुग्रं,
गजतुरगादि बलं दधाव[1] योद्धुम् ।
शिवकुमरनटोऽपि सैन्ययुक्तः,
परबलमाप रणाय सज्जशस्त्रः ।। १६३ ।।

उभयबलमयुध्यत प्रकामं,
प्रबलभयङ्करमत्र दीप्रशस्त्रम् ।
क्षयमुपगतमेक्ष्य नैजसैन्यं[2],
रणशिरसः प्रणनाश सिंहलेशः ।। १६४ ।।

विजयमधिनिशम्य चन्द्रभूपः,
स्वचरणमूर्ध्वमथो विधाय सैन्यम् ।
निजनिरुपमसौहृदं प्रदर्श्य,
प्रबलतरं परितश्चुकूज रम्यम् ।। १६५ ।।

शिवकुमरनटस्ततश्चचाल,
प्रतिदिनमस्य खगस्य तोषकारी ।
कतिपयदिवसैरनेकसम्प-
ज्जुषमगमत् किल पोतनं पुरं सः ।। १६६ ।।

प्रबलरिपुवने दवाग्निकल्पः,
प्रतिवसति स्म नृपः प्रतापभानुः ।
अपर इव महेन्द्र एष राज्य-
मवति नृपो जयसिंह इत्यभिख्यः ।। १६७ ।।

मतिगुणपरिशोभितो नृपस्य,
सचिवसुबुद्धिरभूच्च मञ्जुला( षा ? )ख्या ।

---

१. 'ननर्त' इति पाठा० ।। २. 'क्षयमगमदथो बलं नृपस्य' इति पाठा० ।।

प्रबलगुणा समभूत् प्रिया च लीलो-
पपदवतीत्यभिधा च तत्तनूजा[१] ।। १६८ ।।

निरुपममवलोक्य यस्य रूपं,
नयनयुगं व्यदधान्निमेषशून्यम् ।
अमरनगरयोषिदालिरद्धा,
समधिकभेदकधर्मकामनातः[२] ।। १६९ ।।

अभवदिह पुरे प्रधानसम्पद्,
धनद इति प्रथितो वणिग् वरेण्यः ।
सकलगुणवरोऽस्य नाम लीला-
धर इति संप्रथितस्तनूज आसीत् ।। १७० ।।

अकृत परिणयं स मन्त्रिपुत्र्या,
विविधसुखं बुभुजे तया समं च[३] ।
विषयजनितमात्तसौहृदोऽसा-
वमरपुरे सुरराजवद्विलासी[४] ।। १७१ ।।

अगमदथ कदाचिदस्य गेह[५]-
मकृतपुराशुभकर्मदीनभिक्षुः ।
तमुपगतमवेक्ष्य सोपहासं[६],
निजभवनात् त्वरितं बहिश्चकार ।। १७२ ।।

[७]धनदसुततिरस्कृतिं प्रलभ्या-
ऽसहन इव प्रजगाद तं स भिक्षुः ।

---

१. 'प्रबलगुणा समभूत् प्रियाऽस्य लीला-वति इति वास्तविकाभिधा तनूजा ।।' इति पाठा० ।।, 'वास्तविकाभिधा' इत्यत्र 'सदर्थिका' इति टि० ।। २. 'अमरनगरयोषिता शशाङ्क-प्रतिममुखी गजकुम्भसुस्त-नाङ्गी ।।' इति पाठा० ।। ३. 'हि' इति पाठा० ।। ४. 'सुरराजकल्प एषः' इति पाठा० ।। ५. 'धिष्ण्य-' इति पाठा० ।। ६. 'चोपहास्य' इति पाठा० ।। ७. 'कुमरकृत-' इति पाठा० ।।

'कुमर ! कुरु तथा यथा न शीघ्रं,
क्षयमुपयाति युवत्वमिद्धसम्पत् ।। १७३ ।।

भवति विनयिनः स्थिरा समृद्धि-
र्वपुरपि भोग्यसहं चिराय चारु ।
अहमथ यदि भिक्षुकोऽपि नूनं,
नृप इव विज्ञ ! सुखी सदैव वर्ते ।। १७४ ।।

निजभुजबलतो विधाय भिक्षां,
निजवपुषः परिपोषणं करोमि ।
तव तु जनकभाग्यलब्धसम्प-
न्न खलु विभाति महामदं जहीहि[1]'।। १७५ ।।

इति वचनमसौ निशम्य तस्य,
द्रुतमधिगम्य पपात पादमूले ।
'अयि परिषहतामनादरं मे,
भवति भवान् गुरुरेव साम्प्रतं मे' ।। १७६ ।।

इति बहुविधमस्य संप्रसाद-
मकृत शुभोदयतः प्रलब्धबोधः[2] ।
गतवति सुगुरौ विदेशमेतुं,
सपदि हृदि प्रविचारयाञ्चकार ।। १७७ ।।

अतिशयमभवद् हृदि व्यथाऽस्य,
प्रबलमतिर्धरिणीतलेऽस्वपत् सः ।
तदनु जनक एत्य संजगादा-
'ऽऽत्मज ! कथमत्र महीतले नु शेषे ? ।। १७८ ।।

---

१. '-न्नहि खलु भाति, महामदाय चाऽद्य ।।' इति पाठा०।। २. '-कुरुत प्रार्थनया प्रलब्धबोधः ।' इति पाठा० ।।

भवति क इह मन्युहेतुरास्ते,
तव हृदि किं खलु कष्टमालपेति ।
अपि मम पुरतः, क्षणेन तस्य,
प्रतिविदधामि सुपुत्र ! तन्निशम्य[१]' ।। १७९ ।।

इति जनककवचो निशम्य चाऽऽख्यद्,
'वितर निदेशमहो विदेशमेतुम् ।
मम पितरि'ति वाचमानिशम्य,
प्रतिवचनं कथयाञ्चकार तस्मै ।। १८० ।।

'तव युवतिरियं वधूः प्रकामं,
धननिचयं शिशुरेव ते वयश्च ।
बहुविपदां पदमस्ति च प्रदेशः[२],
कथमिह गन्तुमहो प्रवर्तसे त्वम् ?[३]' ।। १८१ ।।

अवददथ स भिक्षुकस्य वाक्यं,
जनकपुरः, प्रणिशम्य सोऽप्युवाच ।
'अपि कुरु नहि साहसं च भिक्षो-
र्वचनत एव विनाऽपि कारणं त्वम्[४]' ।। १८२ ।।

इति बहुविधमस्य सर्वलोको-
ऽकृत परिबोधमसौ परं न मेने ।
अभवदथ निशा सदुःखचित्तो-
ऽधिशयनमाप सुषुप्सुराशु विज्ञः ।। १८३ ।।

---

१. 'प्रतिविदधामि विनिर्णयं निशम्य ।।' इति पाठा० ।। २. 'बहुविपदां पदं [गृहं] विदेशं' इति पाठा० ।। ३. '-महो करोषि चेतः ? ।।' इति पाठा० ।। ४. 'हि ।।' इति पाठा० ।।

तदनु मृदुवचोभिरेतमूचे,
सचिवसुता दयितं निजं च[१] लीला ।
प्रतिवचनं मये ! ददस्व नाथ !,
क्षणमपि सम्मुखदर्शनं प्रदेहि ।। १८४ ।।

भवति यदुपरि प्रभोः कृपादृङ्,
निजभवने स सदैव लालसीति ।
कथमिह[२] सकलं जनं विहाय,
दयित ! गमिष्यसि दूरदेशमाशु ?' ।। १८५ ।।

इति न च वचनं स मन्यते स्म,
प्रबलमपि प्रसभं ह्यमात्यपुत्र्याः ।
उषसि सचिव एत्य दैवविज्ञं,
सपदि समानयदस्य सन्निधौ तत्[३] ।। १८६ ।।

'वद गणक ! कदाऽस्य साधु गन्तुं,
भवति विदेशमहो मुहूर्तमाशु ?' ।
इति सचिववचो निशम्य चक्रं,
प्रणिगदति स्म स दैवविद् विचार्य ।। १८७ ।।

'चरमनिशि[४] यदाऽत्र ताम्रशीर्षो,
वदति[५] तदा सुमुहूर्तमस्य गन्तुम् ।
भवति नहि मुहूर्तमीदृगन्यत्,
पुनरपि धीसख ! वर्तमानवर्षे' ।। १८८ ।।

इति गणकवचो निशम्य हर्षात्,
सचिववरो गणकाय वस्वयच्छत् ।

---

१. 'हि' इति पाठा० ।। २. 'कथमपि' इति पाठा० ।। ३. 'मन्दिरे हि ।।' इति पाठा० ।। ४. 'प्रणिनदति' इति पाठा० ।। ५. 'भवति' इति पाठा० ।।

निखिलमपि बहिश्चकार विज्ञो[१],
नगरत एष च कुक्कुटं तदानीम्[२] ।। १८९ ।।

[३]प्रतिदिवसमसौ ददाति कर्णं,
चरणहतेर्न रुतं शृणोति जातु[४] ।
अनवरतमियं जहौ न धीरा,
क्वचिदपि नैजपतिं च साऽपि लीला ।। १९० ।।

रसपरिमितमासयापनायां,
नटवृषभो नृपसन्निधिं प्रपेदे ।
अधिसभमवनीपतिं स्वनाट्यै-
र्झटिति मुदाञ्चितमाचकार[५] विज्ञः ।। १९१ ।।

अवददथ नृपो 'व्रजाऽधुना त्व-
मुषसि नटाधिप ! दर्शय स्वनाट्यम्' ।
शिवकुमरनटो जगाम वासं,
सचिवजनः समुपेत्य तं जगाद ।। १९२ ।।

'अयि तव कृकवाकुरत्र वाचं,
वदति यथा न, तथा विधत्स्व विज्ञ !' ।
अकथयदखिलं च वृत्तमस्मै,
भवति च दोष इतस्त्वदीयमूर्ध्नि ।। १९३ ।।

उषसि मधुरमाचुकूज पक्षी,
तदनु निशम्य वचस्तदीयमाशु ।

---

१. 'लोकं' इति, 'सोऽथ' इति च इति पाठा० ।। २. 'विशेषात्' इति पाठा० ।। ३. 'प्रतिदिन-' इति पाठा० ।। ४. 'न हि च शृणोति रुतं हि कुक्कुटस्य ।' इति पाठा० ।। ५. 'मुदा हितमाचकार' इति पाठा० ।।

तुरगवरमथाधिरुह्य सद्यो,
जिगमिषुरेष चचाल देशमिष्टम् ।। १९४ ।।

बहु गमननिरोधमाततान,
निजदयितस्य तदा च मन्त्रिपुत्री ।
कथमपि न स तद्वचांसि मेने,
ज्वलिततनौ हि सुखासिका न भाति ।। १९५ ।।

सचिववरसुता वियोगवह्नि-
प्रबलशिखाकलिता जगाद दुःखात् ।
'जनक ! मम वियोगकारकं तं,
वितर दयां प्रविधाय कुक्कुटं त्वम्[१]' ।। १९६ ।।

अयि नटसविधेऽस्ति कुक्कुटोऽसौ,
स च न हि दास्यति याचितोऽपि पुत्रि ! ।
अतिथिरिव स मान्य इत्यतो मे,
प्रसरति तत्र बलं न जातु मुग्धे ! ।। १९७ ।।

यदि न हि कृकवाकुमानयेथाः,
सपदि, तदा निजजीवितं विजह्याम्' ।
हठत इति निशम्य तत्प्रतिज्ञां,
नटवरमाह्वयति स्म स प्रधानः ।। १९८ ।।

चटुपटुवचनैः प्रसाद्य दक्षः,
सचिववरोऽर्थयते स्म ताम्रचूडम् ।
अनभिमतवचो[२] निधाय कर्णे,
नटवृषभोऽपि जगाद सान्त्वनायुक् ।। १९९ ।।

---

१. 'हि' इति पाठा० ।। २. 'सचिवगिरमिमां' इति पाठा० ।।

'अपि मम सकलस्य जीविकाऽतः,
प्रचलति, ते दुहितुर्वृथाऽत्र रागः ।
शरशतमितनर्तको मदीयः,
प्रभवति सप्तसहस्त्रमस्य सैन्यम् ।। २०० ।।

यदवधि मम जीवनं, न तावत्,
कुटिलयितुं प्रभवेन्न कोऽपि लोम ।'
इति वचनमसौ निशम्य तस्मा-
अगददमुं 'तनया न मे विहन्यात्[१] ।। २०१ ।।

नटवर ! यदि ते न प्रत्ययः स्यात्,
तनयममुं प्रगृहाण तर्हि मेऽत्र[२]'।
इति सचिवगिरा नटेन दत्तं,
खगमवलोक्य मुदं बभार बाला ।। २०२ ।।

'अयि खगवर ! दोषमन्तरेण,
कथमसि मे प्रबलोऽहितस्त्वमद्य ।
बहिरसि ननु भव्यरूप एवं
भवति, कथं[३] वचनं च कालकूटम् ।। २०३ ।।

निवससि खग ! हैमपञ्जरे त्वं,
कलयसि सौख्यमनेकधाऽत एव ।
पतिविरहजवेदनां न जानन्[४],
प्रहरसि मां च[५] कठोरवाक्कुठारैः' ।। २०४ ।।

इति सचिवसुतावचो निशम्य,
स्मृतनिजदुःस्थिकः स कुक्कुटोऽपि[६] ।

---

१. '-दमुं न हनिष्यति प्रमादात् ।।' इति पाठा० ।। २. 'विज्ञ !' इति पाठा० ।।
३. 'हि ते' इति पाठा० ।। ४. 'वेत्सि' इति पाठा० ।। ५. 'तेन' इति पाठा० ।।
६. 'विरहजदुःखमवाप्य कुक्कुटोऽपि ।' इति पाठा० ।।

घनसमय इवाऽम्बु वारिदोऽश्रु,
नयनत उद्गमयाञ्चकार सद्यः ।। २०५ ।।

अथ खगवरमाशु हस्तपद्मे,
सचिवसुता विनिधाय शान्तिमस्य[१] ।
अनयत हृदि पङ्कजे निधाय,
मृदुवचनैरवदत् 'कथं त्वमीदृक् ?' ।। २०६ ।।

अवददथ 'खगोऽस्मि चन्द्रभूपो,
मम जननी कृकवाकुमादधान्माम् ।
अतिविमलगुणा गुणावली मे,
दयिततमाऽस्ति यतो वियोग एवम् ।। २०७ ।।

तव पतिरचिराद् धनं प्रलभ्य,
प्रबलगुणे ! समुपागमिष्यति त्वाम् ।
मम तु निरवधिः प्ररूढवेगः,
प्रहरति हाऽत्र गुणावलीवियोगः' ।। २०८ ।।

खगवचनमसौ निशम्य बाला,
'प्रभवसि मे समदुःखतो हि बन्धुः ।
कुरु न हि हृदये शुचं, तवाऽपि,
झटिति मिलिष्यति सर्वमेव बन्धो ! ।। २०९ ।।

अयि यदि तव मानुषं शरीरं,
सुभग ! भवेन्मम सन्निधाववश्यम् ।
निजनिरुपमदर्शनं प्रदद्या',
इति विनयात् तमुवाच मन्त्रिपुत्री ।। २१० ।।

---

१. 'चेतनां हि' इति पाठा० ।।

'असकृदि'ति खगं प्ररुध्य तस्मा,
अददत नर्तकपुङ्गवाय बाला ।
झटिति तमधिगम्य[१] संचचाल,
प्रमुदितहृत सबलः पुराच्च तस्मात्[२] ।। २११ ।।

पथि कतिपयभूपतिं विजित्यो-
पहृतिमवाप्य नृपादनेकशः सः ।
कतिपयदिवसैर्नटाधिराजो,
विमलतरां विमलापुरीं जगाम ।। २१२ ।।

पुरमथ विमलां समेत्य चूत-
द्रुममदधाज्जननी नृपस्य यत्र ।
अवसदथ विलोक्य लक्ष्म राजा,
स्मृतिमनयत् स[३] निजां च तत्र कान्ताम् ।। २१३ ।।

'इह किल निभृतं विवाह्य बाला-
महमगमं नृपतेर्हि प्रेमलाख्याम् ।
अभवमथ विहङ्गमोऽहमस्मात्,
पुनरपि तन्नगरं समागतोऽस्मि ।। २१४ ।।

भवति पुनरपीह मानवत्वं[४],
प्रियदयिता यदि[५] संमिलेत् ततो मे ।
नटवरसहवास एव हेतु[६]-
र्ननु भविताऽत्र[७]' विचारयाञ्चकार ।। २१५ ।।

---

१. 'खगवरमधिगम्य' इति पाठा० ।। २. '-सबलो नटाधिराजः ।।' इति पाठा०।। ३. 'स परिचिकाय' इति पाठा० ।। ४. 'यदि पुनरपि मेऽत्र मानवत्वं' इति पाठा० ।। ५. 'किल' इति पाठा० ।। ६. 'इह नटवरसङ्गमः फलाय' इति पाठा० ।। ७. 'भवितेति' इति पाठा० ।।

अथ नृपतनया सखीसमेता,
स्फुरणमवाप च वामलोचनस्य ।
अगद'दहो ! सखि ! वामचक्षुरद्य[1],
स्फुरति, भवेत् किमु[2] सङ्गमः प्रियस्य ? ।। २१६ ।।

अवसरति[3] स काल एत्य या मे,
कथितवती ननु देवतावधेः प्राक्[4] ।
अयि सखि ! न हि मेऽधुनाऽपि कान्तः,
स्मरति विदेशगतः कुतो न जातु[5] ।। २१७ ।।

भवति मयि वचोऽपि देवतायाः,
किमु विफलं मम भाग्यदोषतो हा[6] ! ।
अतिदुरितमहं पुरा चरामि,
यदनुभवामि वियोगदुःखमेवम्' ।। २१८ ।।

इति [7]नृपतिसुतावचो निशम्य,
प्रथमसखी निजगाद सामपूर्वम् ।
'अचिरसमयतः प्रियेण सत्यं[8],
प्रबलगुणे ! भविताऽस्ति सङ्गमस्ते[9] ।। २१९ ।।

यदपि जनकवेश्म भोगपूर्णं,
तव सुभगे ! ऽस्ति तथाऽपि भर्तृगेहम्[10] ।
भवति बहुमतं वधूजनस्य,
विधिवशतस्तदवश्यमाप्स्यसि त्वम्' ।। २२० ।।

---

१. 'अयि मम नयनं प्रियालि ! वामं' इति पाठा० ।। २. 'यदि' इति पाठा० ।। ३. 'अगमदपि' इति पाठा० ।। ४. 'हि' इति पाठा० ।। ५. 'कदाऽपि चित्ते ।।' इति पाठा० ।। ६. 'हि ।' इति पाठा० ।। ७. 'सचिव-' इति पाठा० ।। ८. 'अचिरत एव ते प्रियस्य' इति पाठा० ।। ९. '-मो हि ।।' इति पाठा० ।। १०. '-वेश्म' इति पाठा०

शिवकुमरनटोऽथ राजसंस-
द्यगमदवाप्य नृपं जगौ च नत्वा[१] ।
'अपि जगति यशस्त्वदीयमुग्रं,
प्रसरति चन्द्रनिभं नृपाल ! विष्वक् ।। २२१ ।।
तव नगर विलोकनाय राज-
न्नहमगमं किल चन्द्रराजपुर्याः' ।
इति वचनमसौ निगद्य नाट्यं,
रचयितुमारभत प्रभोर्निदेशात् ।। २२२ ।।
कुसुमनिचयमानिधाय तत्र,
प्रबलगुणं विनिवेश्य ताम्रचूडम् ।
अधिसभमवरोप्य वेणुदण्डं,
व्यतनुत भूरि नटः स्ववाद्यघोषम् ।। २२३ ।।
शिवकुमरनटस्य पुत्रिका च[२],
तदुपरि सा शिवमालिकाऽऽरुरोह ।
बहुविधमकरोत् सुनर्तनं द्राक्[३],
विमलकला कुशला नृपादितुष्ट्यै ।। २२४ ।।
नृपतिरपि सुतामथाऽऽह्वयच्चा-
वददिति 'चन्द्रनृपस्य राजधान्याः ।
अतिशयकुशलो नटः समागात्,
नटति तथाऽस्य[४] सुताऽत्र वेणुसंस्था ।। २२५ ।।
क्षणमुपरितने क्षणं च तिर्यक्,
क्षणमथ कुक्कुटसन्निधौ क्षणं च ।
अतिमृदुलवचोभिरस्य कीर्तिं,
नटतनया प्रजगौ विशिष्टरूपा' ।। २२६ ।।

---

१. 'ननाम हर्षात्' इति पाठा० ।। २. 'हि' इति पाठा० ।। ३. '-करोच्च नर्तनं सा' इति पाठा० ।। ४. 'स्म नटति चाऽस्य' इति पाठा० ।।

(वसन्ततिलकावृत्तम्)

आलोक्य चन्द्रनृपतिः कृकवाकुरूपः,
स्वीयां प्रियां सदसि राजसमीपसंस्थाम् ।
सोऽप्यानन‍र्त नटवत् किल पञ्जरस्थः,
प्राप्तिः प्रियस्य विदधाति रसातिरेकम्[1] ।। २२७ ।।

दध्यौ च चेतसि वरं 'मम सा विमाता[2],
या मां व्यधात् खगमहं पुनरत्र चाऽऽगाम् ।
श्रीप्रेमलां निजवधूमवलोकयामि,
नो चेत् समागममहं कथमाप्स्यमस्याः ।। २२८ ।।

कल्याणमस्तु नटराजवराय यो मा-
मत्राऽऽनयत् सुयश एव सदा प्रगायन् ।
सुप्रातरद्य मम येन हि षोडशाब्दी-
क्रान्तौ[3] वधूं विमलकान्तिमिमां विलोके ।। २२९ ।।

मां प्रेमला यदि नटात् परिलभ्य पार्श्वे,
स्वे स्थापयेन्मम मनोरथ एव सिध्येत् ।
ऋज्वी च तस्य[4] तनया वितरेत् सुखेना-
ऽऽवश्यं स्वरूपमहमद्य नरस्य लप्स्ये' ।। २३० ।।

श्रीप्रेमलाऽपि कृकवाकुतनुं पतिं स्वं,
दृष्ट्वैव तद्वशमगान्न परं स्मरन्ती ।
तौ दम्पती च्युतनिमेषदृशेक्षमाणा-
वन्योऽन्यमापतुरनन्यसमं प्रमोदम् ।। २३१ ।।

इति श्रीकस्तूरसूरिविरचिते श्रीचन्द्रचरित्रे
पञ्चम सर्गः
समाप्तः

---

१. 'श्रीप्रेमलां नववधूमधिगम्य हर्षात् ।।' इति पाठा० ।। २. 'जीयान्ममापि खलु वीरमती विमाता' इति पाठा० ।। ३. 'वीतौ' इति पाठा० ।। ४. 'मां चेन्नटस्य' इति पाठा० ।।

शासनसम्राट्पूज्याचार्यश्रीविजयनेमिसूरीश्वरपट्टधर
पूज्याचार्यश्रीविजयविज्ञानसूरीश्वरपट्टधरप्राकृतविशारद
पूज्याचार्यश्रीविजयश्रीकस्तूरसूरिप्रणीतं

# चन्द्रचरित्रे षष्ठः सर्गः

(उपजातिवृत्तम्)

प्रलभ्य दानं क्षितिनायकात् स,
नटेश्वरोऽतुल्य[1]मवाप हर्षम् ।
खगोऽपि सन्दर्शनमाप्य वध्वाः,
स्वस्वेष्टलाभोऽस्ति मुदे न कस्य[2] ? ।। १ ।।

राज्ञो[3] नटात्तं कृकवाकुमग्रे,
सपञ्जरं सन्निधिमानिनाय ।
श्रीप्रेमलाऽथो[4] प्रसमीक्ष्य तस्मिन्,
बबन्ध रागं कमपि प्रगाढम् ।। २ ।।

प्रेम्णा परित्यज्य च पञ्जरं तद्[5],
हिरण्मयं तं हृदये बभार[6] ।
पुनः पुनः सम्मुखमेतदीयं,
खगोऽप्यपश्यत् सहवासमिच्छुः[7] ।। ३ ।।

---

१. '-मूल्य-' इति पाठा० ।। २. 'खगोऽपि स प्राप्य वधूसमक्षं, जहर्ष भिक्षुर्धनलाभतश्च (जहर्ष लब्ध्वैव धनानि भिक्षुः-पाठा०) ।।' इति पाठा० ।। ३. 'राजा' इति पाठा० ।। ४. 'तं' इति पाठा० ।। ५. 'हि' इति पाठा० ।। ६. 'हिरण्मयं तद्धृदये ममज्ज' इति पाठा० ।। ७. 'तत्सङ्गमायेव ददर्श (बभूव-पाठा०) पक्षी' इति पाठा० ।।

पप्रच्छ राजा नटराजमस्य,
पतत्त्रिणो वृत्तमुवाच सोऽपि ।
"आभेति नाम्ना नगरी प्रसिद्धा-
ऽमरावतीवाऽस्ति नृपाल ! पूर्वे[१] ॥ ४ ॥
चन्द्राभिधस्तत्र महीश्वरोऽस्ति,
द्वितीयचन्द्रप्रतिमः कलाभिः ।
तं गुप्तभावेन सदा विमाता,
संस्थापत्याहितमन्युवेगा ॥ ५ ॥
गत्वा स्वनाट्यं व्यदधां च[२] तत्र,
श्रीवीरमत्याः पुरतो महीप ! ।
गुणावली पुत्रवधूश्च तस्या,
अयं प्रियः ताम्रशिखोऽस्त्यमुष्याः[३] ॥ ६ ॥
प्राङ् मे[४] ददौ दानमयं[५] सुतुष्टो[६],
जिघांसुरेनं [७]तदभूद् विमाता ।
[८]सभासदस्तामनुनीय कष्टात्[९],
विमोचयामास खगं गुणाढ्यम्[१०] ॥ ७ ॥
पश्चात् खगोऽयं शिवमालिकां मे,
वृत्तं सुपुत्रीं निजगाद सर्वम्[११] ।
दाने ततोऽहं ननु वीरमत्या,
प्राप्तो विधायाऽऽग्रहमेनमाशु[१२] ॥ ८ ॥

---

१. '-हि पूर्वदेशे' इति पाठा० ॥ २. 'हि' इति पाठा० ॥ ३. 'वध्वा अयं ताम्रशिखोऽस्ति राजन् ! ॥' इति पाठा० ॥ ४. 'मह्यं' इति पाठा० ॥ ५. 'पक्षिराजः ॥' इति टि० ॥ ६. 'हि तस्माद्' इति पाठा० ॥ ७. 'सम-' इति पाठा० ॥ ८. 'सभाजन-' इति पाठा० ॥ ९. 'तस्या' इति पाठा० ॥ १०. 'हठेन' इति पाठा० ॥ ११. 'स्नेहेन सर्वं कथयाञ्चकार' इति पाठा० ॥ १२. 'अजिग्रहं कुक्कुटमेनमाशु ॥' इति पाठा० ॥

सर्वं बलं तस्य विराजतेऽदः,
प्रभुर्मदीयोऽयमिति प्रतीहि[1]'' ।
एवं निशम्याऽस्य चरित्रमुग्रं,
नितान्तहर्षं समवाप राजा ।। ९ ।।
'आज्ञा त्वदीया यदि भूमिनाथ !',
नटो जगौ 'प्रावृषमत्र सर्वे[2] ।
संयापयिष्याम' इदं निशम्य,
तथाऽनुमेने मकरध्वजोऽपि ।। १० ।।
आज्ञां च[3] लब्ध्वा मकरध्वजस्या-
ऽवात्सीन्मुदा नर्तकशेखरः सः ।
अथैकदा भूमिपतिः स्वपुत्री-
माहूय तां सान्त्वयितुं जगाद[4] ।। ११ ।।
'सत्यं तवोक्तं सकलं, परन्तु
दूरे वरीवर्ति स चन्द्रभूपः ।
दैवानुकूल्येन च[5] बोभवेत् ते[6],
तेनाऽत्र[7] सङ्गः कुरु पुत्रि ! धैर्यम् ।। १२ ।।
श्रद्धा यदि स्यात् तव पुत्रि ! तस्मा-
न्नटाधिराजात् कृकवाकुमाशु ।
आनाय्य तुभ्यं प्रददामि, तेन
क्रीडिष्यसि त्वं निरवद्यरूपे !' ।। १३ ।।
पितुर्वचः सा प्रणिशम्य शीघ्रं,
महाग्रहात् स्वं पितरं जगाद ।

१. 'प्रमन्ये ।' इति पाठा० ।। २. 'स्यात् तर्हि वर्षर्तुमिहैव सर्वे ।' इति पाठा० ।। ३. 'स' इति पाठा० ।। ४. '-मानाय्य तस्या निजगाद हर्षात् (साम्ना-पाठा०) ।।' इति पाठा० ।। ५. 'हि' इति पाठा० ।। ६. 'बोभवीति' इति पाठा० ।। ७. 'चन्द्रस्य' इति पाठा० ।।

'अयं मिलेच्चेन्मम ताम्रचूड-
स्तदा मदीया सफला जनिः स्यात् ।। १४ ।।
भर्तुर्ममाऽयं खग इत्यतोऽमुं[१],
प्राणादपि प्रेष्ठमहं[२] प्रमन्ये।
अतः पितस्तं[३] परिदापय त्वं,
द्रुतं मनोमोदकरं नटेशात्[४]' ।। १५ ।।
आनाय्य राजा नटराजमूचे,
'यः कुक्कुटस्ते सविधेऽस्ति सोऽस्याः ।
भर्तुर्गृहस्येति विशेषतो हि,
प्रेमाऽस्ति तस्योपरि नर्तकेश ! ।। १६ ।।
दद्या इमं चेत् कृपया तदाऽसा-
वतीव हृष्टा प्रभवेत् सुता मे ।
बलान्न याचे, तव चेन्मतिः[५] स्याद्,
ददस्व नो चेद् वद सत्यवाक्यम्' ।। १७ ।।
नटोप्युवाचा'ऽवनिपालकं तं[६],
प्रभुर्ममाऽयं कृकवाकुरस्ति ।
आजीविका मे ननु जायतेऽतः,
ततोऽप्ययं दानविधेर्न पात्रम्[७] ।। १८ ।।
तथाऽपि पृच्छामि विहङ्गमं तं,
स चेदिहाऽऽगन्तुमना भवेच्चेत् ।
सुखेन दास्यामि तदाग्रहो मे,
नैवाऽस्ति राजन् ! लवतोऽपि कोऽपि' ।। १९ ।।

---

१. 'मे' इति पाठा० ।। २. 'प्रेष्ठ इति' इति पाठा० ।। ३. 'पितर्मे' इति पाठा० ।। ४. 'खगं मनोहारिवचो नटाद्धि ।।' इति पाठा० ।। ५. 'चेत्कृपा' इति पाठा० ।। ६. 'नटोऽपि राजानमुवाच राजन् !' इति पाठा० ।। ७. 'कथं प्रदास्यामि खगाधिराजम् ।।' इति पाठा० ।।

स कुक्कुटायाऽकथयत् समग्रं,
राजोदितं तत्प्रणिशम्य पक्षी ।
अतीव हर्षं समवाप नेत्रा-
दानन्दबाष्पं प्रमुमोच धीरः ।। २० ।।

'श्रीप्रेमलायै यदि मां प्रदद्यात्,
तदा मदीया विपदन्तमेयात्[१]'।
विचार्य चैवं बहु चोत्सुकोऽसौ,
बभूव तज्ज्ञापयितुं पतत्री ।। २१ ।।

नटात्मजा तं प्रसमीक्ष्य चैवं,
जगाद बाष्पाकुलिताननश्रीः ।
'अये ! मया तेऽपकृतं किमेवं,
यन्मां परित्यक्तुमना असि त्वम् ।। २२ ।।

प्राणाधिकं वेद्मि, न ते कदाऽपि,
सेवाविलम्बं प्रकरोमि नाथ ! ।
सदैव मूर्ध्ना ननु पञ्जरं ते,
वहामि पक्षिन् ! नव वर्षतोऽहम्[२] ।। २३ ।।

आज्ञां त्वदीयामधिगम्य तेऽहं,
मातुः सकाशात् समवाप्नवं त्वाम्[३] ।
एतर्हि कस्मात् स्वत एव मोक्ता[४],
[५]चिरात्कृतं प्रेम महानुभाव[५] !' ।। २४ ।।

---

१. 'तदा मदीया जनिरुत्तमा स्यात् ।' इति पाठा० ।। २. '-तो हि' इति पाठा० ।। ३. 'मातुः सकाशादुपलभ्य राजन् !' इति पाठा० ।। ४. ' एतर्हि कस्मान्मम येन भङ्गं' इति पाठा० ।। ५. 'करोषि हा प्रेम महानुभाव !।।' इति पाठा० ।।

प्रेमाभिरामं वचनं निशम्य,
जगाद तां ताम्रशिखोऽपि रम्यम् ।
''सौजन्यसेवापरतादिमुख्यान्[१]
गुणांस्त्वदीयान् नहि विस्मरामि ।। २५ ।।

तवोपकारस्य मनाक्करां न,
प्रतिक्रियां कर्तुमधीश्वरः स्याम् ।
खगोऽपि तेऽहं परिवेद्मि सर्वं,
स्नेहं नटाधीश्वरराजपुत्रि ! ।। २६ ।।

स्नेहोऽपि कार्यात् परिमुच्यते यत्[२],
दुःखं न चाऽतो हृदये कुरुष्व ।
जानीहि या राजसुताऽस्ति सा मे,
पत्नीति तस्याः पतिरस्मि[३] सुभ्रु ! ।। २७ ।।

वृत्तं तदीयं गदितुं समर्थो-
ऽधुनाऽऽदितोऽहं न भवामि सर्वम् ।
मां कुक्कुटं यद् व्यदधाद् विमाता,
हेतुस्तदीयोऽयमवेहि बाले ! ।। २८ ।।

या त्वं विमातुः पुरतो विमोच्य,
मामत्र चाऽऽनीय नृपाङ्गजायाः ।
सम्मेलनं कारयसीश्वरस्ते,
करोतु कल्याणमहो सदैव ।। २९ ।।

अतोऽत्र वस्तुं नटराजपुत्रि !
मनो मदीयं भवतीति विद्धि ।

---

१. 'सौजन्यगाम्भीर्यसुधीरतादि-' इति पाठा० ।। २. 'हि' इति पाठा० ।। ३. 'पतिरस्ति' इति पाठा० ।।

आज्ञां यदि त्वं वितरेस्तदाऽहं,
स्थास्यामि, नो चेदिह नैव विज्ञे !" ।। ३० ।।

आकर्ण्य वाचं शिवमालिका सा,
खगस्य दुःखाद् भृशमारुरोद ।
बद्धाञ्जलिस्तं प्रजगाद 'राजन् !
तवाऽस्मि [1]वृत्तादतिदुःखिताऽहम् ।। ३१ ।।

कृता यदद्याऽवधि नाथ ! किन्तु[2],
[3]सेवाऽधुना सा सफला बभूव ।
वधूं निजां त्वं परिलभ्य सम्यक्,
संभुङ्क्ष्व सौख्यं नृपते ! चिराय' ।। ३२ ।।

श्रीप्रेमलाया भृशमाग्रहेण,
नटस्य वासं मकरध्वजोऽगात् ।
जिघृक्षुरेनं कृकवाकुमाराद्,
ददर्श तं नर्तकशेखरः सः ।। ३३ ।।

बद्धाञ्जलिः प्रेमपुरस्सरं स,
नृपस्य सत्कारमपारमाधात् ।
राजा स्वपुत्र्या निखिलं च वृत्तं,
नटाधिराजाय जगाद दुःखात् ।। ३४ ।।

'दद्या अमुं चेत् कृकवाकुमद्य,
सञ्जीवनं यच्छसि मे सुतायाः ।
इत्येव मंस्ये न कदापि तेऽहं,
नटोपकारं खलु विस्मरामि' ।। ३५ ।।

---

१. 'वाक्या-' इति पाठा० ।। २. 'सेवा' इति पाठा० ।। ३. 'तवा-' इति पाठा० ।।

राजानमूचेऽथ नटोऽपि गुह्य[१]-
'माभानरेशं कृकवाकुमेतम् ।
जानीहि, नाऽयं विहगोऽस्ति, दातुं
मनोरथो मे न ततोऽस्ति, सत्यम्[२] ।। ३६ ।।

तथाऽपि कल्याणकृतेऽस्य तेऽपि,
महाग्रहेणाऽद्य ददामि राजन्[३] !' ।
अथैनमूचे शिवमालिकाऽपि,
प्रेमाश्रुधारां बहु पातयन्ती ।। ३७ ।।

'अनेकभूपेन समं विरोधो,
जातः कृते मे खलु पक्षिणोऽस्य ।
प्रेम्णा सुतायाः प्रददे तवाऽद्य[४],
सा मे स्वसेव प्रतिभाति बाला ।। ३८ ।।

सुखेन राजन् ! कृकवाकुमेतं,
गृहाण कल्याणपरम्परा स्यात् ।
आभानरेशं परिविद्धि चैतं,
त्वत्पुत्रिकाऽऽशा परिपूरिता स्यात्' ।। ३९ ।।

सपञ्जरं तं परिगृह्य राजा,
श्रीप्रेमलायै प्रददौ स्वहस्तात् ।
साऽपि स्वभर्तारमिवाऽग्रहीत् तं,
हस्ते प्रतिष्ठाप्य जगाद चैवम् ।। ४० ।।

''यस्याऽऽलयात्[५] षोडशवर्षतो मे,
त्वमेव पक्षिन् ! समुपागतोऽसि ।

---

१. 'राजन् ('मर्म'-पाठा०)' इति पाठा० ।। २. 'मनो मदीयं न हि वाञ्छतीह ।।' इति पाठा० ।। ३. 'तेऽहम्' इति पाठा० ।। ४. 'प्रेम्णा सुतायास्तव भूप ! दद्मि' इति पाठा० ।। ५. 'भर्तुर्गृहात्' इति पाठा० ।।

स्मरेत् कथं जातु स माननन्य-
चित्तामपि प्रोषितपुङ्गवो यत्[१] ।। ४१ ।।

छलं विधायाऽथ गतेन भर्त्रा,
नो दीयतेऽद्याऽवधि काऽपि वार्ता ।
किं वाऽपकारो मयका व्यधायि,
क्षान्तं न वा किं, मम कोऽत्र दोषः ? ।। ४२ ।।

विवाह्य मह्यं व्यतरत् स कुष्ठि-
जनं किमेतेन यशो नु लब्धम् ? ।
व्यधात् स मे जन्म निरर्थकं तत्,
क्वाऽऽपेऽमुनेयं परदुःखशिक्षा ।। ४३ ।।

तस्मान्न चाऽन्यो भुवि निर्दयोऽस्ति,
यथा कृतं तेन तथा न [२]कश्चित् ।
कस्याऽपि कुर्यात्, परिणीय जायां,
कोऽन्यो विना तं परिमुञ्चतीह ? ।। ४४ ।।

न कोऽपि तस्याऽस्ति सुहृद्य एतं,
सम्बोध्य सम्प्रेषयतीह विद्वान्[३] ? ।
अस्यैव हेतोर्जनकोऽपि कष्ट-
मत्यन्तमस्मभ्यमदात् तदानीम्[४] ।। ४५ ।।

स्नेहो जगत्यां न च[५] दुर्लभोऽस्ति,
किन्त्वस्य सम्यक् परिपालनं यत्[५] ।

---

१. 'प्राप्याऽपि च (तं-पाठा०) त्वां स्वपतिं (नैजपतिं-पाठा०) सुरत्नं, नाऽपालयं हा (न स्मोपभुञ्जे-पाठा०) खलु भिक्षुकीव ।।' इति पाठा० ।। २. 'कै-' इति पाठा० ।। ३. 'संबोध्य प्रास्थापयताऽत्र विद्वान् ।' इति पाठा० ।। ४. 'तदा हि।।' इति पाठा० ।। ५. 'हि' इति पाठा० ।।

सुदुष्करं, कामधिगम्य चाऽऽशां,
नेष्यामि कालं प्रियताम्रचूड ! ।। ४६ ।।

त्वं तस्य गेहस्य विहङ्गमोऽस्मा-
दुक्तं मया ते पुरतः स्वदुःखम् ।
त्वां वीक्ष्य चाऽऽश्वस्तमना वियोग,
इदं प्रियस्येत्यपि जीवनाय[१]"।। ४७ ।।

इत्थं प्रियाया वचनं निशम्या-
ऽपश्यत् तदीयं मुखमेव पक्षी ।
उवाच किञ्चिन्न हि केवलं स[२],
दुःखं व्यधात् केवलमन्तरन्तः[३] ।। ४८ ।।

इतः समागाच्छिवमालिकाऽपि,
हस्ते निधायाऽथ विहङ्गमं तम् ।
स्नेहेन पस्पर्श तदीयमङ्गं,
नवं नवं पक्वफलं व्यतारीत् ।। ४९ ।।

तस्मै तदीयां विमलां सुकीर्तिं,
संमूर्च्छ्य दक्षाङ्गुलितः स्ववीणाम् ।
श्रीप्रेमलां कुक्कुटरागमुग्धा-
मुवाच सा नर्तकराजपुत्री ।। ५० ।।

'आप्रावृषस्त्वं कृकवाकुमेतं,
संस्थापयस्व स्वपुरोऽतियत्नैः ।
यास्यामि यस्मिन् समये तदाऽह-
मेतं ग्रहीष्यामि सकाशतस्ते' ।। ५१ ।।

---

१. 'त्वां वीक्ष्य दुःखं मम नाशमापत्, पतिं समीक्ष्यैव यथाऽङ्गनायाः ।।' इति पाठा० ।।
२. 'हि' इति पाठा० ।। ३. 'दुःखं विधत्ते बहुलं स्वचित्ते ।।' इति पाठा० ।।

इत्येवमुक्त्वा प्रययौ यदा, सा,
श्रीप्रेमला तं प्रविलोक्य शश्वत् ।
उच्छ्वासमुच्चैः परिगृह्य बाष्पं,
विमुच्य तारं विललाप चाऽऽर्त्ता[१] ।। ५२ ।।

"पते ! कथं मां स्मरसीह न त्वं,
कथं विना त्वां मम जीवनं स्यात् ।
कामस्य बाणानिव वारिधारा,
विमुञ्चति प्राप्तमदोऽम्बुदो यत्[२] ।। ५३ ।।

मेघावलिं श्यामतनुं विलोक्य,
द्विधेव चेतो मम जायते द्राक्[३] ।
विद्युल्लता भीषयतेऽधुना मां,
कामस्य साक्षादसिधेनुकेव ।। ५४ ।।

यथा यथाऽयं जलदः समन्तात्,
प्रगर्जति प्राणभयावहोऽद्य[४] ।
तथा तथा स्वां प्रमदां विमुच्य,
न लज्जते किं मम जीवितेशः ।। ५५ ।।

वषर्तुरेषोऽत्र न रोचते मे,
विना प्रियं, स्याद् यदि सोऽद्य पार्श्वे[५] ।

---

१. 'कादम्बिनीवाऽम्बु मुमोच तर्हि (दीना-पाठा०) ।।' इति पाठा० ।। २. 'विमुञ्चतेऽसौ जलदः समन्तात् ।।' इति पाठा० ।। ३. 'द्विधेव बोभोति मदीयचित्तम् ।' इति पाठा० ।। ४. 'हि ।' इति पाठा० ।। ५. 'वल्लभो मे' इति पाठा० ।।

मां प्रीणयेद् रागरसेन, हाऽहं,
करोमि किं सम्प्रति दैवदग्धा[१]"॥ ५६ ॥

सर्वं प्रियाया वचनं निशम्य,
जगाद किञ्चिन्नहि कुक्कुटोऽसौ ।
स्वकर्मदोषं परिचिन्त्य धैर्य-
मथाऽकरोच्चन्द्रनृपस्तदानीम् ॥ ५७ ॥

अथो नरेन्द्रस्य सुता यियासु-
रभूत् सखीभिर्विमलाचलं सा ।
इतः समागाद् गणकः कुतश्चि-
न्निरीक्ष्य तं सादरमाबभाषे[२] ॥ ५८ ॥

'विवाह्य[३] योऽगान्नृपतिः प्रियः स,
कदा मिलिष्यत्यतिदुर्लभो मे ।
विचार्य सत्यं वद, ते यथेष्टं,
दास्ये धनं दैवविदेऽहमद्य' ॥ ५९ ॥

दैवज्ञवर्यः स जगाद 'चन्द्रो,
नृपोऽद्य किं वाऽपरवासरे वा ।
चेत् सोऽमिलिष्यत् त्वमपि प्रदानं,
तदा ह्यदास्यः, प्रथमं न देवि !' ॥ ६० ॥

दैवज्ञवाक्यैः प्रजहर्ष बाला,
तथा यथा मेघरवैर्मयूरी ।

---

१. 'तं विना हि ॥' इति पाठा० ॥, इतोऽग्रे- 'लज्जां परित्यज्य मया समं त्वं, संक्रीड पक्षिन् ! प्रणताऽस्मि पादे । मामन्यथा पञ्चशरोऽतिधृष्टो, नूनं प्रशोच्यां गमयेद् दशां हि ॥' इति निष्कासितः श्लोको दृश्यते ॥ २. 'राजसुता जगाद॥' इति पाठा० ॥ ३. 'मां व्यूह्य' इति पाठा० ॥

अमूल्यरत्नं प्रददौ च तस्मै,
जगाम पार्श्वं पितुराशु विज्ञा ।। ६१ ।।

पितुर्निदेशं परिलभ्य तीर्थं,
नीत्वा खगं स्तोकसखीसमेता ।
जगाम तं पञ्जरतस्तदा सा,
बहिश्चकाराऽऽशु खगं विधिज्ञा ।। ६२ ।।

हस्ते तमादाय रुरोह शत्रु-
ञ्जयं गिरीशं सहिता सखीभिः ।
तन्मौलिसंस्थं वृषभं जिनेन्द्रं,
तं वन्दते भावनया समेता[1] । ।। ६३ ।।

मुमुक्षु-देवेन्द्र-नराधिपाद्यैः[2],
संसेवितं शान्तिनिदानभूतम्[3] ।
आलोक्य तीर्थं मनसि स्वजन्म,
बहु प्रमेने खलु कुक्कुटोऽसौ ।। ६४ ।।

श्रीप्रेमला सर्वविधानयुक्तां[4],
तीर्थेशपूजां प्रविधाय सम्यक् ।
खगेन सार्द्धं प्रतिमन्दिरं सा,
गत्वा ननाम प्रबलस्वभक्त्या ।। ६५ ।।

पश्चात् प्रियालस्य[5] तले समागात्,
तत्रैव किञ्चित् समयं निनाय ।
आदाय पत्रं कृकवाकुरस्य,
विभूषयामास स्वचञ्चुमत्र ।। ६६ ।।

---

१. 'सुभक्त्या ।।' इति पाठा० ।। २. '-पैश्च' इति पाठा० ।। ३. '-प्रदानकृत् तत् ।।' इति पाठा० ।। ४. '-विधानतो हि' इति पाठा० ।। ५. 'रायणवृक्षस्य' इति टि०' ।।

श्रीसूर्यकुण्डप्रविलोकनाय,
श्रीप्रेमलाऽगाद् विहगेन सार्द्धम् ।
प्रफुल्लपङ्केरुहशोभितान्तः,
सुनिर्मलाद्भिश्च खगं सिषिञ्च[1] ।। ६७ ।।

जलप्रभानिर्मलकान्तिरेष,
स्वर्वाहिनीं वीक्ष्य जहास किं वा ।
तथा विभाति स्म च पद्मषण्डे[2],
हंसादिनीडोद्भवराजितः सः ।। ६८ ।।

तीरे निषण्णा नरराजपुत्री,
विलोकयमास तदीयशोभाम् ।
इतो विचारं कृकवाकुरेष[3]-
श्चकार तां वीक्ष्य विषण्णचेताः[4] ।। ६९ ।।

"नटोऽपि मां भ्रामयति स्म देशं,
देशं तथाऽपि प्रशमं न यातम् ।
कर्माधुना मे कृकवाकुरूप-
स्तिष्ठामि यत् पञ्जरमध्यवर्ती ।। ७० ।।

पुनर्नरत्वं न हि जातु भावि,
प्रियासमीपे मम कुक्कुटस्य ।
रात्रिंदिवं तद्विरहं विलोक्य,
विदीर्यते मे हृदयं स्थितस्य ।। ७१ ।।

व्यत्यैद् युवत्वं मम, कोऽप्युपायो,
नाऽद्याऽपि दृष्टौ नरतोपलब्धेः ।

---

१. 'सुनिर्मलं तं प्रविलोकते स्म ।।' इति पाठा० ।। २. 'स्म बहुप्रकारं' इति पाठा० ।। ३. '-रुच्चै-' इति पाठा० ।। ४. 'हृदि स्वदुःखम् ।।' इति पाठा० ।।

कियत् सहिष्ये ननु दुःखमुग्रं,
न दीर्यते किं शतशो मनो मे[१] ।। ७२ ।।

कस्याऽस्ति पत्नी नगरं च राज्यं,
कस्याऽस्ति योगोऽप्यथवा वियोगः ।
न कोऽपि कस्याऽपि भवेऽत्र नूनं,
सर्वेऽपि पूर्वार्जितकर्मभाजः ।। ७३ ।।

न मेऽधुना कोऽपि हितोऽस्ति लोके,
किं जन्मनाऽनेन ममाऽऽधिदेन ? ।
दुःखात् स्वकं त्रातुमतोऽद्य किं नो,
तीर्थे जहानीह निजं शरीरम्[२] ?' ।। ७४ ।।

एवं विनिश्चित्य पपात कुण्डे,
स कुक्कुटः प्राणविमोचनाय ।
हा हेति सा राजसुता प्रकामं,
रोरुद्यमानाऽऽकुलिता बभूव ।। ७५ ।।

'रे किं त्वयेदं कृतमद्य[३] निन्द्यं,
वक्ष्यामि किं नर्तकराजपुत्र्यै ।
किं वा च तातं स्वसखीजनं वा,
हा हा विधातः करुणा न तेऽस्ति ।। ७६ ।।

खगोऽपि मद्दुःखनिवारकोऽयं,
न सह्यते किं विधिना प्रकामम् ।
कथं मुखं दर्शयिताऽस्मि गत्वा,
खगाधिराजं प्रविनाश्य गेहम् ।। ७७ ।।

---

१. 'विदीर्यते मे शतशोऽन्तरात्मा ।।' इति पाठा० ।। २. 'विरज्य सर्वं परिहृत्य प्राणान्, कथं न मोक्ष्येऽत्र सुपुण्यतीर्थे ।।' इति पाठा० ।। ३. '-मार्य !' इति पाठा० ।।

अतोऽहमस्यैव पथाऽद्य[१] गत्वा,
प्रेम्णः विधास्ये नचिरेण निष्क्रयम्[२]' ।
इति प्रपातो विदधेऽथ कुण्डे,
तयाऽपि तत्प्रेमरसाऽऽप्लुतत्वात्[३] ।। ७८ ।।

जग्राह तं कुक्कुटराजमेषा,
तलंगता कुण्डवरस्य तस्य ।
पद्भ्यां पतत्रद्वितयेन चञ्च्वा,
निघ्नन्तमप्यात्मविमोक्षहेतोः[४] ।। ७९ ।।

तदेतयोः कर्षविकर्षयोर्द्राक्,
खगत्वदानेऽधिकृतं सुसूक्ष्मम् ।
अलक्ष्यमन्यैर्जननीनिबद्धं,
कुण्डानुभावात् त्रुटति स्म सूत्रम् ।। ८० ।।

तदैव सोऽभूत् कृकवाकुरूपं,
त्यक्त्वा मनुष्यो नृपराजचन्द्रः ।
तौ दम्पती शासनदेवता द्राक्,
कुण्डात् समुत्तारयति स्म तस्मात् ।। ८१ ।।

कुण्डाद् बहिर्भूय निजं पतिं तं,
श्रीप्रेमला ज्ञातवती तदैव ।
अमन्दमानन्दममू प्रयातौ,
जाया-पती वीक्ष्य परस्परं तौ ।। ८२ ।।

तीर्थस्थिता देवजनाः समन्तात्,
पुष्पस्य वृष्टिं गगनादकार्षुः ।

---

१. 'पथा च' इति पाठा० ।। २. 'प्रेम्णः प्रतीकारमहो विधास्ये ।' इति पाठा० ।।
३. 'हा प्रेमरसेन सार्द्धम्' इति पाठा० ।। ४. 'नटाधिराजस्य सुता जले हि ('भूपस्य पुत्री रभसा, तदा च' इति पाठा०) । बबन्ध सूत्रं जननी विधातुं, यत् कुक्कुटं तत् त्रुटति स्म तस्य ।।' इति पाठा० ।। ३. '-त्' इति पाठा० ।।

श्रीचन्द्रभूपोपरि चन्दनानां,
पङ्कान्यवर्षन् सुरभीनि सद्यः ।। ८३ ।।

श्रीसूर्यकूण्डस्य प्रभाव उग्रः,
कलौ जनानां प्रणिहन्ति पापम् ।
दृष्टान्त एवाऽत्र स कुक्कुटोऽपि,
क्षणादभूच्चन्द्रनृपो मनुष्यः[१] ।। ८४ ।।

प्रणम्रतापूर्वकमाजगाद,
श्रीप्रेमला चन्द्रनृपं सलज्जा ।
'तीर्थप्रभावात् परिपूर्तिमागा-
न्मनोरथस्ते सकलः प्रियाऽद्य[२] ।। ८५ ।।

स्नात्वाऽत्र कुण्डे वृषभेश्वरस्य,
भावेन पूजां कुरु जीवितेश ! ।'
निशम्य तस्या वचनं महीपः,
स्नात्वा सुवासो धरति स्म चन्द्रः ।। ८६ ।।

जाया-पती तौ वृषभं जिनेन्द्रं,
द्रव्येण सम्पूज्य विधानपूर्वं[३] ।
ततश्च काव्यै रसभावयुक्तैः[४],
प्रतुष्टुवुर्भावनया समेतौ[५] ।। ८७ ।।

'त्वं नाथ ! सम्यग् भुवनत्रयस्य,
संरक्षिता शान्तिमयूखचन्द्रः[६] ।
मनोरथानां परिपूरणार्थं[७],
कल्पद्रुमो भासि निजाश्रितानाम् ।। ८८ ।।

---

१. 'यस्य प्रभावात् कृकवाकुरूपं, त्यक्त्वाऽभवच्चन्द्रनृपो मनुष्यः ।।' इति पाठा० ।। २. 'पतेऽद्य ।।' इति पाठा० ।। ३. '-विधानतो हि ।।' इति पाठा० ।। ४. 'ततः सुकाव्यैर्गुणगुम्फितैस्तौ' इति पाठा० ।। ५. 'तमर्च्यम् ।।' इति पाठा० ।। ६. 'शान्तिविधानचन्द्रः ।' इति पाठा० ।। ७. '-परिपूरणे हि' इति पाठा० ।।

एवं प्रभोः स्तोत्रशतेन राजा,
जायासहायः स्तवनं चकार ।
प्रदक्षिणं चैत्यवरस्य चक्रे,
प्रमादमेतीह जनः शुभे कः[1] ? ।। ८९ ।।

इतश्च काचिन्मकरध्वजाय,
विज्ञापयामास जवाद् भुजिष्या[2] ।
'श्रीसूर्यकुण्डस्य प्रभावतोऽस्य[3],
स कुक्कुटश्चन्द्रनृपोऽद्य जातः[4]' ।। ९० ।।

आश्चर्यभूतं स निशम्य तस्या,
वचोऽतिहर्षं लभते स्म राजा ।
ददौ तथाऽस्यै परितुष्टिदानं,
न याच्यमस्याः कमपीह शिष्टम्[5] ।। ९१ ।।

'स कुक्कुटश्चन्द्रनृपो बभूवे'-
त्येवं समग्रे नगरेऽप्रथिष्ट ।
संश्रुत्य सर्वे तुतुषुर्जना द्राग्,
द्रष्टुं समागुर्नृपमन्दिरं ते ।। ९२ ।।

श्रीप्रेमलाया जननी पिता च,
जामातुरेवं परिलभ्य वृत्तम् ।
कदम्बपुष्पप्रतिमः प्रहर्षाद्,
बभूव सामात्यनृपस्तदानीम् ।। ९३ ।।

---

१. 'विवाहकाले वरवत् कृशानोः ।।' इति पाठा० ।। २. 'दासी' इति टि० ।।
३. 'प्रभावतोऽभूत्' इति पाठा० ।। ४. 'स कुक्कुटश्चन्द्र इति प्रपद्यः (प्रजातः- पाठा०) ।।' इति पाठा० ।। ५. 'वित्तं तथाऽस्यै प्रददौ महीपः, साक्षाद् रमाऽभूत् खलु तेन साऽपि ।।' इति पाठा० ।।

आनाय्य राजा नटराजमूचे,
'तव प्रसादाच्चरणायुधः सः ।
जातोऽद्य चन्द्रो न तवोपकार-
स्याऽऽनृण्यमस्याऽयुतजन्मभिः स्यात्' ।। १४ ।।

चन्द्रस्य सैन्यं सकलं स्वभर्तु-
र्महोदयं तच्छ्रशुरान्निशम्य ।
अमन्दमानन्दमयान्मुहुश्च,
जयं जगौ चन्द्रनृपस्य तारम्[१] ।। १५ ।।

ध्वजं बबन्धुर्नगरस्य मार्गे,
सुगन्धितोयं सिषिचुर्जनौघाः[२] ।
सामन्तचक्रेण विराजमानो,
नृपो ययौ चन्द्रनृपेक्षणाय ।। १६ ।।

गत्वा प्रभुं तत्र नमश्चकार,
चन्द्रेण पश्चान्मिलति स्म भूपः ।
श्रीप्रेमला द्राक् पितरौ प्रणम्य,
जगाद शालीनतयाऽतिनम्रा ।। १७ ।।

'तव प्रसादान्मम जीवितेशो-
ऽधुना पितः ! सम्मिलितो महीप ! ।
आभापुरेशो ननु वीरसेन-
राजस्य पुत्रोऽयमिति प्रविद्धि ।। १८ ।।

श्रीसूर्यकुण्डस्य [३]गुरुप्रभावात्,
तिर्यक्स्वरूपं परिमुच्य सद्यः ।

---

१. 'आनन्द एषां हृदये ममौ नो, तथा मुदं प्रापुरदीनसत्त्वाः।।' इति पाठा० ।।
२. 'सिषिचुः समन्तात्' इति पाठा० ।। ३. 'जल-' इति पाठा० ।।

मनुष्यरूपं प्रतिलभ्य भूयः,
स जात इत्येव पितः ! प्रमन्ये[1] ।। ९९ ।।

जामातरं पश्य विशेषतस्त्वं,
समानरूपो भुवनेऽस्त्यनेकः ।
परन्तु नैतत्प्रतिमोऽस्ति कश्चिद्,
दृष्टः श्रुतो वा पुरुषः सुरूपः[2]' ।। १०० ।।

इत्थं सुताया वचनं निशम्य,
नितान्तहर्षं लभते स्म राजा ।
निमेषशून्येन विलोचनेन,
विलोकयामास स चन्द्रभूपम् ।। १०१ ।।

जामातरं वीक्ष्य स चन्द्रभूपं,
समालिलिङ्ग क्षितिपाल उच्चैः ।
सहागतः सैन्यगणोऽपि हर्षाद्[3],
ननाम नम्रो निजगाद भक्त्या ।। १०२ ।।

'त्वं कुक्कुटोऽपि क्षितिपो मदीय,
इत्येव मत्वा त्वयका सहैव ।
समागता'स्तद्विनयेन याचे,
न नः कदाचित् त्यज सेवमानान्[4] ।। १०३ ।।

नतो नटेनाऽपि मुहुः सुभक्त्या,
सुकीर्तिसङ्कीर्तनकारकेण[5] ।

---

१. 'प्रमेने' इति पाठा० ।। २. 'जगत्त्रये तात ! पुमान् सुरूपः ।।' इति पाठा० ।। ३. 'प्रेम्णाऽथ सामन्तगणोऽपि चन्द्रं' इति पाठा० ।। ४. '-इत्येव कृत्वा भवता समं हि। समागतोऽहं विनयेन याचे, न मां कदाचित् त्यज हे महीप ! ।।' इति पाठा० ।। ५. 'नटोऽपि चन्द्रं प्रणनाम कीर्तिं, जगौ सुभक्त्या मधुरस्वरेण।' इति पाठा० ।।

पश्चात् समुत्तीर्य गिरेर्गजस्य,
पृष्ठं[१] स चन्द्रो नृप आरुरोह ।। १०४ ।।

अनेकवाद्येषु नदत्सु[२] गीतं,
गायत्सु बन्दिप्रवरेषु तत्र ।
हर्षातिरेकात् पुलकाञ्चिताङ्गी[३],
श्रीप्रेमला स्यन्दनमध्यतिष्ठत् ।। १०५ ।।

अनेकसामन्तसमन्वितोऽसौ,
ततः प्रयातो विमलापुरं द्राक् ।
गन्तुं सुरेशायतनं ध्रुवं तद्,
ढक्कानिनादैर्भरितः सुराध्वा[४] ।। १०६ ।।

हेषारवैर्वाजिवरस्य मत्त-
मतङ्गजानां परिबृंहितेन ।
आलोकशब्दैरपि बन्दिगीतै-
र्दिगन्तरालं स्थगितं प्रयाणे[५] ।। १०७ ।।

नृपद्वयस्योपरि शोभते स्म,
छत्रद्वयं चन्दिरकान्तिरम्यम् ।
दिवाऽपि चन्द्रद्वितयभ्रमेण,
विलोकितं कौतुकतो जनौघैः[६] ।। १०८ ।।

---

१. 'स्कन्धं' इति पाठा० ।। २. 'वदत्सु' इति पाठा० ।। ३. 'भूपोऽनुरूपं गजमारुरोह' इति पाठा० ।।, अत्र 'मकरध्वजः' इति टि० ।। ४. 'चचाल तस्माद् विमलापुरं हि । ढक्काध्वनिर्व्याप्य नभःप्रदेशं, जगाम किं नो सुरराजसद्म ?।।' इति पाठा० ।। ५. 'आलोकशब्दैर्बधिरीबभूव, गव्यूतिमात्रं किल तत्प्रयाणे ।।' इति पाठा० ।। ६. 'दिवाऽपि चन्द्रद्वयराजमानं, नभो बभूवेव विशालशोभम् ।।' इति पाठा० ।।

पार्श्वद्वये चामरयुग्ममाभात्,
तयोर्द्वयोर्निर्मलकान्तिराजत् ।
किं व्योमगङ्गासलिलप्रवाह-
द्वयं शिवभ्रान्तिवशात् सिषेच ।। १०९ ।।

अनेन शोभातिशयेन राजा,
चन्द्रेण सार्द्धं नगरे विवेश ।
ददौ च तस्मै समभोग्ययुक्तं[1],
वासस्थलं वायुविहाररम्यम् ।। ११० ।।

वित्तं ददौ याचकमण्डलाय,
यथासमीहं मकरध्वजोऽसौ ।
नटाधिराजाय तथाऽददात् स्वं,
यथा स लक्ष्मीपतिरेव जातः ।। १११ ।।

चन्द्रः स्वसामन्तगणाय वित्तं,
ददौ प्रभूतं प्रबलप्रमोदात् ।
न दानशौण्डाः समये कदाचित्,
सीदन्ति हि स्वेतरबुद्धिबद्धाः[2] ।। ११२ ।।

आनन्दकल्लोलपरम्पराभी,
रोमाञ्चितास्ते प्रययुः कृतार्थाः[3] ।
श्रीचन्द्रभूपस्य यशो जगत्यां,
सुधांशुकल्पं प्रससार सद्यः ।। ११३ ।।

श्रीप्रेमलां स्नेहविशेषतः सो[4],
जगाद राजा मकरध्वजोऽथ ।

१. 'चन्द्राय रम्यं प्रददौ महीपो' इति पाठा० ।। २. 'सीदन्ती हि प्राप्य जनं सुपात्रम् ।।' इति पाठा० ।। ३. 'स्ववेशम ।' इति पाठा० ।। ४. 'श्रीप्रेमलां प्रेमपुरस्सरं हि' इति पाठा० ।।

"गङ्गेव पूताचरिते ! तवाऽह-
मत्यप्रियं प्राव्यदधं विमोहात्[१] ।। ११४ ।।

आषोडशाब्दं त्वयि पुत्रि ! नाऽहं,
स्नेहं[२] व्यधां जातु विमोहितान्तः ।
तत्कुष्ठिवाक्याद् विषकन्यकां त्वा-
मवेदिषं तत् परिमर्षय त्वम्' ।। ११५ ।।

पितुर्वचः सा च निशम्य तस्मै,
जगाद 'ते दोषलवोऽपि नास्ति ।
ममैव प्राक्कर्मविपाकतोऽद्धा,
मयाऽनुभूतं पुरु[३] दुःखजातम् ।। ११६ ।।

भोगं विना न क्षयमेति कर्म,
बुद्ध्वेति कस्याऽपि न दोषमत्र ।
मन्ये, पितस्ते किल पुण्ययोगात्,
प्राप्तो मया प्राणपतिः स चन्द्रः[४] ।। ११७ ।।

यो दुर्जनस्त्वामपि दोषमुक्त्वा,
विरक्ततामानयत व्यलीकम्[५] ।
तस्याऽपि कल्याणमथाऽस्तु येन,
प्रख्यातिरेषा भुवने ममाऽभूत् ।। ११८ ।।

पुनर्न मन्युं मयि तात ! कुर्याः,
कस्याऽपि वाक्येन विना विचारम् ।
इत्येव याचे, कुरु मे परीक्षां,
पत्युर्विशिष्टस्य समक्षमेव'" ।। ११९ ।।

---

१. 'पुत्रि ! त्वमत्यन्तगुणाऽसि, तेऽहं, महापराधं व्यदधां प्रमोहात् ।।' इति पाठा० ।। २. 'प्रेम' इति पाठा० ।। ३. 'सर्वं कृतं मे खलु ।।' इति पाठा० ।। ४. 'वियुक्तः' इति पाठा० ।। ५. 'प्रलापी ।' इति पाठा० ।।

उवाच राजा 'नियतं पतिस्ते,
चन्द्रोऽस्ति सन्देहलवोऽपि नाऽत्र ।
आभापुरं यावदितोऽस्ति देशः,
सर्वस्य तस्याऽधिपतिर्ध्रुवं सः[1] ।। १२० ।।

त्वमङ्गजा मे बहुभाग्यपूर्णा,
जामातृभावं गमितो ययाऽयम् ।
गास्यन्ति सूर्यावधि शास्त्रमध्ये,
त्वदीयकीर्तिं कवयो विशुद्धाम् ।। १२१ ।।

जायापती[2] प्राप्य नवीनसङ्गं,
नवं नवं वैषयिकं सुखं तौ[3] ।
चिराय भोगं कुरुतः स्म नाके,
नाकेशजायापतिवन्नितान्तम्' ।। १२२ ।।

अथैकदा चन्द्रनृपं नृपालो-
ऽपृच्छत् समानाय्य रहस्यमेतत् ।
'जामातरत्राऽऽगमनं कथं ते ?,
कथं मदीयां तनयां व्यवाक्षीः ? ।। १२३ ।।

कथं त्वया कुक्कुटरूपमाप्तं ?,
सर्वं पुरो मे कथयस्व राजन् ! ।
अत्युत्सुकोऽहं तव वृत्तमेत-
च्छ्रोतुं यशश्चन्द्रविभासिताश !' ।। १२४ ।।

चन्द्रोऽवद''न्मन्त्रबलाद् विमाता,
ममैकदा पुत्रवधूसमेता ।

---

१. 'स भावी (स राजा-पाठा०) ।।' इति पाठा० ।। २. 'तौ दम्पती' इति पाठा० ।। ३. 'हि ।' इति पाठा० ।।

आरुह्य चूतस्य महीरुहं सा,
विमानकल्पं नभसा समागात् ।। १२५ ।।

तत्कोटरे गुप्ततया निषण्णः,
क्रमेण चाऽऽगां नगरे तवाऽहम् ।
तस्यां निशायां तव पुत्रिकाया,
आसीद् विवाहस्य महोत्सवोऽत्र ।। १२६ ।।

श्रीसिंहलेशस्य सुतेन सार्द्धं,
तन्मङ्गलं भावि ममाऽपि तस्य ।
मन्त्री जगाद प्रबलच्छलेन,
स हिंसकाख्योऽनुगतार्थनामा[1] ।। १२७ ।।

अनेक संप्रार्थनया तदाऽहं,
तव व्यवाक्षं तनयां छलेन ।
ततोऽगमं तं परिरुह्य वृक्ष-
माभापुरं द्राग् जननीसमेतः ।। १२८ ।।

मदीयवृत्तं सकलं विमाता,
विज्ञाय मां ताम्रशिखं व्यधत्त ।
श्रीसूर्यकुण्डस्य प्रभावतोऽहं,
पुनर्नरत्वं समवापमत्र'' ।। १२९ ।।

इत्थं स चन्द्रस्य निशम्य वृत्त-
माश्चर्यमापन्नृपतिस्तदानीम् ।
आनाय्य काराभवनात् तदैव,
पञ्चाऽपि तान् क्रोधकषायचित्तः ।। १३० ।।

---

१. 'श्रीहिंसकाख्यः स यथार्थनामा ।।' इति पाठा० ।।

उवाच तं सिंहलभूपपुत्रं,
कुष्ठाभिभूतं प्रबलप्रकोपात् ।
"रे रे त्वयाऽहं छलितो नितान्तं,
त्वद्वाक्यतोऽहं यदि कन्यकां स्वाम् ।। १३१ ।।

अमारयिष्यं वद केन तस्मा-
दमोचयिष्ये दुरितात् कलङ्कात् ।
धन्यः प्रधानः प्रनिवार्य यो मां,
सुतामरक्षत् सुयशश्च विद्वान्[१] ।। १३२ ।। युग्मम्

स्वयं[२] च कुष्ठी विषकन्यकां मे,
सुतामवोचत् प्रबलच्छलेन ।
तदा सुताया वचनं मया नो,
प्रत्यायि[३] तन्मोहवशेन किञ्चित् ।। १३३ ।।

ज्ञातं मया सम्प्रति हिंसकस्य,
सर्वच्छलं वञ्चयितुं कृतं माम्[४] ।
अद्याऽस्य पापं प्रकटीबभूव,
चन्द्रोदये क्वाऽस्तु हता तमिस्रा[५] ? ।। १३४ ।।

स्मृत्वा पुरा तत्कृतमप्रियं यत्,
कृतं न केनाऽपि श्रुतं न दृष्टम्[६]' ।
उवाच तं सिंहलभूपतिं स,
क्रोधारुणाक्षो मकरध्वजोऽथ[७] ।। १३५ ।।

---

१. 'मे हि ।।' इति पाठा० ।। २. 'अयं' इति पाठा० ।। ३. 'प्रामायि' इति पाठा० ।। ४. 'सर्वच्छलं मां प्रति दुर्णयत्वम् ।' इति पाठा० ।। ५. 'चन्द्रोदये जातु न गोपितं च ।।' इति पाठा० ।। ६. कस्याऽपि पापं भवतीह गुप्तं, ज्ञातं मया चन्द्रत एव सर्वम् ।।' इति पाठा० ।। ७. 'हि' इति पाठा० ।।

"रे पाप ! कस्मात् तनयां ममाऽपा-
वादीरमन्तुं शुचिशीलदीप्ताम् ? ।
तदप्रियं त्वं व्यदधा दुरन्तं,
प्राप्ताऽसि यस्याऽद्य फलं कटु द्राक्[1] ।। १३६ ।।

पुत्र्या महोग्रं प्रविधाय दुःखं,
न लज्जसे त्वं कथमत्र पापिन् ! ।
त्वदाननोद्वीक्षणमप्यभद्र-
हेतुः किलैतद्दुरितप्रभावात्[2] ।। १३७ ।।

प्रासोष्ट या त्वां जननी च[3] तस्या,
धिक्कार आस्तां न कथं तदैव ।
मृतोऽभवः स्त्रीजनदुःखदायी ?,
धिक् त्वामि"ति न्यक्कृतवान् नृपालः ।। १३८ ।।

आह्वाय्य चाण्डालमरं च सर्वान्[4],
राजा न्यदिक्षत् परिहिंसितुं तान्।
तस्मिन् क्षणे चन्द्रनृपः समागात्,
तेषां वधादेशमवेत्य विज्ञः[5] ।। १३९ ।।

"महाशया नैव परस्य रक्षां,
स्वप्राणभङ्गेऽपि त्यजन्ति जातु ।
राजन् ! वधं नो शरणागताना-
मौचित्यमेतीह कदाऽप्यरीणाम्[6] ।। १४० ।।

---

१. 'रे पाप ! कस्माद् दुहितुर्मम त्वं, क्लेशं व्यधा निष्फलमेवमुग्रम् । दुःखं मम त्वं व्यदधास्तदुग्रं, सुप्तं हरिं बोधितवानसि त्वम् ।।' इति पाठा० ।। २. 'त्वदाननं वीक्ष्य महाजनो हि, स्मेराननः किं भविता न दुष्ट ! ।।' इति पाठा० ।। ३. 'हि' इति पाठा० ।। ४. 'आह्वाय्य चाण्डालममुं तदैव,' इति पाठा० ।। ५. 'संश्रुत्य तेषां वधमाशु विज्ञः ।।' इति पाठा० ।। ६. '-गतानां, करोति विद्वान् क्वचिदप्यरीणाम् ।।' इति पाठा० ।।

एवं भवांश्चेद् विदधाति, तेन[१],
कृतज्ञताहानिमिवेह लोके[२] ।
यदावयोः सङ्गतमस्ति तस्य,
निदानभूतो हित एव चाऽयम्[३] ।। १४१ ।।

मुञ्चेद् भवांश्चेत् सुयशोऽत्र लोके
भवेदखण्डं शरदिन्दुशुभ्रम् ।
एतेऽपि शिक्षामधिगम्य चाऽतः,
परं विदध्युर्न कदाऽपि चेत्थम्[४] ।। १४२ ।।

अन्यच्च पुत्र्यास्तव कर्मदोषो,
विजृम्भते, नाऽत्र च दोष एषाम् ।
इमेऽतिदीना इव भान्ति भीताः[५],
पुत्रश्च कुष्ठेन रुजाभिभूतः ।। १४३ ।।

प्रसीद चैतेषु दयस्व तस्मात्[६],
क्षमस्व दोषान्, परिमुञ्च बन्धात्[७]' ।
कथं विलुम्पामि वचोऽस्य, चैवं,
विमृश्य राजाऽप्युररीचकार ।। १४४ ।।

सुगन्धितैलं परिलिप्य चैता-
नस्नापयच्चन्द्रनृपस्तदैव ।
कौशेयवस्त्रं वरभूषणं च,
दत्त्वा सुभोज्यं व्यतरच्च तेभ्यः ।। १४५ ।।

---

१. 'किं स्यान्' इति पाठा० ।। २. 'महाजनानां सदसद्विचारः ।' इति पाठा० ।। ३. '-तस्या-ऽयं निश्चितो हेतुरतो न वध्यः ।।' इति पाठा० ।। ४. 'परं विदध्युर्नहि तादृशं हि' इति पाठा० ।। ५. 'किञ्चातिदीना इव भान्ति चाऽमी' इति पाठा० ।। ६. 'एतेषु राजन् ! दयया प्रसीद' इति पाठा० ।। ७. 'चैतान् ।' इति पाठा ।।

श्रीप्रेमला पत्युरमोघसत्त्व-
विख्यापनार्थे सहसाऽऽजगाम ।
प्रक्षाल्य तत्पादयुगं तदेव,
जलं समादाय विशालसत्त्वा ।। १४६ ।।

कुष्ठापनुत्त्यै कनकध्वजस्य,
सिषेच देहे नृपनन्दिनी[१] सा ।
सद्यो विनाशं प्रययौ तदीयं,
कुष्ठं सुरम्याकृतिरप्यभूत् सः ।। १४७ ।। युग्मम्

दिवोऽथ देवा जयशब्दमुच्चै-
रुच्चार्य पुष्पं ववृषुश्च चन्द्रे ।
तदाऽस्य[२] पादौ परिगृह्य भक्त्या,
ननाम सद्यः कनकध्वजोऽपि ।। १४८ ।।

'धन्योऽसि राजंश्चरणोदकस्य,
वक्तुं समर्थास्तव के प्रभावम् ? ।
न देवता कुष्ठरुजाभिभूतं,
मां स्वस्थमाधात् परमाचरस्त्वम्' ।। १४९ ।।

सम्मान्य तांश्चन्द्रनृपो मुमोच,
ते तं नमस्कृत्य ययुः सुखेन ।
श्रीसिंहलेशः स्वपुरं समेत्य,
सुखेन चाऽस्थात् स्वसुतेन सार्द्धम् ।। १५० ।।

---

१. 'नृपनन्दनी' इति पाठा०।। २. 'चन्द्रस्य' इति पाठा० ।।

( मालिनीवृत्तम् )

अथ[१] नवनवसौख्यं प्रेमलायाः समीपे,
नरपतिरनवद्यं सोऽन्वभूच्चन्द्रनामा ।
भवति [२]विषमदुःखस्याऽवसाने प्रकामं[३],
स्वहृदभिलषितं[४] सद्दैवयोगेन जन्तोः ।। १५१ ।।

इति श्रीकस्तूरसूरिविरचिते श्रीचन्द्रचरित्रे
षष्ठः सर्गः
समाप्तः

१. 'इति' इति पाठा० ।। २. 'विरह-' इति पाठा० ।। ३. 'हि रम्यं' इति पाठा० ।। ४. 'प्रियमिलनसुखं' इति पाठा० ।।

शासनसम्राट्पूज्याचार्यश्रीविजयनेमिसूरीश्वरपट्टधर-
पूज्याचार्यश्रीविजयविज्ञानसूरीश्वरपट्टधरप्राकृतविशारद-
पूज्याचार्यश्रीविजयश्रीकस्तूरसूरिप्रणीतं

# चन्द्रचरित्रे सप्तमः सर्गः

(वंशस्थवृत्तम्)

अथैकदा तस्य गुणावली निशि[1],
स्मृताऽभवत् तल्पमधिश्रितस्य[2] ।
विचारयामास तदा महीपतिः,
प्रियां स्वकीयां बहुदुःखसाक्षिणीम् ॥ १ ॥

''सुखेन कालं विमलापुरेऽनिशं,
श्रीप्रेमलायाः सविधे नयाम्यहम् ।
न वेद्मि किञ्चिद्[3] हृदयप्रिया कथं,
विना मया सा समया करोत्यहः[4] ॥ २ ॥

प्रतिश्रुतं यत्पुरतस्ततो मया,
प्रिये ! नृरूपं परिलभ्य सत्वरम् ।
समागमिष्यामि न जातु विस्मृता,
भवेस्तदेतत् परिहीयतेऽधुना[5] ॥ ३ ॥

व्रजामि तस्याः पुरतोऽधुनाऽप्यहं,
तदा भवेत् तद्वचसः कृतार्थता[6] ।

---

१. 'प्रिया' इति पाठा० ॥ २. 'समागमच्चेतसि रम्यरात्रिषु ।' इति पाठा० ॥ ३. 'सा मे' इति पाठा० ॥ ४. 'विना मया यापयते नु वासरम् ? ॥' इति पाठा० ॥ ५. 'अगादिषं सुन्दरि ! ते पुरः पुरा, यदा नृरूपं परिलप्स्यते मया। तदाऽऽगमिष्यामि पृथग् भवन्नहं, न विस्मरामीति विशालसौख्यभाक् ॥' इति पाठा० ॥ ६. 'तदा भवेत् साधुवचोऽर्थसत्यता ।' इति पाठा० ॥

करोति या प्रेम निरर्गलं मयि,
प्रियस्य तस्या विधिरेव निष्क्रयः[१]" ।। ४ ।।
सुप्तोत्थितः प्रातरथो[२] महीपति-
र्लिलेख पत्रं च[३] गुणावलीं प्रति ।
दूताय दत्त्वा न्यगदत् तदा रहः,
"प्रदेयमेतन्न गुणावलीमृते[४] ।। ५ ।।
कस्मैचिदाख्येयमिदं वचस्त्वया,
न, वीरमत्याः सविधे विशेषतः ।
प्रकाशितस्त्वं न भवेः कदाचन,
विधेयमेतन्निभृतं त्वया सखे ! ।। ६ ।।
सन्मङ्गलं प्रक्ष्यसि कोमलोक्तिभिः,
सन्तोषमुल्लिख्य च मां प्रदास्यसि ।
शुचं त्यज द्वापरमत्र नो कुरु[५],
झटित्यसौ ते मिलितेति वक्ष्यसि ।। ७ ।।
प्रभावतस्तीर्थवरस्य मानवं,
वपुर्मया प्राप्तमहो सुदुर्लभम्।
उपेत्य तत्राऽहमसंशयं धरा-
भरं खिलीकृत्य खलं भरिष्ये[६] ।। ८ ।।
सदा मदीयो[७] निजमानसे प्रिये !,
स्नेहस्त्वया धार्य इतीह किं ब्रुवे ? ।

---

१. 'तस्याः प्रियं हा न कथं करोम्यहम् ।।' इति पाठा० ।। २. 'प्रातरसौ' इति पाठा० ।। ३. 'हि' इति पाठा० ।। ४. 'पत्रं प्रदेयं हि गुणावलीकरे ।।' इति पाठा० ।। ५. 'सन्तोषमस्यै बहु मे बिन्धनम् । प्रदास्यसे, तिष्ठ सुखेन सुन्दरि!' इति पाठा० ।। ६. 'आगत्य तत्राहमसंशयं प्रिये !, राज्यं करिष्ये रिपुनाशपूर्वकम् ।।' इति पाठा० ।। ७. 'मदीयं' इति पाठा० ।।

न चातकी जातु दिवानिशं यतः,
प्रयोजिता स्निह्यति दूरवारिदे[१] ? ।। ९ ।।

विकासिमल्लीमधुलालसः किं,
मधुव्रतोऽन्यत्र मनो नियच्छति[२] ? ।
अतः प्रिये ! शीघ्रतरं तवाऽन्तिके,
समागमिष्यामि न संशयं कुरु'' ।। १० ।।

मदुक्तमेवं कथयेस्तिरोहितो,
व्रजाऽविलम्बेन 'शिवं तवाऽस्त्वि'ति ।
नियोजितो राजवरेण तेन सो,
गतस्तदाऽऽभानगरं कियद्दिनैः[३] ।। ११ ।।

'इयं किमास्ते नगरी सुरेशितुः,
पुरी कुबेरस्य महाप्रभा किमु ? ।'
इति प्रकामं परिचिन्तयन् ययौ,
स मन्त्रिणो धाम सुगुप्तभावतः ।। १२ ।।

स मन्त्रिणे पत्रमदात् प्रपद्य त-
न्नितान्तहर्षं परिलभ्य तत्क्षणम्[४] ।
ययौ स तेनैव गुणावलीपुरो,
न्यदर्शयच्चन्द्रनृपस्य तद्दलम् ।। १३ ।।

गुणावली पत्रमदः प्रपठ्य सा,
नृदेहलाभं स्वपतेरवाऽगमत् ।

---

१. '-स्नेहं त्वया धार्यमनन्यचेतसा । न वीरमत्या वचनेन केवलं, त्वं विस्मृतिं मे कुरु जातु सुन्दरि ! ।।' इति पाठा० ।। २. 'स्वजन्मभूमेर्हि यथा शमीद्रुमः, प्रियस्तथाऽन्यत्र न मालतीलता ।' इति पाठा० ।। ३. 'इति प्रभूतं नृपतिः समादिशच्चरोऽथ सोऽपि प्रचचाल तत्पुरम् । आवाप्य चाऽऽभानगरं चिरादसौ, विलोक्य तद् विस्मयमाप तत्क्षणे ।।' इति पाठा० ।। ४. 'तत्क्षणे' इति पाठा० ।।

अमन्दमानन्दमवाप तत्क्षणे,
मुदश्रुभिर्भूमितलं सिषेच च ।। १४ ।।

जगाद दूतो नृपवाचिकं तदा-
ऽथ तां, निशम्याऽऽह गुणावली ततः ।
'प्रकाशनीयं पुरतो न कस्यचित्,
त्वये'ति वृत्तं भ्रमतो[1]ऽपि कर्हिचित् ।। १५ ।।

विधाय तस्याऽप्रतिमां च सत्कृतिं,
ददौ पुरस्कारपुरस्सरं दलम् ।
ययौ स दूतो मुदितस्ततो द्रुतं,
निवृत्य धीमान् विमलापुरं प्रति[2] ।। १६ ।।

सुगुप्तमप्येतमुदन्तमञ्जसा,
परम्परातो जनता व्यबुध्यत ।
प्रतीक्षमाणा च नृपागतं घना-
गमं लतेवाऽऽस नितान्ततापिता[3] ।। १७ ।।

निशम्य तद्वृत्तमिवाऽऽकुला भृशं,
बभूव सा वीरमती भिया द्रुतम् ।
निजे हृदि ध्यातवती च कुक्कुटः[4],
'कथं वपुः सोऽद्य गतो नृजन्मनः ।। १८ ।।

---

१. 'भ्रमात्' इति टि० ।। २. 'विलिख्य पत्रं प्रददौ गुणावली, विधाय तस्याऽतिशयां हि सत्कृतिम् । ययौ स दूतः प्रतिलब्धसत्कृतिः, प्रमोदतस्तद्विमलापुरं प्रति ।।' इति पाठा० ।। ३. 'गृहे गृहे चन्द्रनृपस्य सा कथा, बभूव राजा नररूपवानिति । भवेद् यदा पौरजनस्य शोभनो, भाग्योदयस्तर्हि स आगतो भवेत् ।।' इति पाठा० ।। ४. 'अदो वचो वीरमतीश्रुतिं यदैत्, तदाऽभवत् सा क्षुधितेव पन्नगी । दध्यौ च यं ताम्रशिखं व्यधामहं' इति पाठा० ।।

इहाऽऽयियासत्यपि सोऽथ यन्मया,
न मारितस्तद् विहितं न मङ्गुलम्[१] ।
ततोऽद्य[२] गत्वा विमलापुरीं प्रति,
द्रुतं प्रतीकारविधिं क्रियां स्वयम्[३] ।। १९ ।।

यथा स नाऽऽभानगरं समाव्रजेत्,
तथा विधास्यामि निजोग्रपाटवात् ।
विशिष्टसामर्थ्यवतामपीह यद्[४],
न वर्धमानोऽरिरुपेक्षितुं क्षमः' ।। २० ।।

तदैव साऽऽनाय्य गुणावलीं वधूं,
जगाद "चन्द्रो नररूपमाप्तवान् ।
इहाऽप्यसौ दुर्मतिरेतुमिच्छति,
गतोऽस्य नाऽद्यावधि चेतसो मदः ।। २१ ।।

मनुष्यरूपं प्रतिलभ्य मामकः,
प्रभावलेशः किल तेन विस्मृतः[५] ।
तृणाय मन्ये यमहं न जातुचि-
न्मया विरोधं स विधातुमिच्छति ।। २२ ।।

न चाऽऽयतिस्तस्य शुभा विलोक्यते,
भवेदिदानीं खलु जीवसंशयः ।
तदीयवृत्तं परिवेत्सि चेत् तदा,
वदाऽऽशु पत्रं लिख मद्वचोऽन्वितम् ।। २३ ।।

---

१. 'मङ्गलम् ।' इति पाठा० ।। २. 'इतोऽथ' इति पाठा० ।। ३. 'तदीयगर्वं परिखण्डयाम्यहम् ।।' इति पाठा० ।। ४. 'तथा विधास्यामि तथाकृते निजम् । पराक्रमं साधुतरं विभावये,' इति पाठा० ।। ५. 'मनुष्यरूपं प्रतिलब्धवानसौ, विराजते किं नु पराक्रमाधिकः ? ।' इति पाठा० ।।

करोतु वैरं न मया समं पुन-
र्यदीहते जीवितमात्मनस्तदा ।
व्रजामि वाऽहं स्वयमेव तत्पुरं,
विहीनबुद्धिं परिशिक्षयेऽचिरात् ।। २४ ।।

ततोऽहमेष्याम्यचिरात् तवाऽन्तिकं",
निशम्य तत् सा निजगाद साध्वसात् ।
"वचो न युक्तं तव मातरीदृशं[१],
खगोऽभवद् यः स कथं नरो भवेत् ।। २५ ।।

जगत्यसौ कः प्रभुरस्ति पूरुषो,
विना त्वदीहां रचयेत कं नरम्[२] ? ।
उदन्तमेतं खलु कोऽपि दुर्जनो,
मुधाऽतनोत् किन्तु न सोऽस्ति वस्तुतः ।। २६ ।।

कथं नटो वा विमलापुरं व्रजेत्,
सुदूरमज्ञातमितोऽस्ति तन्मृषा[३] ।
न चाऽम्ब ! जानेऽधिकमित्यतोऽप्यहं,
कुरुष्व कार्यं सुविचार्य[४] नो हठात्" ।। २७ ।।

इतीरयित्वा भवनं स्वकं यया-
वुपास्त सा वीरमती स्वदेवताम् ।
समक्षभूतां प्रविलोक्य देवतां,
उवाच[५] 'चन्द्रस्य विनाशनं कुरुः[६]' ।। २८ ।।

---

१. 'समागमिष्यामि, पुनस्त्वमत्र हि, निषीद रीत्वेति ('श्रुत्वा' इति टि०) ।। जगाद साऽपि ताम् । मातर्न युक्तं वचनं तवेदृशं,' इति पाठा० ।। २. 'नरीकरो योऽत्र तवेप्सितं विना ।' इति पाठा० ।। ३. 'सुदूरमत्यन्तमसम्भवं हि तत् ।' इति पाठा० ।। ४. 'प्रविचार्य' इति पाठा० ।। ५. 'जगाद' इति पाठा० ।।, 'ययाचे इत्यर्थः' इति टि० ।। ६. 'ततः' इति पाठा० ।।

निशम्य तस्या वचनं च देवता,
जगाद 'चन्द्रस्य नृपस्य को भवेत् ।
प्रभुर्विनाशे किल सूर्यकुण्डतो,
नरत्वमाप्तस्य महोग्रपुण्यतः[१] ।। २९ ।।

अहं समर्थोऽस्मि न तस्य भूपते-
र्न वा समर्था त्वमपीह सम्प्रति ।
उपद्रवं कर्तुममुं हि, सर्वदा,
सुरो बली रक्षति मर्त्यदेहिनम् ।। ३० ।।

स्वकार्यमन्यद् वद तत्क्षणादहं,
करोम्यभीष्टं न च संशयो मनाक् ।
कुरुष्व चन्द्रं स्वसुतोचितं पुन-
र्निरस्य दुर्बुद्धिमरं महीपतिम्[२]' ।। ३१ ।।

निशम्य देवस्य वचः क्रुधाकुला,
न किञ्चिदस्मै पुनरप्युवाच सा ।
न चैव तद्वाचमुपाददे सका[३],
जगाम देवो निजमन्दिरं ततः ।। ३२ ।।

तदैव साऽऽनाय्य सुबुद्धिमन्त्रिणं,
जगाद 'यामो विमलापुरं प्रति ।
प्रजासु शान्तिं परिवर्तयाऽत्र च,
स्थितस्त्वमे'तद् विनिशम्य सो जगौ[४] ।। ३३ ।।

---

१. 'प्रबलमर्त्यामलदेहकत्वतः ।।' इति, 'प्रलब्धसन्मानुषजन्मनो जनः ।।' इति च पाठा० ।। २. 'विधाय तेऽभिष्टमहं ददेऽधुना । कुरुष्व चन्द्रेण समं हि ('च' इति पाठा०) सङ्गतं, विमुच्य वैरं कुरु तं महीपतिम् ।।' इति पाठा० ।। ३. '-ऽथ सा' इति पाठा० ।। ४. 'वयं, त्वमत्रैव च शान्तिपूर्वकं, निषीद, रीत्वेति जगाद सोऽप्यथ ।।' इति पाठा० ।।

'स्वकार्यमाधातुमये ! यदीहसे,
न रोद्धुमीशे यदहं तवाऽनुगः ।
अतो यथेच्छं कुरु शान्तितो मया,
तव प्रभावादिह वत्स्यतेऽधिपे[1] ]' ।। ३४ ।।

इति प्रधानस्य वचो निशम्य सा,
तदैव देवान् स्मरति स्म दुर्मतेः[2] ।
करेऽतितीक्ष्णं करवालमाददे,
चचाल तैः सार्द्धमथो[3] विहायसा ।। ३५ ।।

न लोकते दैवहतो जनो निजं,
परं[4] न कर्णे कुरुते हितं वचः ।
न जानती चन्द्रबलं क्रुधाकुला,
स्म मन्यते तं हतमेव मानिनी ।। ३६ ।।

न वेत्ति सा वीरमती यथा, तथा,
जगाम काचित् किल देवता ततः ।
'रहो विमाता तव चन्द्रभूपते !,
समेति, सज्जो भव' सा जगाद तम् ।। ३७ ।।

'तवोग्रपुण्यान्न च सा पराभवं[5],
विधातुमीशाऽस्ति, तथाऽपि सज्जितः ।
भवे'ति देवस्य निशम्य सद्वचो[6],
जहर्ष चन्द्रो न हि भीर्महात्मनाम् ।। ३८ ।।

---

१. 'प्रभो ! ।।' इति पाठा० ।। २. ' तदैव देवान् पुनराचकर्ष हि ।' इति पाठा०।। ३. ' सार्द्धमसौ' इति पाठा० ।। ४. 'बलं' इति पाठा० ।। ५. 'तवाऽस्ति पुण्यं न हि च (सा-पाठा०) पराजयं' इति पाठा० ।। ६. 'निषीद, रीत्वेति सुरस्य सद्वचो' इति पाठा० ।।

तदैव राजा पवनातिगं हयं,
सुसज्ज्य वर्मावृत आरुरोह सः ।
सुतीक्ष्ण-खड्गं च कटीतटे न्यधात्,
ययौ विमातुश्च फलाय दुष्कृतेः[१] ।। ३९ ।।

सहस्त्रसङ्ख्यं च बलं पुरो नृपो,
विधाय सोऽगान्मृगयामिषात् सुधीः[२] ।
समेति यावद्गहनं किमप्यथो[३],
ददर्श तावद् गगने विमातरम् ।। ४० ।।

क्रुधारुणाक्षी स्फुरदोष्ठपल्लवा,
प्रसूश्च चन्द्रं शममाश्रितं तदा ।
समागतं तं परुषाक्षरैः कुधीः[४],
जगाद 'रे ! त्वां श्वशुरोऽपि मे पुरः ।। ४१ ।।

समाव्रजन्तं किमु न न्यवारयत् ?,
स्वयं च किं विस्मृतवान् निजं वपुः ? ।
स्मर स्वदेवं त्वमिहाऽद्य मामक-
क्रुदुज्ज्वलद्वह्निशिखाहुतीभवन्' ।। ४२ ।। युग्मम्

निशम्य चाऽसावविवेककल्पितं,
वचो विमातुर्विनयाञ्जगाद ताम्[५] ।
'क्षमस्व, नाऽद्यापि तवेप्सितं मया,
ऽन्यथाकृतं, वेत्सि कुतोऽथ मां रिपुम्[६] ।। ४३ ।।

---

१. 'चचाल जेतुं चपलं विमातरम् ।।' इति पाठा० ।। २. 'छलेन हि ।' इति पाठा० ।। ३. 'जगाम दूरं बहुसुन्दरं वनं' इति पाठा० ।। ४. 'क्रोधेन सा बह्निशिखेन दीपिता, चन्द्रः सुधाधामवदास्त मातरि । समागतं वीरमती विलोक्य तं' इति पाठा० ।। ५. 'निशम्य मातुः परुषाक्षरं वचो, जगाद चन्द्रो विनयेन मातरम् ।' इति पाठा० ।। ६. 'ऽन्यथाकृतं, वेत्सि च मां रिपुं सदा ।।' इति पाठा० ।।

स्मरामि किं देवमिह, प्रकामतो,
विधीयतां यत्करणीयमस्ति ते' ।
निशम्य तद्वाचमसावसिं शितं,
ग्रहोद्गृहीतेव समाददे रयात्[१] ।। ४४ ।।

तयाऽथ चन्द्रे प्रहृतोऽप्यसिर्जवात्,
निवृत्य तद्वक्षसि चित्रमापतत् ।
हता निजस्यैव विगीतकर्मणा,
पपात रक्तोद्वमनं प्रकुर्वती[२] ।। ४५ ।।

शुभाशुभं यत्क्रियते नृजन्मना,
फलं भुनक्तीह स एव निश्चितम् ।
मृता गता वीरमतीह दुर्गतिं,
ननन्द चन्द्रो भुवि गीतसद्यशाः[३] ।। ४६ ।।

तदैव चन्द्रोपरि पुष्पवर्षणं,
चकार देवो जयशब्दपूर्वकम् ।
स्वशल्यघातेन निराकुलश्च सो-
ऽगमन्महैर्द्राग् विमलापुरं प्रति[४] ।। ४७ ।।

निशम्य तच्छ्रीमकरध्वजो नृपो,
मुदं समेतो विदधौ सुमङ्गलम्[५] ।

---

१. 'इति प्रगल्भं प्रणिशम्य तद्वचो, रोषारुणाक्षी शितखड्गमाददे ।।' इति पाठा० ।। २. 'प्रहारमस्योपरि संव्यधादसि-र्निवृत्य तद्वक्षसि सद्य आपतत् । असिप्रहारं परिलभ्य सा क्षितौ, पपात रक्तोद्वमनं प्रकुर्वती ।।' इति पाठा० ।। ३. 'नृपोऽपि केशेषु लघु प्रगृह्य ता-मपातयद् ग्रावणि दुष्टचारिणीम् । अवाप्य मृत्युं नरके जगाम सा, क्षितौ च षष्ट्यां निजकर्मयन्त्रिता ।।' इति पाठा० ।। ४. 'स्वजन्मशल्यं प्रणिहत्य सोऽगम-न्महोत्सवाढ्यो विमलापुरं प्रति ।।' इति पाठा० ।। ५. 'मुदं समेत्य प्रचकार मङ्गलम् ।' इति पाठा० ।।

नृपाङ्गजाऽपि प्रणिशम्य तद्वचो,
जहर्ष भूयः परिषस्वजे च तम्[१] ।। ४८ ।।

स्वराज्यमर्द्धं प्रददौ महीभुजे,
महोत्सवैः श्रीमकरध्वजोऽप्यथ ।
बुभोज चन्द्रो नृपकन्यया समं,
यथेहितं[२] वैषयिकं सुखं भृशम् ।। ४९ ।।

गुणावलीमेत्य जगाद कोऽप्यथो,
नभश्चरो वृत्तमिमं सुखावहम्[३] ।
निशम्य मोदोदधिमग्नमानसा[४],
प्रधानमानाय्य जगाद तद्वचः ।। ५० ।।

अमात्यवर्गश्च निशम्य[५] मोदयुग्,
बभूव तां हर्षभरातिनम्रगीः ।
उवाच 'दुःखं गतमद्य नस्तथा,
तव प्रजानां च यतो मृता सका[६]' ।। ५१ ।।

'ममार सा वीरमती'ति नागरा,
निशम्य हर्षं प्रतिलेभिरेऽतुलम्[७] ।
अवश्यमस्माकमुदैन्महत्तरं,
सुभाग्यमेतज्जगदुः परस्परम्[८] ।। ५२ ।।

---

१. 'प्रियम् ।।' इति पाठा० ।। २. '-मनारतं' इति पाठा० ।। ३. 'सुरो हि वृत्तान्तमिमं सुखावहम् ।' इति पाठा० ।। ४. 'निशम्य हर्षं परिलभ्य तत्क्षणे' इति पाठा० ।। ५. 'अमात्यवर्गः प्रणिशम्य-' इति पाठा० ।। ६. 'उवाच पूतं कुलमद्य तेऽभवदियं च पापा व्यनशत् स्वकर्मतः ।।' इति पाठा० ।। ७. 'बहुम् ।' इति पाठा० ।। ८. 'सुभाग्यमा !! यन्मृतिमाप पापिनी ।।' इति पाठा० ।।

विलिख्य पत्रं विमलापुरं प्रति,
व्यमोचि दूतो नगरीजनैर्निजः ।
ततो जगामाऽतिजवान्वितः सको[१],
दिवानिशं स्वप्रभुदर्शनोत्सुकः ।। ५३ ।।

गुणावली स्वप्रियदर्शनामृतं[२],
पिपासुरत्यन्तसमुत्कमानसा ।
व्यचिन्तयत् "को जन ईदृगस्ति यो,
विदेशगं प्राणपतिं समानयेत् ।। ५४ ।।

नवं नवं [३]सौख्यमसौ निरन्तरं,
प्रियोऽथ भुङ्क्ते नृपकन्यया मम[४] ।
इतः स आगत्य यथा सदा मुदा[५],
दिनं नयेत् कर्तुमिदं क ईश्वरः[६] ? ।। ५५ ।।

नृपाङ्गजा सा भगिनी मम प्रिया,
व्यधान्मनुष्यं खगतो नृपं यतः[७] ।
इदं तु जातं न समञ्जसं तया,
मम प्रियो यद्विदधे निजप्रियः ।। ५६ ।।

वदन्ति लोकाः प्रथमं विवाहिता,
प्रिया भवत्यत्र गदन्ति केचन ।

---

१. 'इतः समागन्तुमसौ चचाल ह' इति पाठा० ।। २. 'गुणावली नाथसमागमामृतं' इति पाठा० ।। ३. 'स्नेह-' इति पाठा० ।। ४. 'भुङ्क्ते समं भूपतिकन्यया प्रियः।' इति पाठा० ।। ५. 'निरन्तरं' इति पाठा० ।। ६. 'दिनं नयेत् कश्चरितुं प्रभुस्तथा ? ।।' इति पाठा० ।। ७. '-व्यधान्मनुष्यं मम वल्लभं हि या । परन्तु सा प्रविलोभ्य सत्पतिं, ध्रुवं सपत्नी समभून्नृपात्मजा ।।' इति पाठा० ।।

समागता नूतनवल्लभाऽधिका,
जनो नवोत्कः किल कामशासने[१] ।। ५७ ।।

नृपाङ्गजा सा हृदयप्रियाऽभवत्,
ततो विसस्मार नु मां मम प्रियः ? ।
स्मृताऽथवा तन्निशि मत्कृतिर्यतः
समागतोऽद्याऽपि विरज्य नो सकः[२] ?' ।। ५८ ।।

वितर्कयन्तीति विषण्णमानसा,
रुरोद हृद्भेदमसौ गुणावली ।
उवाह धैर्यात्मकसेतुभङ्गतो,
दृशोऽश्रुपूरः क्षितिमार्द्रयन् जवात्[३] ।। ५९ ।।

इतः समागादिह कोऽपि पक्षिराट्,
शुको जगाद क्षितिपाङ्गनां च ताम्[४] ।
'कुतोऽसि दुःखैकधनाऽधुना किल,
वदेप्सितं तद् विदधामि ते ध्रुवम्' ।। ६० ।।

---

१. 'यदा नवीना परिलभ्यते तदा-ऽधिका मनःप्रीतिकरी ततोऽपि च ।।' इति पाठा० ।। इतोऽग्रे- 'यथैव लोकः परिपूर्णचन्द्रिकां, न लोकते, किन्तु नवीनचन्द्रिकाम्। तथैव मां पश्यति नैव मत्प्रियो-ऽनुरागतः किन्तु नवां स प्रेमलाम् ।।' इति निष्कासितः श्लोको दृश्यते ।। २. '-न्नाऽहं, कुतो मां स्मरतीह न प्रियः ? । किं मेऽस्य दुश्चेष्टितमागतं स्मृता-वेवं वितर्कं व्यतनोद् गुणावली ।।' इति पाठा०।। ३. 'निरन्तरं साऽश्रुजलार्द्र[क्त]शाटिका, निशं व्यतीयाय पतिं विना तदा । मनोजबाणव्यथितान्तरा सती, प्रचण्ड-मार्तण्डितशीतरश्मिका ।।' इति पाठा० ।। इतोऽग्रे- 'पतिं विना मे न हि भेषजं परं, भवेन्ममैतद्विरहाग्निशामकम् । तदीयसौहार्दविधायिनीं हि मां, धिक्, तस्य मत्प्रेमलवोऽपि नेक्ष्यते ।।' इति निष्कासितः श्लोको दृश्यते ।। ४. 'ततः ।' इति पाठा० ।।

निशम्य तत्कीरवचो गुणावली,
'पतिः प्रवासी चिरतोऽस्ति दुर्विधेः ।
वियोगसन्तापमवापिता भृशं',
जगाद सा गद्गदभाषयाऽस्म्यहम्[१] ।। ६१ ।।

उवाच कीरो 'लिख पत्रमाशु मे,
प्रदेहि गच्छामि यतः पतिस्तव' ।
गुणावलीदत्तमथो दलं शुको,
ललौ ययौ साश्रुदृगञ्जनाञ्चितम्[२] ।। ६२ ।।

क्षणैः कियद्भिर्विहगो ययौ सक-
श्चलत्पतत्रो विमलापुरं रयात् ।
दलं च तेनाऽर्पितमाशु सोत्सुकः,
पपाठ चन्द्रोऽश्रुजलाविलाक्षरम्[३] ।। ६३ ।।

'वियोगतापानलतप्तमानसा,
लिलेख बाष्पाकुललोचना दलम् ।
धिगस्तु मां योऽसमहार्दहारिणीं
गुणावलीं प्राणसमामुपैक्षत[४] ।। ६४ ।।

इतोऽथ गन्तुं घटते ममाऽचिरात्,
प्रजा भवेयुश्च मया विनाऽऽकुलाः ।

---

१. '-जगाद मे प्राणपतिः प्रवासभाक् । समस्ति, तस्याऽस्मि वियोगतोऽधिकं, शुकाधुना दुःखशतेन पीडिता ।।' इति पाठा० ।। २. 'जगाद कीरः प्रविलिख्य मे दलं, प्रदेहि, दास्यामि च वल्लभाय ते । गुणावली द्राक् प्रविलिख्य शोभनं, ददौ दलं साऽश्रुककज्जलाङ्कितम् ।।' इति पाठा० ।। ३. 'शुकः समुड्डीय ययौ क्षणादसौ, गृहीतपत्रो विमलापुरं प्रति । ददौ स चन्द्राय दलं पपाठ त-न्न चाबुधद् बाष्पजलाक्षरेण सः ।।' इति पाठा० ।। ४. 'वियोगतोऽसौ न सुचारुलेखकं, लिलेख बाष्पाकुललोचना प्रिया । मया विना सा भृशमस्ति दुःखिता, गुणावली प्राणसमाऽधुना मम ।।' इति पाठा० ।।

पुरी च सा बाल्यत एव सेविता,
भवेच्च शून्येव महादिवर्जिता[१]' ।। ६५ ।।

समीक्ष्य किञ्चिद् विमनस्कमाशु तं,
पतिं जगाद क्षितिपेश्वरात्मजा ।
'कथं त्वदीयाननमद्य वल्लभ !,
प्रभातचन्द्रप्रतिमं विलोक्यते ।। ६६ ।।

स्वजन्मभूमिः स्मृतिमेति किं तव ?,
गुणावली वा स्मृतिमार्गमागता ? ।
अथाऽस्तु तामानय वल्लभ ! स्वसुः,
सुखं तयैष्यामि यतोऽहमीहितम्[२]' ।। ६७ ।।

जगाद चन्द्रो 'मम राज्यमस्ति यद्[३],
विना नृपं तत्सकलाः प्रजाः प्रिये[४] ! ।
समागमाय प्रददुर्दलं ततो,
व्रजाम्यहं निश्चितमेव शीघ्रतः[५]' ।। ६८ ।।

इति प्रियां चन्द्रनृपो निगद्य तां,
पुरो जगाम श्वशुरस्य तत्क्षणम्[६] ।
उवाच चा'ऽऽभानगरात् प्रजा मम,
दलं ददुस्तत्र समागमाय ताः[७] ।। ६९ ।।

---

१. 'अतोऽद्य गन्तुं घटते ममाऽपि हि, न राजते सा नगरी च मद्विना । तया समं मे शिशुभावतोऽधिकं, समस्ति सौहार्दमतोऽद्य याम्यहम् ।।' इति पाठा० ।। २. 'अथास्तु तामानय वल्लभाधुना-ऽप्यहं भविष्यामि हि तद्वशंवदा ।।' इति पाठा० ।। ३. 'हि' इति पाठा० ।। ४. 'मम ।' इति पाठा० ।। ५. 'वल्लभे !' इति पाठा० ।। ६. 'तत्क्षणे ।' इति पाठा० ।। ७. 'हि ।।' इति पाठा० ।।

भवेत् त्वदाज्ञा यदि, तत्र साम्प्रतं,
व्रजाम्यनिच्छन्नपि वः प्रियत्वतः[१]' ।
निशम्य चन्द्रस्य वचो महीपतिः,
शुचाकुलः साश्रुविलोचनोऽभवत् ।। ७० ।।

उवाच धैर्याद् 'यदिहैव सर्वदा,
वसेद् भवांश्चेत् सकलाः प्रजास्तदा ।
ध्रुवं च तद्राज्यमरिप्रहारतो,
विनाशमेष्यन्ति सुपालकं विना[२] ।। ७१ ।।

अतो गतिं ते खलु नाऽस्मि शक्तिमान्,
निरोद्धुमप्यल्पमहं विचारयन्[३]' ।
निगद्य चैवं मकरध्वजो नृपो,
बलादि सज्जं गमनाय चाऽकरोत् ।। ७२ ।।

ततः स चन्द्रो नृपतिः सुसज्जितं,
बलं जगौ 'याहि शनैः शनैः पुरः ।
[४]सभाजयित्वेष्टजनानहं पुनः,
पुरं प्रतिष्ठेऽचिरमेव सोत्सुकः[५]' ।। ७३ ।।

इतः स्वपुत्रीं मकरध्वजो नृपो,
जगाद सुस्नेहनिरुद्धकण्ठकः ।
'ममाऽथवा मातुरसि त्वमेकिका-
ऽवलम्बभूतेति तिरोहितं न ते[६] ।। ७४ ।।

---

१. 'व्रजामि भुक्त्वा सुखमत्र पुष्कलम् ।' इति पाठा० ।। २. 'प्रमत्तमातङ्गवरं यथा न हि, वशं विधातुं प्रभवेज्जनः क्वचित् । तथा मम त्वं वशगोऽसि भूपते!, न राज्यसाम्राज्यविभूषणादिभिः ।।' इति पाठा० ।। ३. 'ततो व्रज' इति पाठा० ।। ४. 'सत्कारयित्वा' इति टि० ।। ५. '-बलाद्युपेतं निजगाद तत्प्रति (बलं समासाद्य जगाद तत्प्रति-पाठा०) । चलाधुना त्वं मयका निजं पुरं, निशम्य तद् गन्तुमभूत् समुत्सुकम् ।।' इति पाठा० ।। ६. '-समाह्वयत् स्वस्य पुरः सदारकः । उवाच हे पुत्रि ! समस्तसद्गुणा-ऽऽकरोऽसि मत्प्रेमधनस्य वल्लरी ।।' इति पाठा० ।।

इहैव तस्माद् वस यावदावयोः,<br>
गुणोज्ज्वलां त्वां नयनस्य तारकाम् ।<br>
व्रजन्तु कालास्तनयेऽनुपश्यतोः,<br>
सुखं सदाऽन्ते वयसि प्रतिष्ठयोः[१]' ।। ७५ ।।

जगाद 'कान्तिर्वपुरेव सैत्यनु,<br>
न जातु दृष्टा क्वचनाऽपि ते पृथक् ।<br>
विशेषतः प्रोक्तमथो सुतास्थिति-<br>
गृहे स्वभर्त्तुस्त्रिदिवौकसां पुनः[२] ।। ७६ ।।

पुनर्न मोहं विदधामि, न प्रियं,<br>
त्यजामि पूर्वानुभवात् सचेतना[३]' ।<br>
निशम्य तन्नैजसुतावचस्तदा,<br>
विचारयमासतुराशु दम्पती ।। ७७ ।।

'धनं सुता स्यात्[४] परकीयमित्यदः,<br>
सुनिश्चितं, सा न पितुर्गृहे क्वचित् ।<br>
वसेत् समृद्धेऽपि कदाऽपि नो रसात्,<br>
न मन्यते तत्स्वमियं यतः किल[५] ।। ७८ ।।

विचारिते तच्च विभाति युक्तिमत्,<br>
स्वभर्त्तुरर्धाङ्गसमा हि सा स्मृता ।

---

१. 'अये बहु व्याहृतमद्य ते पति-र्न मन्यतेऽसौ गमनाय तत्परः । तवाऽस्ति किं सम्प्रति हृद्गतं वद, व्रजिष्यसि स्थास्यसि वाऽत्र पुत्रिके ! ।।' इति पाठा० ।। २. 'जगाद सा तिष्ठति यत्र विग्रह-श्छायाऽपि तस्यानुसमेति तत्र हि । इति प्रमाणेन पितः ! सदा निज-प्रियानुगा स्यामहमप्यदीनहृत् ।।' इति पाठा० ।। ३. 'त्यजामि तात ! क्वचिदप्यहं प्रभो ! ।' इति पाठा० ।। ४. 'धनं हि कन्या' इति पाठा०। ५. 'कदाऽपि रक्ता भवति प्रकामतः, पत्युर्गृहे शून्यतरेऽपि रज्यते ।।' इति पाठा० ।।

समर्थनायेव तदेतदञ्जसा,
शिवाशिवावेकशरीरतां गतौ[१]' ।। ७९ ।।

इति प्रकामं प्रविचार्य भूपति-
र्महोत्तमं वाहनमुत्तमाः सखीः ।
अनेकदासीर्बहुवस्त्रभूषणं,
सुगन्धि वस्तु प्रददौ स यौतुके[२] ।। ८० ।।

इतः समागात् स च[३] चन्द्रभूपतिः,
प्रवेगमारुह्य हयं तदन्तिकम्[४] ।
सुतां समुद्दिश्य जगाद तं नृपः,
सगद्गदं "ते तनयाऽर्प्यते मया[५] ।। ८१ ।।

ममाऽऽत्मजेयं शिशुरस्ति तेन सा,
करोति कार्यं स्वमनोगतं सदा ।
अतस्तदीयो यदि जायते त्वयि,
कदाऽपि मन्तुः स न गण्यतां[६] त्वया ।। ८२ ।।

मनो मदीयं सहते न जातुचिद्,
वियोगदुःखं दुहितुस्तथापि सा ।
स्वभर्तृगेहं व्रजतीति मे महान्,
प्रमोद इत्येव विसृज्यते मया ।। ८३ ।।

मदीयराज्यं तु तवैव निश्चित-
मिति प्रतीहि त्वमपूर्वभाग्यभाक् ।

१. 'कदाऽपि माता तनयां न सूयतां, सदैव सा भर्तृगृहस्य मङ्गलम् । विभावयत्याहितभर्तृरागतः, पितुर्विरागं विदधाति निश्चितम् ।।' इति पाठा० ।। २. 'महीपतिः ।।' इति पाठा० ।। ३. 'हि' इति पाठा० ।। ४. 'प्रधानमारुह्य हयं च तत्सभाम् ।' इति पाठा० ।। ५. '-ऽधुना स्वकीया तनयाऽर्प्यते हि ते ।।' इति पाठा० ।। ६. '-हि मर्ष्यतां-' इति पाठा० ।।

स्मृतिं नयेर्मामि''ति साश्रुलोचनो,[१]
जगाद राजा मकरध्वजः पुनः[२] ।। ८४ ।।

उवाच माता तनयां निजां प्रति,
'भव स्वभर्तुर्भृशवल्लभा सदा ।
सदैव पत्युर्वचने स्थिरा पुना[३]-
रुषं विदध्या विहितागसेऽपि नो[४] ।। ८५ ।।

अहर्निशं धर्मपरा सखीजने,
चरेश्च सस्नेहमुदारवर्तनम्[५] ।
कदाऽपि केनाऽपि समं न शत्रुतां,
करिष्यसे साधुजनैर्विगर्हिताम्' ।। ८६ ।।

इति प्रकामं निदिदेश पुत्रिकां,
न्यसिक्त साऽप्यश्रुजलैर्नृपाङ्गजा ।
समाययुर्बालसखीजनास्तदा-
ऽरुदंश्च तां वीक्ष्य नृपालकन्यकाम्[६] ।। ८७ ।।

परस्परं ता[७] मिलिताः पृथक् पृथग्,
सस्नेहशोकाविलमानसास्तया[८],

---

१. '-साश्रुपूर्वकं लोचनो' इति पाठा० ।। २. '-मकरध्वजोऽपि तम्' इति पाठा० ।। ३. 'सती' इति पाठा० ।। ४. 'रुषं कदाचिन्न विधास्यसे सुते ! ।।' इति पाठा० ।। ५. 'दानं विधेयं समभावतो नरे ।' इति पाठा० ।। ६. इतोऽग्रे- 'सखीजनानां करुणस्वरैः परै-(स्तदा-पाठा०) र्न लेभिरे देवगणा अपि स्फुटम् । स्थिरत्वमूर्ध्वे गगनाङ्गणे तदा (-ऽभवद्-पाठा०), नभश्चराद्या निखिलाश्च विस्मिताः ।। (विद्याधराणां गमनं न शोकतः ।।)' इति निष्कासितः श्लोको दृश्यते ।। ७. 'ते' इति पाठा० ।। ८. 'जनास्तया सार्धमतीवदुःखिताः ।' इति पाठा० ।।

श्वश्रूस्तदा पुण्ड्रमथाऽस्य[१] कौङ्कुमं,
चक्रे ललाटे किल चन्द्रभूपतेः ।। ८८ ।।

सुचारु दूर्वाक्षतमाददे ततः,
करे समादाय फलं स चन्द्रः ।
तया समं मङ्गलतूर्यनिःस्वनै-,
श्चचाल चाऽऽभानगरं प्रसन्नहृत्[२] ।। ८९ ।।

चतुष्पथं तेन सहेत्य भूपतिः,
सनागरश्चन्द्रनृपं प्रतुष्टुवे[३] ।
पुरस्त्रियो मङ्गलगीतिनिःस्वनं,
प्रचक्रिरे वाद्यमवादयन् परे ।। ९० ।।

ततश्च चन्द्रं मकरध्वजो नृपो,
पुरस्सरं[४] प्रीतिभरान्वितोऽनुयन् ।
जगाम शत्रुञ्जयमूलमाग्रहात्,
ननाम तीर्थोत्तममादराच्च सः[५] ।। ९१ ।।

विधाय यात्रां गिरिनायकस्य स,
आपृछ्य चन्द्रं तनयां च विह्वलः ।
वियोगतः स्वं पुरमेष भूपतिः[६],
परावृतच्छ्रीमकरध्वजस्ततः ।। ९२ ।।

नटाधिराजः पथि नाट्यकौशलं,
प्रदर्शयंश्चन्द्रमनोविनोदनम् ।

---

१. 'पुण्ड्रमथो हि' इति पाठा० ।। २. 'प्रति प्रभुः ।।' इति पाठा० ।। ३. 'प्रशंसति ।' इति पाठा० ।। ४. 'नरेश्वरं' इति पाठा० ।। ५. ' जगाम शत्रुञ्जयमूलमत्र सो-ऽनमन्महातीर्थमुदारभक्तिकः ।।' इति पाठा० ।। ६. '-ऽतिगाढमालिङ्ग्य नृपालनायकम् । अमुं, स्वकीयं पुर एष भूपतिः,' इति पाठा० ।।

यशो जगौ तस्य जगद्विलक्षणं,
सुखं तदध्वानमलङ्घयन्नृपः[1] ।। १३ ।।

पथिस्थसामन्तनृपान् पदे पदे,
समानमानीतबहूपदान् दृशा ।
प्रसन्नया प्रेक्षणतः कृतार्थयन्,
क्रमेण सोऽगात् किल पोतनं पुरम्[2] ।। १४ ।।

सरोवरं कञ्चिदुपेत्य तद्बलं,
निवासमाधादधिपानुमोदितम् ।
तदैव लीलाधर एत्य च प्रिया-,
मुदन्तमेतं कथयन्नमोदयत्[3] ।। १५ ।।

लीलावती साऽऽगमनं च मन्त्रिसू-
र्निशम्य चन्द्रस्य महाग्रहादरैः[4] ।
समानयत् स्वं गृहमेनमुत्सवात्,
व्यधाच्च सत्कारमलं सभर्तृका[5] ।। १६ ।।

असौ च तस्यै[6] भगिनीवदार्पय-
दनेकरत्नाञ्चितभूषणादिकम् ।
इतश्च नाके मघवा स्वसंसदि,
चन्द्रं नितान्तं प्रशशंस भूपतिम् ।। १७ ।।

---

१. 'प्रदर्शयंश्चन्द्रनृपाय सन्ततम् । यशस्तदीयं प्रजगावहर्निशं, क्रमेण मार्गं समलङ्घयन्नृपः ।।' इति पाठा० ।। २. 'अनेकभूपान् पथि शिक्षयन्नत, उपायनं चन्द्रनृपोऽग्रहीद् बहु । भटाननेकान् नृपकन्यका अपि, विवाह्य चाऽऽगात् किल पोतनं पुरम् ।।' इति पाठा० ।। ३. 'मध्यावसच्चन्द्रनृपानुमोदितम् । तदैव लीलाधर एत्य पर्यटन्, प्रियां समानन्दयति स्म सद्मनि ।।' इति पाठा० ।। ४. 'बहुप्रमोदतः।' इति पाठा०।। ५. 'समानयत् स्वं गृहमस्य सत्कृतिं, व्यधात् स्वसेवातितरां सभर्तृका।।' इति पाठा० ।। ६. 'असावपि स्वं' इति पाठा० ।।

'स्वदारतोषी न हि चन्द्रवज्जनः[१],
समस्ति लोकत्रितयेऽपि कोऽपि[२] ।
सच्छीलधर्मात् कृकवाकुरूपतो,
मनुष्यरूपं यदवाप भूपतिः ।। ९८ ।।

न यत्नवानप्यमरोऽपि कोऽपि तत्-
सुशीलमालिन्यमुपाहितुं क्षमः[३]' ।
निशम्य वाचं नमुचिद्विषस्ततः,
सुरोऽथ कश्चित् प्रययौ परीक्षितुम् ।। ९९ ।।

समागतः[४] पोतननामकं पुरं,
विद्याधरीरूपमसौ प्रपन्नवान् ।
अनन्यतुल्याकृति घोरकानने,[५]
गतेऽर्द्धरात्रे विललाप दुष्टधीः[६] ।। १०० ।।

निशम्य तस्याः करुणस्वरं ततो,
व्यचिन्तयच्चन्द्रमहीपतिः किल ।
'निशागमे घोरतमस्ततौ कुतो,
मुहुश्च काऽऽर्तस्वरमत्र रोदिति[७]' ।। १०१ ।।

इति स्वचित्ते[८] परिचिन्त्य भूपतिः,
करेऽथ खड्गं प्रतिगृह्य चाऽचलत् ।

---

१. 'चन्द्रभूपभः' इति पाठा० ।। २. 'समस्ति कोऽपीह जगत्त्रयेऽधुना ।' इति पाठा० ।। ३. 'न कोऽपि देवोऽपि सुशीलमस्य हि, भङ्क्तुं समर्थो भुवने कदाचन।' इति पाठा० ।। ४. 'समागमत्' इति पाठा० ।। ५. 'अनन्यतुल्यं च वपुर्महावने' इति पाठा० ।। ६. 'धारयन्' इति पाठा० ।। ७. 'भृशं च का रोदिति चार्तनादिनी ? ।।' इति पाठा० ।। ८. 'प्रकामं' इति पाठा० ।।

न सज्जनो दीनजनस्य वेदना[१]-
मवेत्य[२] तूष्णीं हि कदाऽपि तिष्ठति ।। १०२ ।।

ततोऽमुनोपेत्य दृशाऽतिसुन्दरी,
शिरीषपुष्पोपमकोमलाङ्गिका[३] ।
विभूषणौघाञ्चितचारुविग्रहा,
दिवश्च्युता विद्युदिव स्फुरत्प्रभा ।। १०३ ।।

'कथं त्वमेवं विजने निशागमे,
प्ररोदिषि ब्रूहि च दुःखकारणम् ।
असंशयं त्वां परिमोचयाम्यहं,'
इतीव पृष्टा च जगौ मृदुस्वरम्[४] ।। १०४ ।।

शृणु त्वमेतद् वचनं "तनूभवा,
नृपाऽस्मि विद्याधरचक्रवर्तिनः ।
नहि प्रकाश्यं मम वृत्तमस्ति तत्,
तथाऽपि तेऽग्रे कथयामि भूपते ! ।। १०५ ।।

पतिर्मदीयोऽस्ति महारुषान्वितो,
वनेऽत्र मामद्य विहाय सोऽगमत् ।
न तादृशं कोऽपि करोतु यादृशं,
व्यधत्त रोषान्मम दुर्दशामसौ ।। १०६ ।।

निशम्य मद्दुःखवचो भवानिह,
समागतो, मामुररीकुरु द्रुतम् ।

---

१. 'रोदनं' इति पाठा० ।। २. 'निशम्य' इति पाठा० ।। ३. 'शिखेव दीपस्य महोज्ज्वलैक्ष्यत ।' इति पाठा० ।। ४. 'ततोऽवदत् सा मधुरैः स्वैरैरमुम् ।।' इति पाठा० ।।

यदि त्वदीयान्वयधर्मशीलता,
तदा प्रपन्नां नहि मां त्यजाऽधुना ।। १०७ ।।

कलत्रभावो मयि संनिवेश्यतां[१],
स्वपादसेवानिरता विधीयताम्[२] ।
विपत्पयोधौ स्वकभाग्यदोषतो,
विलीयमाना भवताऽनुगृह्यताम्[३]'' ।। १०८ ।।

इति स्त्रिया वाक्यमसौ निशम्य तां[४],
जगाद चन्द्रो ''वद नेदृशं पुनः ।
परस्य पत्नीं न कदाऽप्यहं भजे,
व्रतं ममेदं दृढमस्ति विद्धि तत्[५] ।। १०९ ।।

द्विकोऽथवा श्वैव विलेढि मोदतः,
परेण भुक्तं न च मानभृत् क्वचित्[६] ।
कथं सुरम्याऽऽननतोऽतिदुर्वचं,
वचो ब्रवीषि प्रमदे ! प्रमुग्धवत् ।। ११० ।।

यदीच्छसि त्वं निजनाथसङ्गमं,
तदा करिष्यामि तदर्थमुद्यमम्[७] ।
स्वसः ! कदाचिन्न परस्त्रियं बुधा,
मुधाऽभिकाङ्क्षन्ति विगर्हितं हि तत्'' ।। १११ ।।

उवाच साऽथो[८] 'यदि नो ग्रहीष्यसि,
विहाय लज्जां भृशमर्थनापराम् ।

---

१. 'संविधाय हि' इति पाठा० ।। २. '-निरतां विधेहि माम् ।' इति पाठा० ।। ३. 'न सज्जनो जातु जनस्य याचन-मनाथदीनस्य करोति निष्फलम् ।।' इति पाठा० ।। ४. 'हि' इति पाठा० ।। ५. ' व्रतं ममेदं परिविद्धि सुन्दरि ! ।।' इति पाठा० ।। ६. 'उच्छिष्टमन्यस्य परं न सज्जनः ।' इति पाठा० ।। ७. 'तदर्थसाहसम्' इति पाठा० ।। ८. 'चन्द्रं' इति पाठा० ।।

सद्यस्तदाऽहं विजहामि जीवितं,
भवेद् ध्रुवं स्त्रीवधपातकं तव[१]' ।। ११२ ।।

निशम्य तद्वाक्यमसौ जगाद तां,
"सुशीलभङ्गे वनितावधात् परम् ।
न जायते दुष्कृतमित्यतो न हि,
कदाऽपि मन्येऽहमिदं वचस्तव ।। ११३ ।।

जानामि वृत्तं दशकण्ठरक्षस-
स्तथा च पद्मोत्तरभूपतेरहम्[२] ।
दिवस्पतेर्गौतमयोषितं प्रति,
रतिर्विनाशाय बभूव सुन्दरि ! ।। ११४ ।।

परस्य दारान् परिगृह्य कोऽपि नो,
अवाप सौख्यं भुवने मनागपि ।
अतो वधात् ते न तथा बिभेम्यहं,
स्वशीलभङ्गादबले ! यथा भृशम्[३]" ।। ११५ ।।

सुरोऽथ चन्द्रस्य निशम्य तद्वचो,
विहाय देव्याकृतिमित्युवाच तम् ।
'अतीव धन्योऽसि सुशीलवानसि,
सुरेश्वरश्लाघ्यगुणोऽसि भूपते ! ।। ११६ ।।

---

१. 'कथं तदा क्षत्रियजातिरस्ति ते । पुरस्तवाऽहं ('पुरस्तदाऽहं' पाठा०) विजहामि जीवितं, भवेन्निदानं वधपातकस्य ते ।।' इति पाठा० ।। २. 'स्तथा च पद्मावनिपस्य कृत्स्नशः ।' इति पाठा० ।। ३. 'अतो वधात् ते न बिभेमि किन्त्वहं, स्वशीलभङ्गात् प्रबिभेमि साम्प्रतम् ।।' इति पाठा० ।।

मायामतारीरितरैर्ममाञ्जसा,
विलङ्घिता या न कदाऽपि सद्व्रत ![1] ।
तवाऽस्ति धैर्यं खलु मेरुतोऽधिकं,
स्थिरं, यथेन्द्रेण समीरितं पुरा[2]' ।। ११७ ।।

इति प्रशंसां [3]सविधाय भूपतौ,
ववर्ष पुष्पं परिहृष्टमानसः ।
ययौ नमस्कृत्य दिवं च[4] निर्जरो,
नृपोऽपि वासं समवाप तत्क्षणे ।। ११८ ।।

लीलावतीं प्रातरुपेत्य तन्मुखा-
न्निदेशमादाय चलन् स भूपतिः[5] ।
पथिस्थमूपैरुपढौकितोपदैः,
स्वकीयकन्याग्रहणाय तोषितः[6] ।। ११९ ।।

नृपाङ्गजासप्तशतीभिरिद्धधीः,
पाणिगृहीतीभिरसौ व्रजन् क्रमात्[7] ।
अतीव चाऽऽडम्बरपूर्वकं ततः,
पुरं स्वकीयं समलोकयन् मुदा[8] ।। १२० ।।

गुणावली चन्द्रधराधिपागमं,
निशम्य हर्षात् सचिवाय सत्वरम् ।

---

१. 'मदीयमायामिति विद्धि भूधव !, यतस्त्वयाऽरक्षि निजं व्रतं ततः ।' इति पाठा० ।। २. 'तथा' इति पाठा० ।। ३. 'प्रविधाय' इति पाठा० ।। ४. 'स' इति पाठा० ।। ५. '-न्निदेशमादाय चचाल भूपतिः' इति पाठा० ।। ६. 'पथि प्रभूतान्नृपतीन् सुशिक्षय-न्नुपाददे प्राभृतमित्यतो बहु ।।' इति पाठा० ।। ७. 'नृपाङ्गजासप्तशतीं महीश्वरस्तदोपयेमे पथि हृष्टमानसः ।' इति पाठा० ।। ८. 'पुरं स्वकीयं परिपश्यति स्म सः ।।' इति पाठा० ।।

समं प्रजाभिर्निदिदेश तत्क्षणं[१],
'महोत्सवैराशु[२] समानय प्रियम्' ।। १२१ ।।

गुणावलीवाक्यमिदं निशम्य स,
जगाम मन्त्री जनवाद्यसङ्कुलः ।
उपेत्य तं भक्तिभरैः प्रणम्य चा[३]-
ऽवाप्तप्रहर्षोऽनयदाशु[४] भूपतिम् ।। १२२ ।।

अनेकनारीनरसङ्कुलं तदा,
नृपोऽपि मार्गं प्रययौ स सत्कृतः[५] ।
स्त्रवन्मदैर्दन्तिकुलैर्हयै रथैः,
सुसज्जितैश्चारुमपूर्वतोरणैः[६] ।। १२३ ।।

गवाक्षजाले समवस्थिताः स्त्रियो,
दिवश्च्युता देव्य इवाऽऽबभुस्तदा ।
विमानगा नेत्रनिमेषवर्जिताः,
नृपेक्षणे चित्रविभूषणोज्ज्वलाः[७] ।। १२४ ।।

जनाः समूचुर्नृप ! चातका इव,
वयं त्वदालोकननीरतर्षिताः[८] ।
तदद्य तृप्ता घनमण्डलायितं,
भवन्तमालोक्य कृतार्थतां गताः ।। १२५ ।।

---

१. 'वाद्यकैः' इति पाठान्त० ।। २. 'सह प्रधानेन-' इति पाठा० ।। ३. 'स' इति पाठा० ।। ४. 'महोत्सवैरानयदाशु' इति पाठा० ।। ५. '-प्रविवेश सत्कृतः' इति पाठा० ।। ६. 'स्त्रवन्मदा मत्तगजा हयास्तथा, नृपस्य पार्श्वेऽतितरां विरेजिरे।।' इति पाठा० ।। ७. 'नृपालसंदर्शनजातकौतुका, विचित्रभूषोज्ज्वलचारु-विग्रहाः।।' इति पाठा० ।। ८. '-लोकनभूरितर्षिताः ।' इति पाठा० ।।

स्रवन्मदोद्दन्[1]तगजोपरिस्थितो,
ददौ भृशं [2]दानमसौ प्रहर्षितः ।
न के तदा याचकभावमत्यजन्,
सुधां समास्वादयतः कुतो रुजा[3] ।। १२६ ।।

इति प्रभूतोत्सवपूर्वकं तदा,
सभामगाच्चन्द्रनृपो जनाकुलाम् ।
नृपासनं शोभितवानिवोदया-
ऽचलं रविर्दीप्तमहाः प्रजाप्रियः[4] ।। १२७ ।।

ततः स सत्कृत्य सभासदो जनान्,
प्रधानवर्गं [5]च विसृज्य भूपतिः ।
जगाम चाऽन्तःपुरमाशु सोत्सुकां[6],
वियोगदीनास्यगुणावलीं स्मरन्[7] ।। १२८ ।।

ननाम सा स्नेहसमन्विता नृपं,
समालिलिङ्गाऽपि स तां गुणावलीम् ।
अनन्तरं सप्तशतीं स्वयोषितां,
न्यवासयच्चारुतरे च सद्मनि ।। १२९ ।।

गुणावली तं परिभोज्य षड्रसं,
नृपं सपत्नीजनसन्ततेस्ततः ।
अतीवसत्कारमथाऽकरोन्न हि,
व्यधाच्च[8] सापत्यमसौ हृदि स्वके ।। १३० ।।

---

१. '-न्मत्त-' इति पाठा० ।। २. 'वित्तमसौ' इति पाठा० ।। ३. 'सुधाकरे वर्षति किं रुजाव्यथा ।।' इति पाठा० ।। ४. 'नृपासनं शोभितवान् यथा रवि-रलङ्करोति प्रति नैषधाचलम् ।।' इति पाठा० ।। ५. 'प्रविसृज्य' इति पाठा० ।। ६. 'तं नृपं' इति पाठा० ।। ७. 'गुणावली प्रेमपुरस्सरं प्रियम् ।।' इति पाठा० ।। ८. 'दधाति' इति पाठा० ।।

पयोऽम्बुनेवाऽथ झषोऽम्भसेव वा,
निजाङ्गनौघेन स सौहृदं व्यधात् ।
परस्परं सप्तशती च योषितां[१],
विरोधमाधुर्नहि जातुचिद्धृदा ।। १३१ ।।

देहेषु भिन्नेष्वपि राजयोषितः,
प्रीत्यैकचित्ता अभवन्न ताः पृथक् ।
अनन्यतुल्यं सुखमासु सन्नृपो[२]-
ऽन्वभूत् स चन्द्रः सुरदुर्लभं तदा ।। १३२ ।।

गुणावलीं तासु नृपो व्यधात् प्रियां,
[३]स्वपट्टराज्ञीमवलोक्य ताः स्त्रियः ।
अमन्दमानन्दमवापुरञ्जसा,
परोदये द्वेषमुपैति नोत्तमः[४] ।। १३३ ।।

अथैकदा चन्द्रनृपं गुणावली,
कृताञ्जलिः सानुनयं न्यवेदयत् ।
'त्वया विना षोडशहायनीं प्रभो !,
मयाऽन्वभाव्यद्भुतदुःखसन्ततिः ।। १३४ ।।

कृतं च यद् वीरमतीकुसङ्गतो,
विगर्हितं तत् क्षमतां प्रभो ! मम ।'
निशम्य तद्वाक्यमुवाच भूपति-
'स्त्वमेव मत्प्रेममहास्पदं प्रिये ! ।। १३५ ।।

गृहं च राज्यं सकलं वशे तव,
करोमि चाऽहं च मतं यदेव ते ।

१. 'वधूजना' इति पाठा० ।। २. 'परं हि संख्यासु तथाऽस्ति कामिनी-मनस्सु, सैकैव बभूव नो पृथक् । अनन्यतुल्यं च सुखं स्त्रियां नृपो-' इति पाठा० ।। ३. 'प्रधान-' इति पाठा० ।। ४. 'परोन्नतौ विस्मयते न सज्जनः ।।' इति पाठा० ।।

न वाऽपि संवेशगतः प्रियेऽण्वपि,
विरुद्धबुद्धिं त्वयि यामि जातुचित्[१]' ।। १३६ ।।

इति स्वपत्युर्वचनं निशम्य सा,
बहु प्रहर्षं लभते स्म मानसे ।
नृपस्य सा सप्तशती च योषितां,
तथैव जाता परमा प्रिया स्वतः[२] ।। १३७ ।।

कदाचिदानन्दभरेण मण्डनं,
करोति सङ्गीतमथाऽक्षखेलनम् ।
अनेककाव्याक्षरयोजनां तथा[३],
नृपस्य मोदाय वधूजनस्तदा ।। १३८ ।।

नटाधिराजाय[४] महोपकारिता-
मविस्मरंस्तस्य[५] नृपो ददौ बहु ।
विभूषणं ग्रामशतं तथेतरद्[६],
यदिष्टमुच्चैर्गुणवर्गमुद्गिरन्[७] ।। १३९ ।।

व्यधापयच्चैत्यगृहाण्यनेकशः,
समुद्दधाराऽथ च जीर्णमन्दिरम् ।
ददौ च दानं बहुशोऽतिदुःखिने,
यशोभिराशा धवलीचकार सः ।। १४० ।।

---

१. 'गृहस्य सर्वं तव कार्यसञ्चयं, करेऽस्ति नूनं मम सर्वथा प्रिये ! । प्रधानभूताऽसि यदेव वाञ्छितं, भवेत् तवाऽहं प्रकरोमि तत् खलु ।।' इति पाठा० ।। २. 'नृपस्य ताः सप्तशती प्रिया अपि, तथैव जाताः परमाः प्रियाः स्वतः ।।' इति पाठा० ।। ३. '-नाशतं' इति पाठा० ।। ४. '-राजस्य' इति पाठा० ।। ५. '-श्चन्द्र-' इति पाठा० ।। ६. 'नटाय च' इति पाठा० ।। ७. 'प्रमोदमापच्च नटेश्वरस्तदा ।।' इति पाठा० ।।

दिवश्च्युतः कोऽप्यमरः समागमद्,
गुणावलीकुक्षिमतीवपुण्यवान् ।
दिनेऽथ पूर्णे[१] सुषुवे मनोहरं,
कुमारकल्पं तनयं नृपाङ्गना ।। १४१ ।।

कुमारजन्माक्षर[२]शंसकाय स,
तथा व्यतारीन्नृपतिर्धनं तदा ।
यथा स लक्ष्मीश्वर एव जातवान्,
अयोमणिः स्पर्शमणेर्हि जायते[३] ।। १४२ ।।

दरिद्रवत् प्राप्य मणिं सुतं शुभं,
मुमोद चन्द्रः सहितः प्रियागणैः ।
शुभे मुहूर्त्ते सुविचार्य शुद्धधीः,
दधौ समाख्यां 'गुणशेखरे'ति च[४] ।। १४३ ।।

वलक्षणपक्षस्थसुधांशुवत्क्रमात्[५],
दिने दिने वृद्धिमवाप नन्दनः ।
पितुर्मुदं पोषयति स्म सर्वदा,
मनोभवाभः शिशुलीलया लसन्[६] ।। १४४ ।।

यथा जयन्तं सुषुवे पुलोमजा,
तथैव पुत्री मकरध्वजस्य च ।

---

१. 'दिने प्रपूर्णे' इति पाठा० ।। २. '-जन्मोत्सव-' इति पाठा० ।। ३. 'बभूव लक्ष्मीश्वर एव नो पुन-रकिञ्चनत्वं भवति स्म तज्जने ।।' इति पाठा० ।। ४. 'यथा दरिद्रः समवाप्य मोदते, धनं, तथाऽसौ नृपतिः सुतोद्भवम् । मुदं प्रलभ्य प्रविचार्य भं ('नक्षत्रम्' इति टि०) तदा, दधौ समाख्यां 'गुणशेखरे'ति हि ।।' इति पाठा० ।। ५. '-शुसन्निभो' इति पाठा० ।। ६. 'मनोभवाभोऽमरपादपायितः ।।' इति पाठा० ।।

अतीवसौन्दर्यजुषं प्रभाविनं[१],
सुतं स्म सूते 'मणिशेखारा'भिधम् ।। १४५ ।।

समानभावं तनयद्वये पिता,
चकार शम्भुस्तनयद्वये यथा ।
निविश्य चोत्सङ्गतले नृपस्य ता-
वुभौ रवीन्दूपमितौ विरेजतुः[२] ।। १४६ ।।

अतीत्य तौ शैशवमेवमञ्जसा,
किशोरभावं ययतुर्गुणोज्ज्वलौ ।
अमात्यपुत्रैः पुरबालकैस्तथा,
समन्वितौ क्रीडनकादि चक्रतुः[३] ।। १४७ ।।

नृपाङ्गजौ तौ पठितुं गतौ पुनः[४],
विशिष्टबुद्धी गुरुसन्निधौ रसात्[५] ।
अनल्पकालेन कलाकलापकं,
शिशिक्षतुर्निर्मलबुद्धियोगतः ।। १४८ ।।

इतः समागत्य नृपं न्यवेदय-
दुद्यानपस्त्वत्कुसुमावनौ मुनिः ।
समागमत् सुव्रतनामतीर्थपो,'
निशम्य राजा मुमुदे भृशं ततः ।। १४९ ।।

ददौ च तस्मै बहु पारितोषिकं,
न्यदिक्षदेतर्हि नृपोऽथ मन्त्रिणम् ।

---

१. 'मनोरमं' इति पाठा० ।। २. '-वुभौ रमेते स्म सुचारु नन्दनौ ।।' इति पाठा० ।। ३. 'अनुक्रमाच्छैशव-माविहाय तौ, किशोरभावं परिलभ्य सर्वदा । गजाश्वपृष्ठे परिरुह्य जग्मतु-रितस्ततः क्रीडनलालसावुभौ ।।' इति पाठा० ।। ४. 'च प्रेषितौ' इति पाठा० ।। ५. 'भृशम्' इति पाठा० ।।

रथाश्वपत्तीन् गजसैन्यसारथीन्,
सुसज्जयैष्यामि जिनेश्वराग्रतः' ।। १५० ।।

निशम्य सज्जं विदधे तदैव स,
जगाम राजा सपरिच्छदो मुदा[१] ।
अतीवभाग्यान्मुनिवर्यसङ्गमं,
प्रलिप्सुरौदार्यगुणोऽतिभक्तिमान्[२] ।। १५१ ।।

उपेत्य तीर्थङ्करपादशोभितं,
पदं मुनीशं विधिवन्ननाम सः ।
भवाम्बुधौ नौसदृशीं सुदेशनां,
नृपस्तदीयामशृणोत् समाहितः ।। १५२ ।।

निशम्य कर्णामृतमस्य सद्वचो,
नृपो जिनं प्राह कृताञ्जलिस्ततः ।
"प्रभो ! विमाता किमु कुक्कुटं व्यधाद् ?,
रुषान्विता मामपराधवर्जितम् ।। १५३ ।।

नटेन च प्रेमलयाऽपि मेलनं,
मनुष्यभावो गिरिराजसङ्गमात्[३] ।
समाचरद्धिंसकमन्त्रिराट् छलं[४],
कथं[५] च कुष्ठी किल सिंहलात्मजः ? ।। १५४ ।।

गुणावलीसङ्गतिरप्यभूच्च मे,
समस्तमेतद् वद केन कर्मणा ।

---

१. 'जिनम् ।' इति पाठा० ।। २. 'प्रणम्य तस्थौ स्वयथोचितासने, जिनो जगादाऽथ च धर्मदेशनाम् ।।' इति पाठा० ।। ३. 'मनुष्यरूपं गिरिराज सङ्गमाद्, नट्याऽटनं प्रेमलिकोपलम्भनम् (-दवाप्य लब्ध्वा मकरध्वजात्मजाम्-पाठा०)' इति पाठा० ।। ४. 'यथा' इति पाठा० ।। ५. 'छलं' इति पाठा० ।।

जगत्यमुष्मिंस्तव नाऽस्ति किञ्चन,
प्रभोऽपरिज्ञातमतोऽर्थयेऽञ्जसा[१]'' ।। १५५ ।। त्रिभिः कुलकम्

निशम्य तद्वाक्यमुवाच सुव्रतः[२] ( १५७-२०५ ),
''शृण्वस्ति वैदर्भ इति प्रथागतः ।
सुरम्यदेशस्तिलकापुरी पुरी,
बभूव तस्यां मदनभ्रमो नृपः[३] ।। १५६ ।।

प्रियाऽभवच्छ्रीकमलाभिधा यका,
विशिष्टशीला च तयोः सुता तथा[४] ।
बभूव नाम्ना तिलकादिमञ्जरी,
स्वरूपसंलज्जितकामवल्लभा ।। १५७ ।।

साऽभूच्च[५] बाल्याज्जिनधर्मखण्डिनी,
मिथ्यामतिर्विष्णुमतावलम्बिनी ।
अभक्ष्यभक्ष्यादिविवेकवर्जिता,
परापकर्त्री[६] विषवल्लिकोपमा ।। १५८ ।।

सुबुद्धिनामा सचिवोऽस्य तत्सुता-
ऽभवत् सुरूपा किल रूपमालिका[७] ।
अनारतं धर्मपरा तयोरभूद्,
विशेषसौहार्दमनन्यसन्निभम् ।। १५९ ।।

विनिश्चयं ते कुरुतः स्म कन्यके,
'यदेक एव स्वपतिर्वरिष्यते[८]' ।

---

१. '-ब्रवीतु माम्' इति पाठा० ।। २. 'तीर्थपः' इति पाठा० ।। ३. 'विभाति, राजा मदनभ्रमोऽभवत् ।।' इति पाठा० ।। ४. 'प्रियाऽभवच्छ्रीकमलेति तस्य हि, रूपेऽनुरूपा चपलेव तत्सुता ।' इति पाठा० ।। ५. 'धर्मेऽपि' इति पाठा० ।। ६. 'मद्यादिसक्ता' इति पाठा० ।। ७. 'रूपमती' इति टि० ।। ८. 'एवाधिपतिर्वरिष्यते' इति पाठा० ।।

नृपाङ्गजा [१]विष्णुमतावलम्बिनी,
प्रधानपुत्री च जिनेश्वरार्चिका[२] ।। १६० ।।

परस्परं द्वे स्वमतं सदैव ते,
प्राशंसतां तत्र किलैकदा ततः ।
नृपाङ्गजा मन्त्रिसुतामवोचत,
'गुरुस्त्वदीया मलिनाकृतिः[३] सदा ।। १६१ ।।

तवाऽऽङ्गणे प्रत्यहमेति साध्विका,
सुनिश्चितं सा परिमुष्य किञ्चन ।
कदाऽपि यास्यत्यत एव तां सखि !,
निवारय त्वं पुनरागमाद् गृहे' ।। १६२ ।।

निशम्य तस्या वचनं निनिन्द सा,
नृपालपुत्रीं बहु, 'मेदृशं वद' ।
अथैकदाऽमात्यसुता निजश्रवो-
विभूषणं राजसुताऽग्रतो न्यधात्[४] ।। १६३ ।।

तदाऽऽगता सा व्रतिनी तदोकसि,
विशुद्धभिक्षाग्रहणाय सन्मतिः ।
बबन्ध तस्या वसने नृपाङ्गजा,
श्रवोविभूषां न विवेद सा यथा[५] ।। १६४ ।।

अगात् स्वभिक्षां परिगृह्य सा यदा,
तदा प्रधानस्य सुता समागमत् ।

---

१. 'शैव-' इति पाठा० ।। २. 'प्रधानपुत्री किल जैनधर्मिका ।।' इति पाठा० ।। ३. 'मलधारिणी' इति पाठा० ।। ४. 'अमात्यजा मौक्तिकहारमेकदा, नृपाङ्गजायाः पुरतो बबन्ध ह ।।' इति पाठा० ।। ५. 'तर्हि तत्' इति पाठा० ।।

अवेक्ष्य नो कर्णविभूषणं, सखीं,
जगाद सा 'वञ्चयसेऽलि ! कथं सखि[१] ! ।। १६५ ।।

प्रदेहि मे भूषणमि'त्यमात्यजा-
वचो निशम्याऽथ जगाद साऽपि ताम् ।
'मया न दृष्टा सखि ! कर्णिका तव,
न वञ्चये त्वां शपथं करोम्यहम् ।। १६६ ।।

समागताऽत्राऽद्य[२] गुरुस्तवैव सा,
गता विभूषां किमु चोरयित्वा[३] ? ।
अतोऽधुना तत्र चल प्रशोधय,
तदीयवेश्मादिकमि'त्युवाच सा ।। १६७ ।।

निशम्य तद्वाक्यमुवाच मन्त्रिसू-
'र्न साऽग्रहीन्मे वचनात् तथाऽपि ते ।
चलाम्यहं तद्भवनं', समेत्य सा,
नृपाङ्गजा तां व्रतिनीं रहस्यवक् ।। १६८ ।।

'यदि त्वयाऽग्राहि तदीयकर्णिका
प्रदेहि तां साध्वि ! भवेत् ततः शुभम् ।
न चेत् तवाऽत्राऽऽशु विगर्हितां दशा-
ममात्यवर्यः प्रविधास्यति ध्रुवम्' ।। १६९ ।।

तदीयवाक्यं प्रणिशम्य सा जागौ,
'मया गृहीता यदि सा गवेष्यताम्' ।

---

१. 'वञ्चयसेऽलि ! मां कथम् ? ।।' इति पाठा० ।। २. 'इतः समागत्य' इति पाठा० ।। ३. 'गता विभूषां तव प्रायशोऽग्रहीत् ।' इति पाठा० ।।

निशम्य तद्वाक्यमसौ नृपाङ्गजा,
समाददे तद्वसनाच्च कर्णिकाम् ।। १७० ।।

प्रभर्त्स्य तां सा ससखीजनाऽगमत्,
तदैव साऽपि व्रतिनी शुचाकुला ।
गलेऽथ रज्जुं परिबध्य चाऽऽत्मनो,
[1]विमोचनायाऽध्यवसायमातनोत् ।। १७१ ।।

श्राद्धा हि काचित् सुरसुन्दरी तदा,
समागमत् तामवलोक्य तद्विधाम्[2] ।
न्यवारयत् सा व्रतिनीं सुभाषितै-
रनर्थरोधो हि सतां सुलक्षणम्[3] ।। १७२ ।।

विराटदेशे जितशत्रुभूपतेः,
सुतस्तदीयः किल शूरसेनकः ।
तस्मै समभ्यर्थयितुं नृपात्मजां,
तदीयमन्त्री मदनभ्रमं ययौ ।। १७३ ।।

'राजंस्त्वदीयात्मभवानुरूपको,
वरोऽस्ति सर्वैः सुगुणैः समन्वितः ।
श्रीशूरसेनो जितशत्रुभूपजो-
ऽनयोर्विवाहो भवताऽनुमन्यताम्' ।। १७४ ।।

निशम्य तद्वाक्यमसौ नृपस्तदा,
समाह्वयन्मन्त्रिणमाशु धीसखम् ।

---

१. 'प्रमो-' इति पाठा० ।। २. 'तत्राऽन्तरेऽगादवलोक्य तां तथा ।' इति पाठा० ।।
३. '-र्न्यवर्तताऽसौ च ततः स्वघाततः ।।' इति पाठा० ।।

सुतार्पणं मन्त्रितवांश्च तेन यद्,
विमृश्यकारी न कदाऽपि सीदति[1] ।। १७५ ।।

सखीजनात् स्वीयविवाहनिश्चयं,
निशम्य भूपालसुता न्यवेदयत् ।
'यदा भवेन्मन्त्रिसुताऽत्र सम्मता,
तदा करिष्यामि विवाहमङ्गलम्' ।। १७६ ।।

विनिश्चयो 'नौ वर एक एव यत्[2],
समं व्रियेवेत्यत एव तन्मतम्[3] ।
विलङ्घ्य नाऽहं वरयामि कञ्चने'-
त्यवैन्नृपः श्रीमदनभ्रमस्ततः[4] ।। १७७ ।।

[5]नृपोऽवदन्मन्त्रिवरं मनीषितं,
'प्रकाशय स्वं स्वसुतार्पणे सखे !' ।
उवाच मन्त्री 'तव यच्च सम्मतं,
तदेव मेऽप्यत्र विभाति साम्प्रतम्' ।। १७८ ।।

तदीयभावं परिबुध्य भूपति-
र्विनिर्णिनायाऽथ विवाहवासरम् ।
जगाद 'मन्त्रिन् ! व्रज तद्दिने तव,
नृपः समागच्छतु पुत्रसङ्गतः' ।। १७९ ।।

विराटदेशाधिपतिः स्वमन्त्रितो,
निशम्य वाक्यं सहसा समुद्धतम् ।

---

१. 'व्यचीचरत् तेन सुतार्पणं ततो, विचारणीया हि करग्रहक्रिया ।।' इति पाठा० ।।
२. 'चेत्' इति पाठा० ।। ३. 'तदा व्रियेतेत्यत एव 'तन्मतान् ।' इति पाठा० ।।
४. 'अहं करिष्यामि विवाहमित्यसा-ववैन्नृपः श्रीमदनभ्रमस्ततः ।।' इति पाठा० ।।
५. 'न्यवेदयन्' इति पाठा० ।।

अनेकहस्त्यश्वरथादिसङ्कुलं,
बलं समादाय ययौ प्रहर्षितः ।। १८० ।।

तदैव भूपो मदनभ्रमाभिधो,
विधाय सत्कारमनल्पमादरात्[१] ।
श्रीशूरसेनाय[२] ददौ सुतां निजा-
ममात्यवर्योऽपि सुतां तथाऽऽर्पयत् ।। १८१ ।।

स व्यूह्य कन्याद्वयमाप्तयौतुकः,
स्वदेशमापत् किल जैतशत्रवः ।
अतीव हर्षान्नगरीमुपेत्य चा[३]-
ऽन्वभूदुभाभ्यां सह सौख्यसन्ततिम् ।। १८२ ।।

अथैकदा श्रीमदनभ्रमो नृपः,
सुतान्तिकं प्रेषितवान् शुकोत्तमम् ।
सहर्षमाप्त्वा कुतुकाकुला च तं,
राजात्मजा क्रीडनसाधनं व्यधात्[४] ।। १८३ ।।

कदाचिदेनं शुकमाप्तकौतुका,
प्रधानकन्या परियाचते स्म ताम् ।
उवाच सा तां, 'स्वपितुः सकाशतः,
कुतो न संमार्गयसे त्वमप्यमुम् ?' ।। १८४ ।।

निशम्य तद्वाक्यमसौ क्रुधाकुला[५],
पितुः सकाशं जनमामुचद् द्रुतम्[६] ।

---

